No. १४८९

Title गदाधरीटीकायां सामान्य निरुक्तिः

Author गदाधरः

Extent ११२ Age ×

Subject न्याय शास्त्रं

११२ पत्र

गदाधरी टीकायां काशिकाख्यायां सामान्य
निरुक्ति टिप्पनी

१४८९

शिष्टवह्निव्यापकीभूताभावप्रतियोगित्वविशिष्टरूपविशिष्टद्रूपघटितत्वेनासाधारण्ये वाव्याप्तेरनःसार्थक्यात्। अथ यादृशविशि
ष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रकृतानुमितिप्रतिवंधकतायाः स्वरूपसंवंधरूपावच्छेदकतावदित्ये
वविवक्षितं तत्र तादृशनिश्चयद्वयेऽव्यापकविषयिताशून्यत्वमावश्यकं अन्यथाऽनतिरिक्तवृत्तित्वकल्पेऽपि जातित्वादिनाजल
त्वानवगाहिज्ञानघटित निश्चयत्वं न तादृशानुमितिप्रतिवंधकतावच्छेदकमिति विशिष्टद्वयाघटितत्वनिवेशनमकिंचित्करं स्या
त्तथा चासाधारण्ये जलत्वविशिष्टविषयित्वाव्यापकीभूतविषयिताशून्यनिश्चयविशिष्टासाधारण्यनिश्चयत्वे स्वरूपसंवंधरू
पावच्छेदकत्वविरहान्नाव्याप्तिरिति किमनतिरिक्तवृत्तित्वनिवेशेन। यदि च प्रथमयादृशविशिष्टविषयकनिश्चयेऽव्यापकविष
यिताशून्यत्वं न प्रवेश्यं शुद्धजलत्वविशिष्टजलव्यापकताघटितसंवंधः शुद्धजलत्वविशिष्टजलधर्मितावच्छेदकज्ञाने भासतेऽ
तिजातिमद्व्यापकताघटितसंवंधो नवृत्त्यभवव्कज्जलवद्रूपविशिष्टघटक इति मन्यते तदाप्यसाधारण्यसंग्रहायैव घटो द्रव्यत्वाभाव
वानित्यादौ द्रव्यत्ववत्पृथिवीवृत्तिपृथिवीत्ववद्वृत्तिजातिमती पृथिवीतिज्ञानमादायातिव्याप्तिवारणाय च तादृशाव्यापकविषयिता
शून्यत्वं देयं तावतापि प्रामाण्यग्रहाभावाघनिवेशनानतिरिक्तवृत्तित्वापेक्षया लाघवादिति चेन्न। एवमपि जलवत्समानकालीनः
पर्वतो जलवत्समानकालीनपर्वतकालीनवह्निमान् जलादित्यादौ जलप्रकारकतादृशपक्षनिश्चयविशिष्टजलवत्समानकालीनप

गटी·सा०
८६
86

र्वतकालीनवह्निव्यापकीभूताभावप्रतियोगिहेतुविषयकनिश्चयत्वेनप्रतिवंधकतयातत्रत्यासाधारण्येजलवत्समानकालीनप
र्वतकालीनवह्निव्यापकीभूताभावप्रतियोगिहेतुरूपेऽव्याप्तिः तत्रतादृशपक्षरूपतादृशासाधारण्यरूपविशिष्टद्वय घटितत्वाद्धे
तोः नतिरिक्तवृत्तित्वनिवेशनं[illegible]। एवंगंधत्ववान्संयोगो गंधत्वाभावव्याप्यसंयोगवद्वह्निमान्जलादित्यादौ गंधत्वाभावव्याप्यसं
योगवद्वह्निव्यापकीभूताभावप्रतियोगिजलादिरूपासाधारण्येऽव्याप्तिः संयोगत्वविशिष्टगंधत्वाभावव्याप्यसंयोगत्वविशिष्टद्वय
स्यसंयोगत्वविशिष्टरूपैकविशिष्टविषयिताशालिनासंयोगः संयोगवानितिनिश्चयेनविशिष्टस्यगंधत्वाभावव्याप्यसंयोगत्वरू विशिष्ट
पापरविशिष्टनिरूपितविषयिताशालिनिश्चयत्वस्यगंधत्ववान्संयोगइतिविशिष्टपक्षग्रहनिरूपितप्रतिवंधकतावच्छेदकत्वानद्घ
टितत्वात्। अनतिरिक्तवृत्तित्वनिवेशेतुसंयोगनिश्चयविशिष्टगंधत्वाभावव्याप्यसंयोगनिश्चयत्वस्यसंयोगइतिनिश्चयविशिष्टगं
धत्वाभावव्याप्यः संयोगइतिनिश्चयेपिसत्त्वेपितत्राश्रयासिद्धिप्रतिवंधकताविरहेणादोषात्। यद्यपियादृशविशिष्टविषयिताद्वय
सामान्यस्यप्रतिवंधकतायाः स्वरूपसंवंधरूपावच्छेदकत्वप्रवेशेनदोषः निश्चयत्वानिवेशेनलाघवंचतथापिपरिचायकस्यपुरः रूम
स्फूर्त्तिकप्रतिवंधकतावच्छेदकघटितत्वार्थतयाभिधानंस्वरूपसंवंधरूपावच्छेदकतापर्याप्तिनिवेशस्यदुष्करतयाऽनतिरिक्तवृत्तित्व
निवेशः। क्रजवस्तुननुविशिष्टद्वयाघटितत्वनिवेशेअभाववान्वह्न्यभाववान्अभाववांश्चह्रदइत्यवच्छेदकधर्मदर्शनविधयाप्रतिवंधक

अवच्छेदकत्वसावच्छेदकतावच्छेदकसाधारण्यानुपगंतमतसंग्रहार्थंचेर

४ वह्न्यभाव ह्रदादि ... वह्न्यभाववद्ह्रदादिनिश्चये वैशिष्ट्य ... दिनिश्चयस्य ... तानुमितिप्रतिबंधकतानतिरिक्त सत्तया ४

तामादाय वृत्त्यभाववत्त्वविशिष्टह्रदत्वविशिष्टरूपविशिष्टद्वयघटिततया वृत्त्यभाववद्ह्रदादावसंभवः। न चेदं न जलमित्यादौ जलत्ववदि

दंत्वावच्छिन्ने बाधे लक्षणसमन्वयः स्यादिति वाच्यं। तत्रापि पृथिवी जलं इदं च पृथिवीत्यादिज्ञानमादाय इदंत्वावच्छिन्नजलत्वावच्छिन्न

स्व विषयितयोः रूपसंबंधरूपावच्छेदकत्वसंभवेन जलत्वविशिष्टेदंत्वविशिष्टद्वयघटितत्वादित्यतोऽनतिरिक्तवृत्तित्वनिवेशः स च न सं

गच्छते तदुपादानेऽपि वह्न्यभावत्वविशिष्टवृत्त्यभाववद्ह्रदत्वविशिष्टरूपविशिष्टद्वयघटितता याऽसंभववारणायाश्रज्ञानवैशिष्ट्यानव

च्छिन्नप्रतिबंधकतानवच्छेदकत्वेन विशिष्टद्वयविषयिताया विशेषणीयतया वह्न्यभाववत्त्वविशिष्टविषयिताऽभाववद्ह्रदविष

यितयोर्ज्ञानवैशिष्ट्यानवच्छिन्नबाधनिश्चयप्रतिबंधकतायामवच्छेदकत्वेनैव वारणसंभवेन तद्वैयर्थ्यात्। यत्तु प्रतिबंधकत्वा

याएवज्ञानवैशिष्ट्यावच्छिन्नत्वनिवेशात्तत्सार्थक्यमिति तन्न। ह्रदो वह्निमान् वह्न्यभाववज्जलवद्वृत्तिजलाभावादित्यादौ वह्न्यभाव

वद्वृत्तिजलवद्वृत्तिजलान्यत्वात्मकस्वरूपासिद्धस्याव्याप्तेः। यत्तु शुक्लदंडवति रक्तदंडः साध्यते तत्र रक्तदंडाभाववच्छुक्लदंडवतिवा

धेऽव्याप्तिः प्रत्यक्षसामग्रीघटकत्वेन शुक्लदंडविषयकनिश्चयविशिष्टरक्तदंडविषयकनिश्चयत्वेनानुमितिप्रतिबंधकत्वेन शुक्ल

रक्तरूपविशिष्टद्वयघटितत्वादिति तत्सार्थक्यं। तन्न। सामग्रीप्रतिबंधकतायां सामान्यकारणानामप्रवेशात्। अत एव कालादिसा

धारणकारणघटितसामग्र्याः क्वापि प्रतिबंधकत्वं नास्तीति पक्षतागंथे दीधितिकाराः। अस्तु वा साधारणकारणानामपि सामग्री

[illegible]

घटकताअस्तुचप्रत्यक्षेविशेषणज्ञानस्यासाधारणकारणतेतिमतंवाअस्तुचसामग्रीत्वस्यैकविशिष्टापरत्वरूपतयातेनरू
पेणप्रतिबंधकतायाज्ञानवैशिष्ट्यावच्छिन्नत्वंतथापिज्ञानवैशिष्ट्यानवच्छिन्नबाधज्ञानीयप्रतिबंधकतावच्छेदकत्वेननिरुक्त
विशिष्टद्वयविषयितायाःअन्यथात्वान्नाव्याप्तिः।अथवह्निमान्जलादित्यादौवह्निव्यापकीभूताभावप्रतियोगिजलेऽसाधारणेऽव्याप्तिः
जलवान्वह्न्यभाववान्जलवांश्चह्रदइतिज्ञानद्वयप्रतिबंधकतामादायवह्निजलात्मकविशिष्टद्वयघटितत्वादितितदुपादानमि
तिचेन्न।जातिमत्त्वान्वह्न्यभाववान्जलवांश्चह्रदइतिजलवान् वह्न्यभाववान्जातिमत्त्वांश्चह्रदइतिज्ञानयोरपिवह्न्यभाववज्ज
लवद्विषयकनिश्चयविशिष्टजलवद्ध्रदविषयकनिश्चयत्वसत्त्वेनतस्यप्रतिबंधकतानतिरिक्तवृत्तित्वेनविशिष्टद्वयाप्रसिद्धिर
द्वय नःअव्यापकविषयिताशून्यत्वंनिश्चयेविशेषणेएवंचस्वरूपसंबंधरूपावच्छेदकत्वनिवेशेप्युक्तरीत्यानासंभवाव्याप्त्योरवका
दोषतावच्छेदकं शइतितद्वैयर्थ्यात्तायत्तुयद्रूपावच्छिन्नविषयकनिश्चयविशिष्टत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयद्रूपावच्छिन्नविषय
कनिश्चयत्वंप्रतिबंधकतानतिरिक्तवृत्तीत्यादिक्रमेणनिरुक्तविशेषणार्थः एवंचविशिष्टांतराघटितत्वंपृथङ्ननिवेश्यतेप्रमेयत्व राम
विशिष्टविषयकनिश्चयविशिष्टव्यभिचारत्वविशिष्टविषयकनिश्चयत्वस्यप्रतिबंधकतानतिरिक्तवृत्तितयाततएवप्रमेयत्वविशिष्ट
व्यभिचारादावतिव्याप्त्यभावात्अतएवानतिरिक्तवृत्तित्वनिवेशनमपिसार्थकंअन्यथाप्रमेयत्वविशिष्टनिश्चयविशिष्टव्यभिचार

तद्रूपद्वयघटिताव्यापकविषयितास्यत्वैः स्वरूपतो भानेयद्रूपा

क्तदावच्छिन्नावयवप्रतिबंधकस्यावाद्यावात्

त्वविशिष्टविषयकनिश्चयत्वे स्वरूपसंबंधरूपावच्छेदकत्वाभावेन तदतिप्रसंगतादवस्थ्यात्। स्वावच्छिन्नविषयकेत्यादिविशेषण

न्नोक्तरीत्या वह्न्यभाववद्ध्रदादावसंभव इति तन्मंदं। उक्तस्थले वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदाद्यात्मकासिद्ध्यात्मेऽसिद्धि

प्रतिबंधकताघटितविशिष्टद्वयाघटितत्वेनुवक्ष्यमाणः अत्रोच्यते अव्यापकविषयिताशून्यत्वनिवेशात्पृथिवीत्वाभावेन पृ

थिवीभेदे वा साध्ये पृथिवीभेदव्यापकीभूताभावप्रतियोगिघटत्वे व्याप्तिमद्घटः पृथिवी अयं च घट इति ज्ञाने वैशिष्ट्यावच्छिन्नप्रतिबं

धकतामादाय निरुक्तपृथिवीत्वघटत्वरूपविशिष्टद्वयघटितत्वादिति वदंति। अथ ह्रदत्ववह्नित्वादिविशिष्टविषयकनिश्चयविशिष्ट

विशेष वह्न्यभाववद्ध्रदादिरूपविषयकनिश्चयत्वस्याप्यनुमितिप्रतिबंधकतानतिरिक्तवृत्तितया तादृशविशिष्टद्वयघटितत्वाद्वह्न्यभाववद्ध्र न

दादावसंभवः। ननु स्वावच्छिन्नविषयकनिश्चयविशिष्टयद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापिका प्रकृतानुमितिप्रतिबंधकता तद्रू

पावच्छिन्नविषयकनिश्चयविशिष्टस्वावच्छिन्नविषयकनिश्चयत्वव्यापिका भवति स्वावच्छिन्नविषयित्वतद्रूपावच्छिन्नविषयित्वो

भयशून्यप्रतीतिविषयत्वविवक्षणान्न दोषः प्रकृतानुमितिप्रतिबंधकतात्वे व्यापकतावच्छेदकत्वविवक्षया वह्न्यभाववद्वृत्तिज

लवद्ध्रदज्ञानप्रतिबंधकतयोर्विशेष्यविशेषणभावभेदेन भेदेपि न क्षतिरिति चेन्न। एवमपि वह्न्यभाववद्ध्रदत्वविशिष्टविषयकनिश्च

यविशिष्टवह्न्यभाववद्ध्रदत्वविशिष्टविषयकनिश्चयत्वस्यापि अनुमितिप्रतिबंधकतानतिरिक्तवृत्तितया बाधादौ तादृशविशिष्टद्वय

गां०३ख

वृत्तित्वसत्त्वादसंभवापात्तात्। मैवं। यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टैकनिरूपकत्वं ज्ञानवैशिष्ट्यावच्छिन्नप्रति
बंधकतानतिरिक्तवृत्ति तादृशविशिष्टद्वयाघटितत्वस्य विवक्षणीयत्वात्। अथैवमपि वह्न्यभाववज्जलादिमद्वृत्तिजलाभाववद्ध्रद
पक्षकस्थले तादृशजलवद्ध्रदात्मकाश्रयासिद्धावव्याप्तिः तत्र तादृशविशिष्टद्वयघटितत्वात्। न च तत्र तादृशह्रदस्य नाश्रयासि
द्धित्वं अपि तु तादृशपक्षतावच्छेदके ह्रदवृत्तित्वस्यैव तद्विषयकत्वस्यानुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वादिति वाच्यं। तद्दोषतायाः
सकलमतसिद्धत्वात्। न चाश्रयासिद्धिविषयिताघटकविषयितान्यत्वं तादृशविशिष्टद्वयविषयितायां विशेषणमिति वाच्यं। तथा सत्ये
तादृशरीत्या साध्यसाधनाप्रसिद्ध्यादावपि ग्रव्याप्तिमत्त्वेन तादृशविषयिताघटकविषयितान्यत्वनिवेशे महागौरवात्। ग्रंथकारस्य
विशिष्टद्वय सत्प्रतिपक्षमात्रघटकं विषयिताभिन्नत्वनिवेशनौचित्यात्। न च यादृशविशिष्टविषयकत्वं ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानति
रिक्तवृत्ति तादृशविशिष्टघटकविशिष्टद्वयभिन्नत्वं तादृशविशिष्टद्वये निवेश्यमिति न दोष इति वाच्यं। तथा सति वह्न्यभाववज्जलादिमद्वृ
त्तिजलाभाववद्ध्रदपक्षकादिस्थले वह्न्यभाववज्जलादिमत्कालीनजलवद्ध्रदादेरपि दोषत्वापत्तेः तस्य विशिष्टपक्षग्रहविरोधित्वेनाश्र राम॰
यासिद्धित्वाद्यभावादिति चेन्न। यादृशविशिष्टविषयकनिश्चयत्वं ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानतिरिक्तवृत्ति तादृशविशिष्टविष
यिताघटकत्वस्य निरुक्तविशिष्टद्वयविषयितायां निवेशनीयत्वात्। अत्रानतिरिक्तवृत्तित्वं किमर्थमिति न शंक्यं। अलक्ष्यविशिष्टद्वय

घटितत्वेदोषघटकविशिष्टेऽतिव्याप्तेः। यत्रवह्न्यभाववज्जलादिमद्वृत्तिजलादिमद्ह्रदः पक्षोवह्निः साध्यस्तत्रवह्न्यभावविशिष्टतादृशह्रदात्मक
बाधघटकंयद्वह्न्यभाववज्जलवद्ह्रदात्मकंविशिष्टंयच्चजलवद्ह्रदात्मकंविशिष्टंतत्तद्विषयकनिश्चयत्वस्यज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधक
तानिरूपितस्वरूपसंबंधरूपावच्छेदकतयातादृशतादृशविशिष्टविषयित्वाघटकंनिरुक्तविशिष्टद्वयविषयित्वंतदुभयशून्यप्रतीति
विषयत्वस्यतद्बाधघटकेवह्न्यभाववज्जलादिमद्वृत्तिजलवद्ह्रदादौसत्त्वात्। एवंचसत्प्रतिपक्षज्ञाननिष्ठप्रतिबंधकतायांज्ञानवैशिष्ट्या
नवच्छिन्नत्वाभावेनसत्प्रतिपक्षविषयित्वाघटकत्वोपादानंसंगच्छते। नचतदपेक्षयालाघवेनज्ञानवैशिष्ट्यावच्छिन्नत्वसत्प्रतिपक्षविष
यितानवच्छिन्नत्वोभयाभावनिवेशेनैवोपपत्तौव्यर्थंतद्विशेषणमितिवाच्यम्। तथासतिजलव्यापकवह्न्यभावकालीनजलवद्ह्रदेऽति
व्याप्तेःतद्विषयितायाःसत्प्रतिपक्षविषयितावच्छिन्नत्वेनोभयाभाववत्याप्रतिबंधकतानवच्छेदकतयातद्घटकजलव्यापकवह्न्यभा
वजलवद्ह्रदविषयितयोस्तादृशविशिष्टविषयिताघटकत्वादिति। एवंचविशिष्टद्वयाघटितत्वशरीरेऽसंभववारणायप्रतिबंधकतायांज्ञानवै
शिष्ट्यावच्छिन्नत्वमपिनिदेयं। वह्न्यभाववद्ह्रदत्वविशिष्टविषयकनिश्चयत्वस्यज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतावच्छेदकतयातादृशवि
घटक २ शिष्टद्व[illegible]कविषयितायांनिरुक्तविषयितोभिन्नत्वाभावात्। नचैतदपेक्ष्यप्रकृतसाध्यावगाहिप्रकृतहेतुमत्प्रकृतपक्षग्रहप्रतिबंधकतान
वच्छेदकत्वंविशिष्टद्वयविषयितायांकुतोननिवेश्यतेतावतापियुक्तामयासिद्ध्याद्यव्याप्तिवारणसंभवादितिवाच्यं। तथासतिह्रदोधूमवान्

ग॰टी॰ता॰

८९

89

वह्ने रित्यादौवह्न्यभाव[redacted]वज्जलवद्ध्रदेऽतिव्याप्तेर्दुर्वारत्वादिति। अत्रेदं बोध्यं। वक्ष्यमाणरीत्या तादृशतादृशविशिष्टद्वयवि
षयित्वाभावकूटवत्त्वनीतिविषयत्वस्यावश्यकतया वह्नित्वविशिष्टविषयित्ववह्न्यभाववद्ध्रदत्वविशिष्टविषयित्वद्वयस्य वह्न्यभाववद्ध्रदरू
पतादृशविशिष्टविषयित्वाघटकत्वविशिष्टस्याप्रसिद्धेरतः प्रतिबंधकतायां ज्ञानवैशिष्ट्यावच्छिन्नत्वमावश्यकमिति। वस्तुतस्तु लाघवा
त्ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकतादृशविशिष्टद्वयविषयिताशून्यप्रतीतिविषय[redacted]त्वं विवक्षितं। उक्तस्वरू
पासिद्धेस्तादृशविशिष्टद्वयविषयिताया ज्ञानवैशिष्ट्यानवच्छिन्नप्रकृतहेतुविशिष्टप्रकृतपक्षग्रहप्रतिबंधकतावच्छेदकत्वेनोक्ताघटित
त्वात्तस्यानपायान्न दोषः। पत्वसंभववारणाय ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानिवेशः यत्र ह्रदादौ धूमाभावव्याप्यशैवालाभावस्सा
ध्यः धूमश्च हेतुः तत्र धूमाभावव्याप्यशैवालवद्ध्रदरूपबाधाव्याप्तिः धूमाभावव्याप्यशैवालनिश्चयविशिष्टशैवालवद्ध्रदनिश्चयत्वेन ज्ञा
नवैशिष्ट्यावच्छिन्नप्रतिबंधकतासत्त्वात्। न च ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकत्वाव्यापकत्वरूपविशेषणविशिष्टप्रतिबंधकत्वं वि
शिष्टद्वयाघटितत्वघटकमिति वाच्यं। उक्तस्थले धूमाभावव्याप्यशैवालकालीनशैवालवद्ध्रदेऽतिव्याप्तेः तत्र धूमाभावव्याप्यशैवालविष राम
यकनिश्चयविशिष्टशैवालवद्ध्रदविषयकनिश्चयत्वस्य धूमवत्त्वं समादाय ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकताव्यापकीभूतप्रतिबं
धकतायाः एवानतिरिक्तवृत्तित्वादिति तदेतेनैव परास्तं। न च तथापि वह्न्यभाववज्जलत्वविशिष्टजलवद्ध्रदत्वविशिष्टरूपयत्किंचिद्विशिष्टद्

पि ९ ए

ननुक्तार्थंक्विचिदाहार्यप्रसिद्धिरत आह=४

तादृश

याघटितेवह्न्यभाववच्छेदाल वह्निमिश्रेवालवद्ह्रदेऽतिव्याप्तिवारणानुरोधेन तादृशविशिष्टद्वयविषयताभावकूटवत्त्वमिति विषय[redacted]त्वं
[redacted]विवक्षणीयं तथा च वह्निनिश्चयविशिष्टवह्न्यभाववद्ह्रदनिश्चयत्वस्यापि प्रतिबंधकतानतिरिक्तवृत्तितया तादृशद्वयांतःपातित्वं वह्निव
ह्न्यभाववद्ह्रदद्वयस्यापीति ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकतादृशद्वयविषयत्वाप्रसिद्ध्याऽसंभवस्तदवस्थ इति वाच्यम्
। तादृशप्रतिबंधकतानवच्छेदिकाया आहार्यज्ञानीयतादृशविशिष्टद्वयविषयितायाः प्रसिद्धेः। यादृशविशिष्टविषयके तु उद्देश्यतावच्छे
दककोटिनिविष्टविषयितायामपि तस्य विशेषणत्वाद्वेति। यत्तूक्तासंभववारणाय ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकय
त्किंचिद्विषयिताघटिततादृशविशिष्टद्वयविषयित्वाभावकूटवत्त्वमिति विषय[redacted]त्वं विवक्षणीयमिति तन्न। प्रमेयत्वविशिष्टव्य
भिचारे प्रमेयत्वविशिष्टविषयितारूपतादृशघटितत्वेनैवातिव्याप्त्यसक्तेर्वक्ष्यमाणविशेषणवैयर्थ्यापातात्। अत्र धूमाभावव्याप्य
वह्न्यभावकालीनह्रदत्वेन पक्षत्वं वह्नित्वेन साध्यत्वं धूमत्वेन हेतुत्वं च यत्र तत्र ह्रदवृत्तिधूमाभावव्याप्यवह्न्यभावकालीनवह्न्यभावद्वति वा
व्याप्तिः धूमा + त्वाभाववद्वह्न्यभावकालीन + भावव्याप्यवह्न्यभावविषयकत्वह्रदवृत्तित्वविशिष्टवह्न्यभाव विषयकत्वयोर्ज्ञानवैशिष्ट्या
नवच्छिन्नप्रतिबंधकतावच्छेदकत्वादिति विशिष्टांतराघटितत्वसार्थक्येपि जलवान् ह्रदो वह्निमानित्यादौ वह्न्यभाववज्जलवद्ह्रदात्मकबा
धेः व्याप्तिः जलप्रकारतानिरूपितह्रदत्वावच्छिन्नविषयितायाः वह्न्यभावप्रकारतानिरूपितजलवद्ह्रदत्वावच्छिन्नविषयितारूपविशिष्ट

वह्न्यभावकालीन२

व्यभिचारत्वावच्छिन्नविषयिता[illegible]प्रमेयत्वावच्छिन्नविषयितात्वेनानवच्छेदकत्वमित्याशयः=५

५

तादृश्याः प्रतिबंधकतावच्छेदकविषयितायाउपादाने नोक्तदोषनिरासादिति वाच्यं लाघवे [redacted] न २
न ताद्द्वय

ग॰टि॰ सा॰ विषयिता भिन्नायाः विशिष्टविषयितायाः प्रतिबंधकतानवच्छेदिका या तत्त्वमनीतौ सत्वादिति दूषणं बोध्यं। न च तादृशविशिष्टद्वयविषयिताद्व
यस्यैकत्रज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकत्वनिवेशादेवसामंजस्ये ऽपरत्र तन्निवेशवैयर्थ्यं ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंध
९॰ कतावच्छेदकावृत्तित्वस्य तादृशविशिष्टद्वयविषयिताद्वयत्वेन निवेशेनावैयर्थ्यात्। प्रतिबंधकतायां ज्ञानवैशिष्ट्यावच्छिन्नत्वनिवेशस्यापि नोक्तासं
ग्रं॰ ६४ भवः। नन्वेवमपि ह्रदो वह्निमान् वह्न्यभाववद्वृत्तिजलाभावादित्यादेः पूर्वोक्तस्य लक्ष्यत्वाव्याप्तिः वह्निनिश्चयविशिष्टवह्न्यभावव [redacted] जलवद्वृत्तिजल
90 वद्ध्रदनिश्चयत्वस्य ज्ञानवैशिष्ट्यानवच्छिन्नपक्षधर्मिकहेतुमत्ताज्ञाननिरूपितप्रतिबंधकतायाः स्वज्ञानवैशिष्ट्यावच्छिन्नायाः पक्षे साध्यग्र
हनिरूपितप्रतिबंधकतायाः अनतिरिक्तवृत्तित्वेन वह्निवह्नीतरादिविशिष्टद्वयस्याप्युक्तद्वयांतःपातितया ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधक
तानवच्छेदकतादृशविषयिताद्वयाप्रसिद्ध्या [redacted] तस्य लक्ष्ये [redacted] दुरुपपादत्वादिति वाच्यम्। यदेकविशिष्टविषयकनिश्चयवि
द्विष्टापरविशिष्टविषयकनिश्चयत्वं तदेकविशिष्टानिरूपित [redacted] विषयितानवच्छिन्नज्ञाननिष्ठावच्छे [redacted] कताकतदपरविशिष्टानिरूपितवि ८
[redacted] विषयितानवच्छिन्नप्रतिबंधकतानतिरिक्तवृत्तिज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतावच्छेदकावृत्तितादृशविशिष्टद्वयविषयिताद्वयत्वाव रा॰म॰
च्छिन्नाभावकूटवत्प्रतीतिविषयतावच्छेदकत्वस्य विवक्षिततया कद्वयस्य तादृशद्वयानंतर्भावात्। वह्न्यभाववज्जलवत्त्वरूपजलवद्ध्रदत्वरूप
विशिष्टविषयिताद्वयत्वस्य तादृशप्रतिबंधकतावच्छेदकावृत्तित्वेन लक्षणगमनात्। तादृशविशिष्टानिरूपित [redacted] विषयित्वं च तादृशविशिष्ट

अवश्यं

निरूपितविषयिताभिन्नविषयितानिरूपकतावच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टनिरूपितविषयित्वं तेन जलवद्ध्रदत्वादिविशिष्टानि
रूपितेन जलत्वेनान्यावगाहिजलवान् ह्रद इति ज्ञानविषयित्वे न प्रतिबंधकतावच्छेदकत्वयोरवच्छेद्यत्वेनाप्रसिद्धिः भ्रमविषयित्वस्या पि
तथात्वात्। न च यादृशयादृशद्वयस्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदक एकविशिष्टनिरूपितविषयिताशालिनिश्चयविशिष्टतथाविधापरविशिष्टनिरूपितविषयिताशालिनिश्चयत्वं प्रतिबंधकतानतिरिक्तवृत्तीति विवक्षणीयं अन्यथा वह्निमज्जलवत्काली
नह्रदो वह्निमान् धूमादित्यादौ ह्रदो वह्निमान् जलाभावादित्यादौ च वह्न्यभाववज्जलवद्ध्रदरूपद्वयस्यापि तादृशद्वयांतःपातित्वापत्त्या ज्ञानवै जलत्व
शिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकीभूततादृशविशिष्टविषयिताद्वयाप्रसिद्ध्या तत्रत्यबाधादावव्याप्त्यापत्तेः एवं चोक्तासंभवानंका व
शेन प्रतिबंधकतायामुक्तविशेषणं निष्फलमिति वाच्यम्। एवं विवक्षणेपि घटत्वपटत्वप्रमेयत्वादिविशिष्टवह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदत्व
विशिष्टादिरूपानंतस्य द्वयांतर्भावापत्त्या तादृशविशिष्टद्वयविषयिताद्वयत्वावच्छिन्नाभावकूटस्याव्यावर्त्तकस्य निवेशप्रसंगात्। अव्यावर्त्त
कानिवेशरूपलाघवार्थं वोक्तविशेषणसार्थक्यात्। अत एव ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकयादृशविशिष्टविषयिताशा लि यादृश
निश्चयत्वं प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्ति [illegible] तादृशतादृशाघटितत्वमेव निवेश्यं न तु द्वयाघटितत्वं गौरवादिति प्रत्युक्तं। वह्न्यभा
ववज्जलवत्त्वविशिष्ट[redacted]वद्ध्रदत्वविशिष्टद्वयघटिते वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रद तादृशजलवत्कालीनह्रद[redacted]तादृशजलवत्काली
जलत्व जलत्व

ताद्दश जल वह्निषयक सा भावप्र [illegible] कूटत्वाद्य

ग॰ टि॰ सा॰ नगगनकालीनजलवद्ध्रदत्वावच्छिन्नेऽतिव्याप्तिवारणाय तादृश तादृशविषयत्वाभावकूटनिवेशे महागौरवात्। अन्ये तु [redacted]

५९ [redacted]। अथ यादृश यादृश परेन वह्न्यभाववद्ध्र [redacted] जलवद्ध्रदादेरिव वह्न्यभाववज्जलवत्कालीन

९१ जलवद्ध्रदादेरप्युपादेयतया तादृश तादृशानां न विशिष्टाद्यघटितत्वमुपेक्ष्य तद्ध्रदकविशिष्टद्वयमुपादाय तादृश तादृश विशिष्ट पदार्थवारणं

सम्यग्गूलाद्यवादिति समाधानमयुक्तं तादृश विशिष्टद्वयाद्यघटिततत्कल्पे वह्न्यभाववज्जलादिमत्त्वरूपविशिष्टविषयकनिश्चयविशिष्टका

लीनत्वविशिष्टजलवद्ध्रदत्वविशिष्टनिश्चयत्वादेरपि तादृशप्रतिबंधकतावच्छेदकतया तादृशविशिष्टद्वयाघटितत्वनिवेशान्महागौरवादि

यादृशयविशिष्ट तिचेन्न। यादृशविशिष्टविषयकनिश्चयविशिष्टविषयकनिश्चयत्वावच्छिन्नप्रतिबंधकतायास्तद्घटकत्वात्। वह्न्यभाववज्जलवन्निश्चयविशि

ष्टकालीनत्वविशिष्टजलवद्ध्रदनिश्चयत्वेनाप्रतिबंधकतया तादृशस्वरूपस्योपादानासंभवात्। न च निरूप्यनिरूपकभावापन्नविषयिताद्य

टितधर्मस्यैव प्रतिबंधकतावच्छेदकतया यादृशविशिष्टविषयकनिश्चयविशिष्टविषयकनिश्चयत्वं न प्रतिबंधकतावच्छेदकमिति कथं तथा विशिष्ट

निवेश इति वाच्यं यादृशविशिष्टद्वय प्रतिविशिष्टद्वय स्य विषयिता सामान्यावच्छिन्नत्वस्य प्रतिबंधकतायां वाच्यत्वात्। प्रतिबंधकतानवच्छेद राम॰

कविषयिताश्रयत्वेन न निश्चयद्वयस्य वा विशेषणात्। नेन वह्न्यभाववज्जलवत्कालीनत्वरूपविशिष्टविषयकनिश्चयस्यापि व्युदासोऽदिति। न

च तथापि वह्निमज्जलवत्कालीनह्रदो वह्निमान् ह्रदो वह्निमान् जलाभावादित्यादौ वह्न्यभाववद्[redacted]जलादिमद्ध्रत्तिजल[redacted]वद्ध्रदादावतिव्याप्तिः तत्र

तद्परविशिष्टानिरूपितविषयितानवच्छिन्न[redacted] प्रतियोगिकत्वं

अवच्छेदकतायां निरूप्यनिरूपकभावापन्नविषयितात्वेनानवच्छिन्नत्वस्य निवेश तथा कालीनतादिविशिष्टजलवद्ध्रदावारणात्तु

तद्घटकविशिष्टविषयितात्द्वयत्वे ज्ञानवैशिष्ट्यानवच्छिन्नायाः प्रकृतपक्षग्रहनिरूपितायाः प्रकृतपक्षधर्मिकप्रकृतहेतुमत्ताग्रहनिरूपि
तायावाप्रतिबंधकतायाः अवच्छेदकीभूततदेकविशिष्टविषयिताद्वित्तित्वेन ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतावच्छेदकाद्वित्तित्वविर नद
हात्तथा यादृशयादृशद्वयस्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकविषयिताद्वयनिवेशेन तद्घटकविशिष्टद्वयस्य यादृशया
दृशद्वयशब्देनैवाग्रहणाच्च। एतेन केषांचिज्ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकत्तानवच्छेदकविशिष्टद्वयविषयितानिवेशकल्पे ह्रदो धूमवा
नुग्रैवालाभावादित्यादौ धूमाभावव्याप्यशैवालकालीनशैवालवद्ह्रदावृत्तिव्याप्तिः तत्र विशिष्टद्वयाविषयिताया ज्ञानवैशिष्ट्यानवच्छि
न्नप्रतिबंधकतानवच्छेदकत्वाभावादिति दूषणाभिधानं सुसंगतमेव धूमवत्त्वमादाय तन्निष्ठयस्य ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकत्वा
दिति वाच्यं। आश्रयासिद्ध्यादिरूपविशिष्टांतरघटितत्वेनैव तद्व्युदासात्। न च तथापि विशेषगुणेत्याद्युक्तस्थलीयाश्रयासिद्धिसंग्रहाय यादृ
शं विशिष्टांतराघटितत्वं विवक्षणीयं तादृशं दर्शितस्थलसाधारणं प्रतिहेतुव्यापकसाध्याभाववद्वृत्तिप्रतिहेतुत्वस्य संग्रहानुरोधेन स्ववि म ४
षयिताव्यापकविषयिताशून्यज्ञानीयत्वेन द्वितीयविषयिताविशेषणाद्ह्रदभाववज्जलवत्कालीनजलवद्दादिवि षयितामादाय न व्याप ढु
कत्वहानिरिति न तेन तद्वारणमिति वाच्यम्। स्वविषयिताप्रयोज्यविशिष्टांतरविषयिताप्रयोज्यतादृशोभयाभावाधिकरणताकत्वरूपस्य
वक्ष्यमाणस्यैवाघटितत्वांतार्थस्य प्रतिबंधकताघटितयथाश्रुतलक्षणेपि निवेशेन व्यभिचारघटितबाधादिसंग्रहस्य संभवत्ता[redacted]

भागप्रको नका

स्विद्धतत्तीये प्रटितल ग्रहः ५८

बाध-

ग०टि०सा०
८२
92

वक्ष्यमाणतया तावन्नैवोक्तासिद्धिसंग्रहेणान्यादृशविशिष्टांतराघटितत्वनिवेशस्यानभिमतत्वात्। ह्रदो वह्निमान् धूमादित्यादावपि वह्न्यभावव
ज्जलवद्वृत्तिजलवद्ध्रदादिरूपविशिष्टघटकवह्न्यभाववज्जलवद्ध्रदादिरूपविशिष्टांतरसत्त्वेन विशिष्टद्वयाघटितत्वस्य निकृष्टविशिष्टांतराघटि
तत्वघटितलक्षणे प्रयोजनविरहेण प्रकृते संभवेन यथाश्रुतविशिष्टांतराघटितत्वघटितलक्षण एव विशिष्टद्वयाघटितत्वस्यातिव्याप्तिनिरासाय
निवेशेन तत्र दोषविरहात्। अत एव ग्रंथकृतापि निकृष्टविशिष्टांतराघटितत्वनिवेशमभिप्रेत्य तद्विरहेण वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदा
दावतिव्याप्तिवारणं कृतं पश्चाच्च मूलोक्तयथाश्रुतविशिष्टांतराघटितत्वस्य तत्रासत्त्वेन यथाश्रुततद्घटितलक्षणस्यातिव्याप्तिरशक्यपरिहारैवे
तिन चेत्यादिनाशंक्य यथाश्रुतविशिष्टांतराघटितत्वकल्पे आपाततः प्रसक्तायाः अतिव्याप्तेर्वारणाय विशिष्टद्वयाघटितत्वं निवेशितमिति दिक्। यत्तु
तथापि ह्रदो वह्निमान् वह्निमज्जलवत्कालीनजलाभाववद्ध्रदादित्यादौ ह्रदो वह्निमज्जलवत्कालीनजलाभाववद्ध्रदकालीनवह्निमान् धूमादित्यादौ
तत्र च वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदेऽतिव्याप्तिः ज्ञानवैशिष्ट्यानवच्छिन्नहेतुसाध्यग्रहप्रतिबंधकतायां निरुक्तविषयिताद्वयस्यावच्छेदकतया तद्वि
न्नं यन्निरुक्तविषयित्वं [redacted] तच्छून्यप्रतीतिविषयत्वसत्त्वात्। ह्रदे वह्न्यवगाहित्वावच्छिन्ननिरूपितप्रतिबंधकतामादाय विशेषगुणेव वह्निवदि राम०
संग्राहकवक्ष्यमाणयत्किंचित्प्रतिबंधकताघटितविशिष्टांतराघटितत्वसत्त्वाच्च अतो ज्ञानवैशिष्ट्यानवच्छिन्नैकप्रतिबंधकतानवच्छेदकत्वं विवक्ष
णीयं उक्तस्थले च वह्न्यभाववज्जलवद्विषयकत्वजलवद्ध्रदविषयकत्वरूपावच्छेदकभेदेनैव प्रतिबंधकताभेदान्न दोषः। परे पुनरीदृशशंकाभयेन ज्ञा

नवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकत्वविशेषणंपरित्यज्यैवाश्रयासिद्ध्यादिविषयितात्वघटकत्वमेवविशिष्टद्वयविषयितायामग
त्यानिवेश्यं।अत्रेदमाशंक्यते।स्वावच्छिन्नविषयितांतःपातिविषयितात्वव्यापकावच्छेदकताकज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानतिरि
क्तवृत्तिस्वावच्छिन्ननिरूपितविषयिताकोयोधर्मःतदवच्छिन्नविषयितात्वघटकत्वमेवविशिष्टद्वयविषयितायांप्रवेश्यमितिसर्वसामंजस्यमिति
।अत्रेदंसमाधानं।ईदृशरीत्यायद्रूपावच्छिन्नविषयितांतःपातिविषयितासामान्यंस्वरूपसंबंधरूपप्रतिबंधकतावच्छेदकमितिपरिष्कर्तुंश
क्यत्वेनविशिष्टांतराघटितत्ववैयर्थ्यादनईदृशरीतेरनभिप्रेतत्वमिति।अत्रस्वावच्छिन्नानिरूपितविषयितानवच्छिन्नज्ञानवैशिष्ट्यानव
च्छिन्नप्रतिबंधकतानतिरिक्तवृत्तिस्वावच्छिन्ननिरूपितविषयिताकधर्मावच्छिन्ननिरूपितविषयितात्वघटकत्वंविशिष्टद्वयविषयितायांनिवे
श्यंतावतैवनिर्वाहादाश्रयासिद्धिस्वरूपासिद्ध्यादिविषयितात्वघटकत्वानिश्चयकृष्टचयकृन्ननिवेश्यानीतिप्रकारांतरंसंभवति।परंतुस्वावच्छिन्ना
निरूपितविषयितानवच्छिन्नप्रतिबंधकतानतिरिक्तवृत्तिस्वावच्छिन्नविषयिताकधर्मावच्छिन्नत्वस्यातिलघुनोवक्ष्यमाणस्यैवनिष्टंकितस्यलक्ष
णत्वसंभवाद्विशिष्टद्वयाघटितत्वमेवकिमर्थमिति।अथतादृशविशिष्टद्वयविषयितायास्तादृशविशिष्टविषयितात्वघटकत्वरूपंयद्विशेषणंनतत्को
टिप्रविष्टंतादृशविशिष्टविषयितायामेवज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकविषयित्वाघटितत्वमेवकुतोननिवेश्यतेतावतापिव
ह्निमज्जलत्वकालीनजलाभाववद्ह्रदघटितसाध्यकादौवह्न्यभाववज्जलवद्वृत्तिजलवद्ह्रदादिवारणसंभवात्वृत्तित्वविषयितायाएवप्रतिबंधकता

८

ग॰टी॰सा॰
८३
93

नवच्छेदकत्वादिति चेन्न। तथापि वह्निमज्जलवद्दृत्तिजलकालीनजलाभाववद्ध्रदादिघटितसाध्यादिके उक्तविशिष्टे ऽतिव्याप्तेः। व्याप्यव्यापकभा
वानापन्नप्रतिबंधकताद्वयशून्यत्वेन विशेष्यदलप्रविष्टनिश्चयविशेषणेनोक्तदोषवारणेऽपि अभावनिरूपितप्रतियोगित्वानिरूपितावच्छेदकता
कालीनपर्वतो धूमवान् वह्नेरित्यादौ साध्यतावच्छेदकनिष्ठव्यभिचारे ऽव्याप्तिः तज्ज्ञानस्य विशिष्टपक्षग्रहविरोधिप्रतिबंधकताशालित्वादिति
वर्णयंति तदुभयमपि गदाधरभट्टाचार्यानुयायिभिरनादरणीयमेव विशिष्टद्वयाघटितत्वस्य यथाश्रुतविशिष्टांतराघटितत्वप्रवेशाभिप्रायकतया
नुःस्थले साध्यसाधनाप्रसिद्धिघटितत्वेनैव व्युदाससंभवात् एकप्रतिबंधकताविवक्षणस्याश्रयासिद्ध्यादिविषयित्वाघटकत्वरूपविशेषणस्य
चवैयर्थ्यात्। अत्र ह्रदो वह्निमान् वह्न्यभाववज्जलवद्दृत्तिजलत्वे वालोभयाभावादित्यादौ स्वरूपासिद्धिनामके वह्न्यभाववज्जलवद्दृत्तिजलवद्ध्रदस्मा
त्रे ऽतिव्याप्तिः तादृशविषयताद्वयशून्योभयप्रकारकासिद्धिज्ञानविषयत्वादतः ज्ञानपदार्थे ऽनाहार्याप्रामाण्यज्ञानानास्कंदितनिश्चये तादृशवि
षयताद्वयशून्यत्वे सत्यव्यापकविषयिताशून्यत्वं निवेश्यमित्यलं विस्तरेण। अत्र यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयक
निश्चयत्वं प्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टद्वयविषयिताशून्याव्यापकविषयिताशून्यविशिष्टांतरविषयिताशून्ययद्रूपावच्छिन्नविष	राम॰
यकनिश्चयत्वं प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तितद्रूपावच्छिन्नत्वं समुदायार्थः। तत्र वह्न्यभाववत्त्वविशिष्टवह्न्यभाववद्ध्रदत्वविशिष्टद्वय
विषयताद्वयादिकमादायासंभववारणाय द्वितीय यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वंप्रतिबंधकतानतिरिक्त

हृतिनादृशविशिष्टमेवप्रथमविशिष्टशब्देनोपादेयं। प्रथमस्यादृशविशिष्टशब्देन वह्न्यभावत्वविशिष्टस्योपादानासंभवान्न दोषः एवमपि वह्न्यभा
ववद्ध्रदत्वविशिष्टस्योभाभ्यां विशिष्टपदाभ्यामुपादानसंभवादसंभव इति तादृशविशिष्टद्वयविषयिताद्वयत्वावच्छिन्नशून्यत्वं विवक्षणीयं। ह्र
दो भावाप्रतियोगिवह्निमानित्यादौ साध्याप्रसिद्धिघटिते वह्न्यभाववद्ध्रदरूपबाधे अत्यन्ताभावकालीनपर्वतो धूमवानप्रतियोगितानिरूपिता
वच्छेदकत्वकालीनवह्नेरित्यादौ साध्यतावच्छेदकनिष्ठव्यभिचारे पक्षसाधनाप्रसिद्धिघटिते चाव्याप्तिवारणाय द्वितीययादृशविशिष्टविषयक
निश्चयविशिष्टप्रथमयादृशविशिष्टविषयकनिश्चयत्वं यत्प्रतिबंधकतानतिरिक्तवृत्तिप्रथमयादृशविशिष्टविषयकनिश्चयविशिष्टद्वितीयया
न्यायसि०-न ६ दृशविशिष्टविषयकनिश्चयत्वं तत्प्रतिबंधकतानतिरिक्तवृत्तीति विवक्षणीयम् न च तथापि वह्न्यभाववज्जलवद्विषयकनिश्चयविशिष्टजलवद्ध्र
दविषयकनिश्चयत्वावच्छिन्नप्रतिबंधकत्वादन्यदेव जलवद्ध्रदविषयकनिश्चयविशिष्टवह्न्यभाववद्ध्रदविषयकनिश्चयत्वावच्छिन्नप्रतिबंधकत्व
मिति विशिष्टद्वयाघटितत्वं दुर्निवेशमेवेति वाच्यम्। प्रकृतानुमितिवृत्ति यद्रूपावच्छिन्ने यद्रूपावच्छिन्नप्रकारतावच्छिन्ननिरूपितप्रतिबंधक
कतात्वेन प्रतिबंधकताद्वयस्याप्येकत्वात्। न चैवं तथाविधैकरूपावच्छिन्नप्रतिबंधकतात्वेन निवेशेऽपि वह्निमज्जलवत्कालीनजलाभाववद्ध्रदकालीन
— भा २ घटादिसाध्यकादाव सिद्धिघटितत्वाद्ह्रदेवज्जलवद्वृत्तिजलवद्ध्रदो वेति व्याप्तिः। यथाश्रुतविशिष्टांतराघटितत्वनिवेशस्यैवात्र सत्वात्। ह्रदो वह्निमान्व
ह्न्यभाववज्जलवद्वृत्तिजलाभावादित्यादौ स्वरूपासिद्ध्यादिसंग्रहस्य स्वरूपासिद्ध्यादिघटकदलद्वयविषयतान्यत्वं प्रवेश्यैव तच्च सत्प्रतिपक्षघटक
ति २

ग॰टि॰सा॰ ९४

९५ मत्क

दलद्वयविषयितान्यत्वमात्रनिवेशंवदतोभट्टाचार्यस्य नाभिप्रेतमितिचेन्न। तस्योपलक्षणत्वात्। तत्रैव वह्न्यभाववज्जलवत्कालीनजलवद्ह्रदादिवा
रणंतुवह्न्यभाववज्जलवत्त्वरूपकालीनत्वविशिष्टजलवद्ह्रदत्वरूपविशिष्टद्वयघटितत्वादितिपरस्यरंयादृशविशिष्टविषयकनिश्चयविशि
ष्टत्वादिपथपरिष्कारंमन्तीमः। अथोक्तस्थलेस्वरूपासिद्ध्यादिसंग्रहायप्रतिबंधकतायांज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकत्वाव्यापकत्वमे
वविशेषणं। उक्तस्वरूपासिद्धिनिश्चयेप्रतिबंधकतापास्त्यादृशप्रतिबंधकताव्यापकत्वान्नदोषः। नचतथापियत्रघटकालीनवह्न्यभाववज्ज
लादिमद्वृत्तिजलवद्ह्रदस्यस्वरूपासिद्धत्वंतत्रवह्न्यभाववज्जलवद्वृत्तिजलवद्ह्रदेऽतिव्याप्तिः तादृशप्रतिबंधकतापाःज्ञानवैशिष्ट्यानवाच्छिन्न
प्रतिबंधकताव्यापकत्वादितिवाच्यं। ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकताशून्यत्वावच्छिन्नविषयिताशालिनिश्चयवृत्तियादृशविशिष्टविषयक
निश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वंप्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टद्वयघटितेयत्त्वंतदवच्छिन्नभिन्नत्वस्य
विवक्षितत्वात्। नचतथापितदवच्छिन्नभिन्नत्वंतत्पर्याप्त्यवच्छेदकताकविषयिताशून्यप्रतीतिविषयत्वंविवक्षणीयंअन्यथाघटकालीनवह्न्यभाववज्ज
लादिमद्वृत्तिजलवद्ह्रदेऽव्याप्तिः। तादृशंयत्त्वंवह्न्यभाववज्जलादिमद्वृत्तिजलवद्ह्रदत्वंतदवच्छिन्नान्यत्वस्यतत्राभावात्। तथाचतादृशविशिष्टद्वयघ
टितंयत्त्वंतत्पर्याप्त्यवच्छेदकताकविषयिताशून्यघटकालीनवह्न्यभाववज्जलवद्वृत्तिजलवान्ह्रदइत्याकारकप्रतीतिविषयत्वस्यवह्न्यभाववज्जला राम
दिमद्वृत्तिजलवद्ह्रदेसत्त्वादतिव्याप्तिर्दुर्वारैवेतिवाच्यं। तादृशप्रतीतिविषयतावच्छेदकतापर्याप्त्यवच्छेदकंयदनुमितिप्रतिबंधकतानतिरिक्त
वृत्तिविषयितानिरूपकतावच्छेदकंतदवच्छिन्नत्वस्योक्तत्वात्। एतेनोक्तरीत्याः संभववारणायज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानिवेशेहृदो

ग्रंथकृतां यत्किंचित्प्रतिबंधकताघटितविशिष्टांतराघटितत्वस्याभिप्रेतत्वेन तदा व्याप्तिज्ञानविरहप्रयुक्तेति अथवा ४

धूमाभावव्याप्यशैवालाभाववान् धूमादित्यादावुक्तरीत्या बाधेऽव्याप्तिः ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकताव्यापकत्वस्य तद्घटकप्रतिबंध
कताविशेषणत्वे तत्रैव धूमाभावव्याप्यशैवालकालीनशैवालवद्ध्रदेऽतिव्याप्तिरिति समाहितमिति चेत् ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधक अत्र केचित्
नैतन्निष्कर्षस्य तानवच्छेदकत्वस्य विशिष्टद्वयविषयिताविशेषणत्वे वौ स्यापि धूमवान् शैवालाभावादित्यादौ धूमाभावव्याप्यशैवालकालीनशैवालवद्ध्रदादा
वतिव्याप्तिप्रसक्तत्वात् विशेषगुणवद्ध्रदादिसंग्राहकयत्किंचित्प्रतिबंधकताघटितविशिष्टांतराघटितत्वसत्त्वात्। अत्र धूमांशे स्वावच्छिन्नविषयिता
व्यापकीभूतविषयिताशून्ययद्रूपावच्छिन्नविषयिताशालिज्ञानं यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वप्रतिबंधकता
नतिरिक्तवृत्तिज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकीभूततादृशविशिष्टद्वयविषयिताशून्यं भवति तद्रूपावच्छिन्नत्वं विशिष्टद्वयाघ
टितत्वं अत्र ह्रदो वह्न्यभाववान् वह्न्यभाववज्जलादिमद्वृत्तिजलवांश्चेति ज्ञानमादायासंभवद् इति तादृशज्ञानत्वसामानाधिकरण्येन तादृशशून्यत्वं
तं निवेश्यं एवं च ह्रदो वह्निमान् तादृशजलशैवालोभयाभावादित्यत्र तादृशजलवद्ध्रदेऽतिव्याप्तिः तादृशजलशैवालोभयवानिति ज्ञाने तादृशवि
षयिताद्वयशून्यत्वादतः स्वावच्छिन्नविषयकत्वाव्यापकीभूतविषयिताशून्यत्वं ज्ञानविशेषणं। यत्र घटकालीनवह्न्यभाववज्जलादिमद्वृत्तिज
लवद्ध्रदः स्वरूपासिद्धिस्तत्र विशिष्टद्वयविषयितायां ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतावच्छेदकतया तज्ज्ञानस्य शून्यत्वात् विशेषणसत्वेन चल
क्षणसमन्वयः वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदेऽतिव्याप्तिवारणं तु त्वया। एवं ह्रदो वह्निमान् वह्निमज्जलवद्वृत्तिजलाभावादित्यादौ वह्न्यभाववज्ज
लादिमद्वृत्तिजलवद्ध्रदे वह्न्यभाववज्जलवद्विषयित्व जलवद्ध्रदविषयित्वयोर्ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतावच्छेदकतयाऽतिव्याप्तिरताय

ग्याश्रुतविशिष्टांनरावृटितत्वमपिनिवेश्यमितिप्रतिभाति। वस्तुतस्तु यादृशविशिष्टविषयकनिश्चयविशिष्ट्यादृशविशिष्टविषयकनिश्चयत्वं स्वविषयकत्वावच्छिन्नयत्किंचित्प्रतिबंधकतानिरूपितप्रतिवध्यतावच्छेदकीभूतायाप्रकारतातदनवाच्छिन्नप्रतिवध्यतानिरूपितज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानतिरिक्तवृत्तिनादृशविशिष्टद्वयावृटितत्वमेवसमुदितार्थः स्वपदंदोषत्वेनाभिमतविशिष्टपरं उक्तस्थलेचवह्न्यभाववज्जलादिमद्वृत्तिजलादिमद्ध्रदविषयकत्वावच्छिन्नाश्रयासिद्धिज्ञानीयप्रतिबंधकतानिरूपितप्रतिवध्यतायाअनवच्छेदकविषयितावच्छिन्नत्वात् वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदविषयकनिश्चयीयज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानिरूपितप्रतिवध्यतापाद्दस्तुकाव्याप्त्यनवकाशः यत्किंचित्वानुपादानेतथाविधाश्रयासिद्धिज्ञानीयज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतायाअपिधर्त्तुंशक्यत्वेनतादृशघटादिप्रकारत्वानवच्छिन्नप्रतिवध्यत्वीयज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकत्वमादायाव्याप्तिरतः तदुपादानं। नचयत्किंचित्प्रतिबंधकतात्वेनप्रतियोगिकोटिनिविष्टप्रतिबंधकत्वोपादानेप्रकृतं [redacted] ग्रहत्वावच्छिन्नप्रतिबंधकतामादायतादृशप्रतिवध्य[redacted]तानवच्छेदकत्वं साध्यप्रकारतायामपीतितादृश[redacted]कारता[redacted]वच्छिन्नप्रतिवध्यता[redacted]रितिवाच्यं। ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्ययत्किंचित्पदार्थत्वात्। नचैवमसाधारण्यासंग्रहः स्वविषयकत्वावच्छिन्नज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकत्वाप्रसिद्धेरितिवाच्यम्। [redacted]ज्ञानवैशिष्ट्यावच्छिन्नत्वस्वविषयिताव्याप्य[redacted]भयाभावव[redacted]तानिवेशस्याभिप्रेतत्वात्। अत्रह्रदोवह्निमान्वह्निमज्जलवद्वृत्तिजलाभावादित्यादौवह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदे तिव्याप्तिवारणमूर्त्यं। पाषाणमयपर्वतवारणायविशेष्यदलं। अथवायादृशविशिष्टविषयकनिश्चयदिशिष्टयादृश

विशिष्टविषयकनिश्चयत्वं स्वविषयकत्वावच्छिन्नयत्किंचित्प्रतिबंधकतानवच्छेदकविषयितानवच्छिन्नज्ञानवैशिष्ट्या
वच्छिन्नप्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टद्वयघटितं यघततदन्यत्वं समुदितार्थ इत्यतो नासंभवः। वह्न्यभाववज्जलत्वादि
महद्वृत्तिजलत्वादिमद्ध्रदादिरूपाश्रयासिद्ध्यादिस्थले तु स्वविषयकत्वावच्छिन्नं यदाश्रयासिद्धिज्ञाननिष्ठं प्रतिबंधकत्वं तदनवच्छेदकीभू
तं वह्न्यभाववज्जलत्ववत्कालीनजलवद्ध्रदादिविषयित्वं तदवच्छिन्नमेव ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकत्वमतस्तद्वृत्तितान्यत्वं
सुलभं यत्किंचित्त्वोपादानफलं पूर्ववत्। अथवा अथ यादृशविशिष्टविषयकनिश्चयविशिष्ट्या यादृशविशिष्टविषयकनिश्चयत्वं प्र
कृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टद्वयाघटितत्वरूपयथाश्रुतेः संभवः। ह्रदो वह्निमान् धूमादित्यादौ वह्नित्व
विशिष्टविषयकनिश्चयविशिष्टवह्न्यभाववद्ध्रदत्वविशिष्टविषयकनिश्चयत्वस्यापि प्रकृतानुमिति[illegible]प्रतिबंधकतानतिरिक्तवृ
८ त्तित्वेन वह्न्यभाववद्ध्रदे तादृशविशिष्टद्वयाघटितत्वाभावात्। न चैवं यादृशविशिष्टविषयितायामनुमितिप्रतिबंधकतानतिरिक्तवृत्ति च
त्वे हेयं तथा च वह्न्यभाववद्ध्रदत्वादिविशिष्टविषयितानतादृशीति नासंभव इति वाच्यं। ह्रदो वह्निमान् वह्न्यभाववज्जलत्वादिमद्वृ
त्तिजलाभावादित्यादौ तादृशविशिष्टजलवद्ध्रदात्मकस्वरूपासिद्ध्यावासितादवस्थ्यात्। यानावज्ञानवैशिष्ट्यावच्छिन्नप्रतिबं
धकतावच्छेदकेनासंभववारणसंभवात् नवत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यानतिरिक्तवृत्तित्वं यादृशवि

अत्रापि नरमविषयितायां प्रतिबंधकतातिरिक्तवृत्तित्वं इहाप्यनुसंधेयमतो नोक्तदोषः =५

तादृशं

ग॰टी॰सा॰ शिष्टविषयकनिश्चयविशिष्टयो यादृशविशिष्टविषयकनिश्चयत्वं तादृशविशिष्टहृयघटितं [redacted] यघत्त्वेन तदन्यत्वं दोषता
५६ वच्छेदके निवेश्यमिति नोक्ताव्याप्तिः तादृशनिश्चयविशिष्टनिश्चयत्वस्य तादृशप्रतिबंधकतासामान्यांतर्गतत्वासिद्धिर्ज्ञान
96 प्रतिबंधकतानतिरिक्तवृत्तित्वाभावादिति वाच्यम् तथासति हृदो वह्निमान् धूमादित्यादौ निरुक्तविशिष्टघटकीभूतता
दृशापरविशिष्टविषयकनिर्विषयकनिश्चयविशिष्टप्रथमयादृशविशिष्टविषयकनिश्चयत्वस्यापि निरुक्ततादृशविशि
ग॰५ ष्टविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यांतर्गतया विनिगमनाविरहेणोक्तौ विषयकनिश्चयविशिष्टप्रथमयादृशविशि यो द्वितीय यादृशविशि ष्ट ५ हृयं
ष्टविषयकनिश्चयत्वावच्छिन्नप्रतिबंधकताया अनतिरिक्तवृत्तित्वविरहेण तादृशविशिष्टघटितत्वावच्छेदकस्य पदा
र्थाप्रसिद्ध्या दोषतावच्छेदके तदन्यत्वस्य निवेशयितुमशक्यत्वात् । अत्र वदंति । स्वावच्छिन्नविषयकत्वावच्छिन्नप्रति
बंधकतासामान्यानतिरिक्तवृत्ति [redacted] विषयिताकान्तत्वेन यादृशविशिष्टहृयं विशेष्ययादृशविशिष्टविषयकनिश्च
यत्वविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यानतिरिक्तवृत्ति
तादृशविशिष्टहृयघटितत्वावच्छेदकं यघत्त्वं तदन्यत्वं दोषतावच्छेदके निवेश्यमिति न दोषः । तादृशनिश्चयत्ववि
शिष्टनिश्चयत्वे स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यानतिरिक्तवृत्तित्वनिवेशान्न प्रागुक्तस्वरूपासि

यो द्वितीयादृशविशिष्टविषयकनिश्चयविशिष्टतादृ८

ह्यादावव्याप्तिः निश्चयत्वविशिष्टनिश्चयत्वनिवेशान्न प्रागुक्तविशिष्टद्वयघटितत्वावच्छेदकस्वपदार्थाप्रसिद्धिनिबं
धनो दोषः। निरुक्तस्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यानतिरिक्तवृत्तिविषयिताकान्यत्वस्य प्र
थमं यादृशविशिष्टे निवेशान्नासंभवः। प्रतियोगित्वाभाववद्धूमवान् वह्नेरित्यादौ वह्निमद्वृत्त्यभावप्रतियोगित्वविशिष्टधूमे प्रतियो
गित्वविशिष्टधूमघटितेऽव्याप्तिवारणाय द्वितीयेपि यादृशविशिष्टेन तु पादानं वोध्यं। अत्रोभयत्रान्यत्वांतदले प्रतिबंधकतासामान्य
निवेशाद्वह्निमज्जलवत्कालीनह्रदो वह्निमान् जलाभावादित्यादौ वह्न्यभाववज्जलवद्वृत्ति[illegible]जलवद्ध्रदादौ नातिव्याप्तिः। ह्रदो वह्निमा
न् अवृत्तिजलादित्यादौ वह्न्यभाववज्जलवद्विषयकनिश्चयत्वविशिष्टवृत्तिजलवद्ध्रदविषयकनिश्चयत्वस्य स्वावच्छिन्नविषयक य
त्वावच्छिन्नप्रतिबंधकतासामान्यानतिरिक्तवृत्तितया तादृशविशिष्टद्वयघटितत्वावच्छेदकमेव वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रद ल५
त्वमिति न तदवच्छिन्नेऽतिव्याप्तिः। न च ह्रदत्वावच्छेदेन जलघटितेव वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदे पक्षे वह्नेः साधने वह्न्यभा
ववत्तादृशह्रदासकेवाधेऽव्याप्तिः तद्घटकपक्षस्य दर्शितविशेषणाक्रांतेवज्जलवद्रूपत्वावच्छेदेन जलवत्त्वरूपविशिष्टद्वय वह्न्यभाववद्
घटितत्वादिति वाच्यं। तादृशवाधस्यालक्ष्यत्वात् अन्यथा वक्ष्यमाणविशिष्टांतराघटितत्वाव्याप्तेः। अत्र यादृशविशिष्टद्वयघ
टितत्वेनाभिमतस्वावच्छिन्नविषयकत्वाव्यापकविषयिताशून्यत्वमेव यादृशविशिष्टद्वयैकनिश्चये निवेश्यमिति नासंभवः विषय

हृदे२

विशिष्टान्यत्वं धूमवत्ताज्ञानप्रतिबंधकतायाश्च ५

तिध्येयं। अपरे तु यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रकृतानुमितिप्रतिबंधकताविशिष्टा
न्यज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टद्वयावृत्तित्वमर्थः प्रतिबंधकतावैशिष्ट्यं स्व[illegible]व्यापकत्व
स्वभिन्नत्वोभयसंबंधेन तत्तज्ज्ञानवैशिष्ट्यावच्छिन्नत्वस्य प्रतिबंधकताविशेषणत्वान्न वह्न्यभाववद्ध्रदादावसंभवः। न च बाध
निश्चये धूमवत्ताज्ञानप्रतिबंधकतामादाय न प्रतिबंधकताविशिष्टान्यत्वसंभव इति तद्द्वयं व्यर्थमिति वाच्यं। वह्न्यभाववज्जलादि
मद्वृत्तिजलवद्ध्रदादिज्ञानेषु वह्निमत्ताज्ञानप्रतिबंधकताया न धूमवत्ताज्ञानप्रतिबंधकतायां [illegible] वह्निमत्ताज्ञानप्रतिबंधकताविशि संधूमवत्ताज्ञा नप्रतिबंधकताया
विष ष्टान्यत्वेपि यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वस्य न तदनतिरिक्तवृत्तित्वमिति शिष्टद्वयावृत्ति वि
त्वस्याकिंचित्करत्वमिति ज्ञानवैशिष्ट्यानवच्छिन्नापाभेदप्रतियोगिप्रविष्टप्रतिबंधकतापादुपादानात्। निरुक्तोभयसंबंधे
न प्रतिबंधकताविशिष्टान्यत्वस्य प्रतिबंधकतायां निवेशान्न स्वरूपासिद्ध्यादावव्याप्तिः। न च वह्न्यभाववज्जलादि[illegible]द्विषयक म
निश्चयविशिष्टजलवद्ध्रदत्वविशिष्टविषयकनिश्चयीयजलवद्ध्रदघटकपदार्थविषयितापां विशेष्यविशेषणभावे विनिगमना
विरहेण प्राप्तानां समनियतप्रतिबंधकतानां परस्परभिन्नानां निरुक्तोभयसंबंधेन परस्परवैशिष्ट्यान्न तदन्यत्वमिति वाच्यं। स्व
भिन्नत्वमपहाय स्वव्यापकत्वस्वाभाववद्वृत्तित्वोभयसंबंधेन प्रतिबंधकतावैशिष्ट्यप्रवेशेन तत्र प्रतिबंधकतानां परस्परभिन्ना

५ तदन्यत्वरूपतानवैशिष्ट्यानवच्छिन्नत्वनिवेशे निर्वाहात्प्रकारांतरं वक्ष्यामः ५

नामपिपरस्पराभावसामानाधिकरण्यविरहादेव निरुक्तप्रतिबंधकताविशिष्टान्यत्वात्। न च तथापि ह्रदो घटाभाववद्धूमव
व त्कालीनधूमवान् घटवद्भूमौ वत्त्वादित्यादौ यत्र प्रतियोगिता संबंधेन धूमवत्त्वावच्छेदेन घटाभावस्य साध्यतावच्छेदक
घटकत्वं तत्राभावत्वावच्छेदेन संयोगसंबंधेन घटस्य हेतुतावच्छेदक घटकत्वं तत्र हेतुघटकतयाऽभावत्वावच्छेदेन घटा
वगाहिज्ञानप्रतिबंधकतानतिरिक्तवृत्तिविषयिताके घटाभाववद्धूमवत्कालीनधूमाभाववाधैकदेशेऽतिव्याप्तिः। हेतुघटक
तयाऽभावांशे घटाद्यवगाहित्वावच्छिन्ननिरूपितप्रतिबंधकतायां निरुक्तोभयसंबंधेन बाधज्ञानप्रतिबंधकताविशिष्टत्व
मेवेति तदन्यत्वविरहादिति वाच्यम्। निरुक्तोभयसंबंधेन स्वावच्छिन्नविषयकत्वानतिरिक्तवृत्तिकप्रतिबंधकताविशिष्टान्य
ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानतिरिक्तवृत्तिया यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चय
त्वं तादृशविशिष्टरूपाविषयकप्रतीतिविषयत्वानवच्छेदकं यत्त्वं तदन्यत्वस्य विवक्षितत्वात्। उक्तबाधज्ञानप्रतिबंधकता
विष तु न तादृशसाध्याभावरूपविशिष्टविषयकत्वानतिरिक्तवृत्तिकेत्याहुः। अत्रेदं बोध्यं। यादृशविशिष्टविषयकनिश्चयविशिष्ट
स्वविषयिताशून्ययादृशविशिष्टविषयकनिश्चयत्वमनुमितिप्रतिबंधकतानतिरिक्तवृत्तिता तादृशविशिष्टरूपाघटितत्वम
र्थः। स्वविषयिताशून्यत्वोपादानान्न ह्रदत्वादिविशिष्टविषयकनिश्चयविशिष्टधूमाभाववद्ध्रदत्वविशिष्टविषयकनिश्चयत्व

का॰ नाप्युक्तस्थले धूमवत्ताज्ञानप्रतिबंधकतावच्छिन्नभाववत्त्व विष वह्निज्ञानवद्धूमादिविषयकत्वव्यापि २

ग०टी०सा० मादायासंभवः॥ अथाद्दृस्यभावकालीनपर्वतो धूमवान् प्रतियोगित्वानिरूपितावच्छेदकत्वकालीनवह्नेरित्यादौ पक्षसाधना
५८ प्रसिद्धिघटितसाध्यतावच्छेदकनिष्ठव्यभिचारेऽव्याप्तिः तादृशव्यभिचारविषयिताशून्यस्याश्रयासिद्ध्यादिनिश्चयस्य तादृशव्य
98 भिचारनिश्चयविशिष्टस्यापि प्रतिबंधकत्वादिति चेन्न। स्वावच्छिन्नावृत्तितद्रूपावच्छिन्नविषयिताशालिनिश्चयविशिष्टयद्रू
पावच्छिन्नावृत्तित्वस्वावच्छिन्नविषयिताशालिनिश्चयत्वं तादृशं स्वावच्छिन्नविषयित्वतद्रूपावच्छिन्नविषयितोभयसंबन्धत्वस्या
भिप्रेतत्वात्। परं तु वह्नित्ववभावप्रतियोगितानिरूपितत्वविशिष्टावच्छेदकत्वं चासिद्धिः परस्परविषयिताशून्यपरस्परनिश्चय
विषयविशिष्टतद्द्वयघटितत्वाद्दर्शितव्यभिचारेऽव्याप्तिर्दुर्वारैवेति [illegible] एवं च मेयत्वविशिष्टवह्न्यभाववद्ह्रदत्वविशिष्ट
वद्धभाव विषयकनिश्चयविशिष्टवह्निर [illegible] द्व
[illegible] घटितत्वेनेत्यपास्तं विशिष्टांतराघटितत्वं [illegible] निश्चय [illegible] स्वविषयिताशून्यत्वं विशेषणं। न च विशेष मेव अप
गुणवद्ह्रदा [illegible] श्रयासिद्ध्याव्याप्तिः विशेषगुणावद्ह्रदविषयकनिश्चयविशिष्टस्य विशेषगुणावद्विषयिताशून्यगुणवद्ह्रद
प२ घर विषयकनिश्चयस्यानुमितिप्रतिबंधकतया तादृशविशिष्टद्वयघटितत्वादिति वाच्यम्। तन्मते तस्य विशिष्टांतराघटितत्वरक्षणा
ययत्किंचित्प्रतिबंधकतामादाय लक्षणसमन्वयेनैव तन्मतेऽपि किंचित्प्रतिबंधकत्वस्यैव विशिष्टद्वयाघटितत्वशरीरे प्रविष्ट

वस्तुतस्तु वह्नित्ववदभावः प्रतियोगितानिरूपितत्वविशिष्टावच्छेदकत्वं चासिद्धिः परस्परविषयिताशून्यपरस्परनिश्चयविषयविशिष्टद्वयघ
टितत्वाद्दर्शितव्यभिचारेऽव्याप्तिर्दुर्वारैव। मानः

तयाऽव्याप्यसंभवात् । तथाच यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वव्यापकं स्वव्यापकत्वस्वा
भाववद्वृत्तित्वोभयसंबंधेन प्रतिबंधकता विशिष्टान्यप्रकृतानुमितिप्रतिबंधकत्वं तादृशविशिष्टद्वयाघटितत्वं विवक्षितं एवं चादृ
त्स्वभावकालीनेसारावप्यव्याप्तिपरिहारो द्रष्टव्यः । एवं च ह्रदो वह्निमान् वह्न्यभाववज्जलवद्वृत्तिजलाभावादि स्यादेः ह्रदो वह्न्यभा
ववज्जलवद्वृत्तिजलवानिति स्वरूपासिद्धिनिश्चये यादृशे तु मत्ताग्रहप्रतिबंधकता सा न विशिष्टनिश्चयत्वव्यापिका । ह्रदो जलवानि ताद२४
तिज्ञानेऽसत्त्वात् । साध्यवत्ताग्रहप्रतिबंधकताच स्वव्यापकत्वस्वाभाववद्वृत्तित्वोभयसंबंधं न हेतुमत्ताग्रहप्रतिबंधकताविशिष्टैवे
[redacted] तिस्वरूपासिद्ध्यादिसंग्रहसंभवे पूर्वोक्तप्रयासोऽनादेयः ताद२१
अथ तत्रैव [redacted] वह्न्यभाववज्जलवत्कालीनजलवद्ह्रदादेः [redacted]
[redacted] वारणीयवह्न्यभाववज्जलादिमद्वृत्तिजलवद्ह्रदघटितदोषो [redacted] ति यथा
[redacted] यत्र घटकालीनवह्न्यभाववज्जलादिमद्वृत्तिजलवद्ह्रदः यत्र वा वह्न्यभाववज्जलादिमद्वृत्तिजलत्वैवलोभयवद्ह्रदस्त्रा
श्रयासिद्ध्यादिस्तत्र साध्यवत्ताग्रहप्रतिबंधकता यो वह्न्यभाववज्जलवद्वृत्तिजलवान् ह्रद इति ज्ञाने प्रकृत [redacted] ग्रहादिप्रतिबंध २
कत्वस्यासत्त्वेन निरुक्तविशिष्टान्यता [redacted] भावो [redacted] भेदप्रतियोगितावच्छेदकप्रतिबंधकतायां सावच्छिन्नविषयकत्वावच्छि
प्रतिरूपतिः एवं ५ पक्ष२ ब
द्व्याप्तिपरिहेपि न ह्रदो वह्न्यभाववज्जलवद्वृत्तिजलवान् ह्रद इति प्रतीतिः एवं

गा०टी०सा०
८८
११

न्नत्वोपादानात्[redacted]हिमानिसाध्यवद्गुं [redacted]त्यादि:। एवंवह्न्यभाववज्जलत्वादिमत्कालीनह्रदो वह्निमानित्यादौ

वह्न्यभाववज्जलवत्ताद्वृत्तिजलत्वविशिष्टतादृशह्रदेऽतिव्याप्तिः। [redacted]तादृशह्रदो जलत्ववानिति ज्ञानस्य स्वविषयिताश्रयान्यत्वाभावादि

त्यपि न शंक्यं जलत्वविशिष्टतादृशह्रदरूपविशिष्टविषयकनिश्चयविशिष्टवह्न्यभाववज्जलत्ववद्रूपविशिष्टविषयकत्वविषयिताश्रयान्य विष

नि निश्चयमादायतत्रापि विशिष्टद्वयघटितत्वादिति दिक्। परे तु ईदृशविशिष्टद्वयाघटितत्वनिवेशेऽसंभवः वह्न्यभाववद्ध्रदवत्तादृशमादाय उक्तरीत्या

वैवह्न्यभाववद्ध्रदादिनिश्चयविशिष्टवह्न्यभाववन्निश्चयस्य ह्रदानुमितिप्रतिबंधकतानतिरिक्तवृत्तित्वाभावात् एवं विशिष्ट

यघटितत्वात् तादृशबाधस्य साध्याभाववन्निष्ठताप्रतिबंधकत्वाभावरूपत्वाभावात् वह्न्यभाववन्निश्चयविशिष्टदोषता नैव

त्साध्यमभावः प्रभृति ज्ञानेऽवच्छेदकतानेनैव चेत्कासंभवादिति मैवं प्रकृतानुमितिप्रतिबंधकतातिरिक्तवृत्तित्वावच्छि अतः

न्नविषयिताकयादृशधर्मावच्छिन्नविषयकनिश्चयविशिष्टतादृशविषयिताकयादृशधर्मावच्छिन्नविषयकनिश्चयत्वं प्रकृ

तानुमितिप्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टद्वयघटितविशिष्टाघटितत्वं स्वावि विशितं [redacted] स्वावच्छिन्नविषयिताक

वि त्वविरहान्नासंभवो वह्न्यभाववज्जलत्ववद्ध्रदत्निजलत्ववद्ध्रदे च तादृशविशिष्टद्वयघटितत्वान्नातिव्याप्तिः। वह्न्यभाववद्ध्रदादेः प्रतिबंध ग्रासवद्

कतानतिरिक्तवृत्तिज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतातिरिक्तवृत्ति [redacted]त्वेन विशिष्टविशेषणाद्वह्न्यभाववज्जलत्ववद्ध्रदवन्ति

विषयिताकत्वात्

त्वेन तादृशविशिष्टद्वयविषयताति था यता दृशं

विशिष्टवि[redacted] वयिता।

जलवदात्मकासिद्धिसंग्रहः। नबाबाधविशिष्टव्यभिचारादौ वक्ष्यमाणत्वाद्व्याप्यसंगतिरिति वह्निमज्जलवत्कालीनह्रदादेः प
क्षत्वेवह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदादिकं विशिष्टान्तराघटितत्वदानाद्धारणीयं। नचैवं तादृशविशिष्टान्तराघटितत्वं प्रवेश्यं तादृश
[illegible]कृतं [illegible]तादृशविशिष्टद्वयाघटितत्वेनेति वाच्यं। वह्न्यभाववज्जलेत्यादिघटकजलवद्ध्रदादिपक्षकबाधादावसाधारण्ये चाव्याप्ते
रित्याहुः। केचित्तु यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रतिबंधकतायाः स्वरूपसंबंधरूपावच्छे
दकतावदित्येव विवक्षितमिति नासंभवः। अनाहार्यज्ञानवृत्तित्वविशिष्टयादृशविशिष्टविषयिताद्वयसामान्य[illegible]
निश्चयत्वांत [illegible]तान्यतरदित्याहुः। अथैवमपि अभावो वह्निमान्नित्यादौ संयोगेन वह्नेः साध्यतायां वह्न्यभाववद्वह्निमत्स्वरूपविशिष्टेऽतिव्याप्तिः प्र
तियोगितासंबंधेन वह्न्यवच्छेदेन वह्न्यभावनिश्चयकालीनस्याभावधर्मिकवह्निमत्तानिश्चयस्याभावत्वावच्छिन्नविशेष्यकवह्निमत्ताबु
द्धिप्रतिबंधकतया वह्निमान्वह्न्यभाववानिति ज्ञानस्य नियमेनाभावत्वावच्छिन्नप्रतियोगितासंबंधेन वह्निप्रकारकत्वेन विरोधित्वात्तद्वि
षयविशिष्टविषयितायाः प्रतिबंधकतानतिरिक्तवृत्तित्वात्। वह्निमदभाववद्वह्न्यभाववद्वह्निमदात्मकविशिष्टद्वयघटितत्वं तु न शंक्यं तत्र
लाघवेन वह्न्यवच्छेदेन वह्न्यभाववत्तानिश्चयत्वेनैव ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतास्वीकारान्न तु तादृशनिश्चयविशिष्टनिश्चय
त्वेन वह्न्यवच्छेदेन वह्न्यभाववत्तानिश्चयस्यैवाभावेऽपि प्रतियोगितासंबंधेन वह्निनिश्चयत्वात् तादृशविशिष्टेनिष्कृष्टविशिष्टान्तराघटित

इति नि[illegible]विशिष्टद्वयाघटितत्वात्.१

वच्छेदकमनिवेश्यविशेष्यता

गृ०टि०सा० त्वसत्त्वाच्चेति चेन्न। तत्रापि बाधविभाजकसत्त्वेन बाधत्वात् तल्लक्ष्यत्वे एतत्प्रतिबंधकताभेदं निवेश्योभयाभावः परिष्कार्यः। परे तु लाघवा

१०० दवच्छेदकधर्मदर्शनस्यापि धर्मितावच्छेदकताप्रत्यासत्त्यैव प्रतिबंधकत्वं कल्प्यते इत्थं चान्यधर्मिकस्थले स्फुटप्रतिबंधकतयैवोपप

धकत्वं त्तौ नाभावधर्मिकस्थले ज्ञाने वैशिष्ट्यानवच्छिन्नं प्रतिवं तरमविकल्पने प्रयोजनाभावादित्यपि वदंति। अथ मणिकारोक्तलक्षणघटक

100 प्रतिबंधकतायां स्वावच्छिन्नविषयकत्वावच्छिन्नत्वनिवेशाद्विशिष्टद्वयाघटितत्वविशिष्टं तत्राघटितत्वयोर्वैयर्थ्यं तद्वत्तानिरूपिता

वच्छेदकताहृत्तित्वरूपसंबंधरूपावच्छेदकत्वमिति तन्मेयत्वविशिष्टव्यभिचारादावतिप्रसंगः स्यात्। विषयितानिष्ठवह्न्यभाववद्वृ र

त्वनिरूपितावच्छेदकतायां यदि चावच्छेदकताकथं तन्मेयत्वविशिष्टबाधत्वनिरूपितावच्छेदकतायां सेति विशेषाभावात्। अथ

कता मेयत्वविशिष्टबाधत्वपर्याप्तनिरूपकावच्छेदकतात्वं शुद्धबाधत्वावच्छेदकतात्वादन्यत्। एवं च तादृशावच्छेदकतात्वविशिष्ट

त्तित्वनिवेशान्न दोष इति चेन्न। स्वनिरूपितावच्छेदकतात्वे हि दूषेन वह्निमानितिभ्रमविषयितासाधारणावच्छेदकतात्वादस्य

त्वेनावच्छेदकतातदन्यत्वे च मेयत्वविशिष्टबाधत्वावच्छेदकतात्वेप्यवच्छेदकत्वे विशेषात्। अथ गुरुभूततत्तादृशविशिष्ट ६

याघटितत्वमपेक्ष्य लाघवेन प्रतिबंधकतायां स्वावच्छिन्नविषयिताशून्यत्वाहृत्तित्वमेव निवेश्यं। यद्रूपावच्छिन्ने लक्षणं सं

गमनीयं तद्रूपस्यैव स्वपदेनोपादेयतया स्वं वह्न्यभाववज्जलह्रदादिमद्वृत्तिजलवद्ध्रदत्वं तदवच्छिन्नविषयिताशून्ये जलवान्

वह्न्यभाववानिति प्रत्येकज्ञाने प्रतिबंधकतासत्त्वात्तन्नदवच्छिन्नेऽतिव्याप्तिः। न च ह्रदो न वह्निमानिति भ्रमे स्वावच्छिन्नाविषय
स्वावच्छिन्न के प्रतिबंधकतासत्त्वादसंभव इति वाच्यं। ~~[illegible]~~ विषयिताशून्यप्रमाद्वृत्तित्वाभाववत्प्रतिबंधकत्वं यादृशविशिष्टवि
षयिताव्यापकं तादृशविशिष्टत्वस्य वाच्यत्वात्। प्रमात्वं च भ्रमान्यत्वं एवं च विशिष्टांतराघटितत्वमपि तत्रेयं प्रयोजनाभावात् भ्रमे
वमाप्रकृतानुमित्यप्रतिबंधकत्वपक्षधर्मताज्ञानकालीनत्वोभयाभावः प्रतिबंधकत्वांतार्थो दर्शयिष्यते तत्र च यादृशविशिष्टविष
यिताशून्यप्रमाद्वृत्तित्वाभावो न निवेशयितुं शक्यते तस्य तादृशोदासीनप्रमाद्वृत्तित्वादिसंभवापत्तेः। यत्र वह्न्यभाववत्तच्छैवा
लवान् ह्रद इत्याकारकमेवावच्छेदकधर्मदर्शनं न तु तच्छैवालवान् वह्न्यभाववानित्याद्याकारक[illegible]द्वयात्मकमपि तत्रैप्र प्रमा
तिबंधकतायां समनैयत्योपादानेऽप्यतिव्याप्तेश्च। तेनेदं लक्षणांतरं मथुरानाथेन प्रतिबंधकतायां स्वावच्छिन्नानिरूपि
तविशिष्टविषयितानवच्छिन्नत्वविशेषणेन लघुप्रकारस्य दर्शितत्वादिति परास्तं। इदं तु बोध्यं अप्रा[illegible]माण्यस्यानुगतत्वे
न तत्तदप्रामाण्यज्ञानाभाव एव निवेशः तथा च वह्न्यभाववज्जलादिमत्सदार्थीयाप्रामाण्यज्ञानस्यानिवेशात्तादृशविशिष्टेऽ भावा
तिव्याप्तिस्तद्विषयकत्वस्य प्रतिबंधकताशून्यैतदप्रामाण्यज्ञानकालीनज्ञाने सत्त्वादिति विशिष्टद्वयाघ[illegible]टितत्वं व्यर्थं। न च
यादृशस्थले अप्रामाण्यज्ञानं न कदापि जातं तत्रैव दोष इति[illegible]तन्नास्थैर्यं वाच्यं तादृशस्थले[illegible]मानाभावात्। अत्रेदं समाधा

तच्छैवालवत्त्वादिनापदार्थांतरावगाहिविशिष्टस्य तत्र प्रसक्तावारणाय न वैशिष्ट्यावच्छिन्नप्रतिबंधकताया आवश्यकत्वात् ६

ग·टि·सा· नंवह्न्यभाववज्जलत्वादिमद्वृत्तिजलत्वादिमद्ध्रदरूपाश्रयासिद्धिसंग्रहाय तन्नत्यद्धार्थीयाप्रामाण्यग्रहाभावनिवेशावश्यंभा
१०१ ल वेतन्नैव वह्न्यभाववज्जलत्वकालीनजवद्ध्रदेश्राश्रयासिद्ध्यात्मकेऽतिव्याप्तेरपरीहारात् तथाऽनेन दोषघटकविषयाप्रा
101 माण्यग्रहाभावानां निश्चयांशे विशेषणत्वेउक्तविशिष्टघटकविषयाप्रामाण्यग्रहाभावस्यानिवेशेनैतादृशाप्रामाण्य
ग्रहकल्पितनिश्चयांशे विशेषणतयाप्रविष्टाप्रामाण्यग्रहाभावस्यसत्वात् तादृशाप्रामाण्यानग्रहाभावविशिष्टोक्तविषयकत्व
स्यप्रतिबंधकतानतिरिक्तवृत्तित्वान्नातिव्याप्तिरिति वाच्यं शाभावर्णं परास्तं वह्न्यभाववज्जलत्वकालीनजलत्वाभावव[illegible]तिना
का २ दृशजलधर्मैकसज्ज्ञानस्योत्तेजकत्वासंभवेन तत्र तत्सत्त्वेपि प्रतिबंधकत्वाव्याघातात्। यद्रूपविशिष्टघटकविषयीयाप्रामा
ण्यग्रहाभावविशिष्टनिश्चयवृत्तियद्रूपावच्छिन्नविषयकत्वं प्रतिबंधकतानतिरिक्तवृत्तितद्रूपावच्छिन्नस्यैव शरीरैक्यानु
रोधेन निवेश्यत्वात्। वस्तुतो यादृशपक्षवृत्तकविषयघटिताप्रामाण्यमात्रज्ञानाभावस्यानिवेशासंभवात्। वस्तुतस्त्वनुगतरू
पेणैवाप्रामाण्यग्रहाभावस्य सामान्यतो निरुक्तो निवेश्यत्वपाविशिष्टद्वयाघटितत्वं सार्थकमेवेति। सत्प्रतिपक्षेति। अत्र निरु
क्तविशिष्टद्वयविषयितायां सत्प्रतिपक्षघटकतादृशविशिष्टद्वयविशिष्टद्वयविषयितानिष्ठद्वित्वावच्छिन्नभेदनिवे
शे सत्प्रतिपक्षघटकद्वयविषयितयोः प्रत्येकं तादृशविषयितानिष्ठद्वित्वावच्छिन्नभेदस्य तेनोक्ताव्याप्तिवारणासंभवः

।यदि च तादृशविषयितानिष्ठतन्त्वव्यक्तित्वावच्छिन्नप्रतियोगिताकभेदद्वयं निवेश्य तेन दाजलवह्न्दस्य सप्रतिपक्षघटकत
यातद्विषयितायां निरुक्तभेदद्वयासत्त्वेन तादृशविषयिताभिन्नविषयिताकविशिष्टद्वयाघटितत्वस्य सत्त्वेन वह्न्यभाववज्ज
ल त्वादिमद्वृत्तिजल[redacted]वह्न्द्यादावतिव्याप्तिरतो हित्वावच्छिन्नेहित्वावच्छिन्नभेदो निवेश्यः।एवं च सत्प्रतिपक्षघटकविशिष्टविषयि
ताद्वयेतादृशाहित्वावच्छिन्नभेदो नास्तीति नाव्याप्तिः। तद्घटकविषयिताद्वयत्वावच्छेदेन तादृशहित्वावच्छिन्नभेदसत्त्वा
न्न वह्न्यभाववज्जलत्वादिमद्वृत्तिजलवह्न्द्यादावतिव्याप्तिः। इदं च तत्र विद्यमानपदानुरोधेन। वस्तुतस्तु तादृशैकतरविशिष्टविष
यितायां हित्वोपलक्षितायां भेदद्वयनिवेशेऽपि सामञ्जस्यं सत्प्रतिपक्षघटकविशिष्टद्वयविषयिताद्वयातिरिक्तघटितत्वं [redacted]त
इत्यर्थ[redacted]। सत्प्रतिपक्षीयैकतरविषयितायामपि तादृशभेदद्वयासत्त्वेन तत्संग्रहसंभवात्। पूर्वोक्तैकतरवह्न्यभाववज्जलत्ववद्वि
षयितायां जलव्यापकवह्न्यभावकालीनघटिते कालीनजलवह्न्द्विषयितायां च तादृशभेदद्वयसत्त्वे नैव च वारणमिति
यादृशी ।यद्यपि यादृशेत्यनेन सत्प्रतिपक्षघटकदलद्वयस्यैवोपात्ततया सत्प्रतिपक्षघटकविषयितो हित्वावच्छिन्नभिन्नतादृशता निष्ठ
दृशविषयिताद्वयत्वावच्छिन्नाप्रसिद्धिः सत्प्रतिपक्षघटकदलद्वयविषयिताद्वयातिरिक्तघटितत्तादृशतादृशविषयिताद्व
याप्रसिद्धिश्च न शक्यते वारयितुं तथापि तादृशहित्वावच्छिन्नभिन्नत्वानुयोगितावच्छेदकहित्वेन स्वनिष्ठतादृशविषयिताद्व

तं क्र १ यातिरिक्तघटितविषयिताद्व १

अ०टी०सा० यद्घटकत्वेन वा प्रत्येकं यादृशविषयितयोरुपादानात्सामंजस्यं। ननु पर्वतो धूमवान् वह्नेरित्यादौ वह्निर्धूमव्याप्य इत्यादिग्रहं प्र
१०२ तिअयोगोलकीयतेजो धूमव्यभिचारि वह्निश्चायोगोलकतेज इति ज्ञानद्वयस्य प्रतिबंधकतया धूमव्यभिचारि अयोगो[illegible]ल
कीयतेजो नेति अयोगोलकीयतेजस्त्ववद्वह्न्याद्यावृत्तिव्याप्तिः तद्वारणायोक्तविशिष्टद्वयाघटितत्वनिवेशे सत्प्रतिपक्षाप्र
102 प्रसिद्ध्या तत्र स्वदोषाभावापत्तिप्रसंगश्च तत्राह यद्वेति। ननु तत्र सत्प्रतिपक्षाप्रसिद्धावपि सामान्यतः सत्प्रतिपक्षघटकदलद्वय
भिन्नत्वस्यैव निवेश्यतया ह्रदादिपक्षकवह्न्यादिसाध्यकधूमादिहेतुकस्थलीयसत्प्रतिपक्षघटकदलद्वयभिन्नत्वस्य
सत्त्वान्निरुक्तानुपादानकथनमसंगतं। न च सत्प्रतिपक्षे प्रकृतत्वमावश्यकमन्यथा ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभाववज्
ज्जलवद्वृत्तिजलवद्ह्रदेऽतिव्याप्तेः। वह्न्यभाववज्जलवद्वृत्तित्वत्वद्ह्रदपक्षकसत्प्रतिपक्षघटकदलद्वयभिन्नत्वस्य तद्घ
टकविशिष्टद्वयेऽसत्त्वादिति वाच्यम्। प्रकृतत्वोपादाने विनिरुक्तविशिष्टघटकपक्षकस्थले स्वीयसत्प्रतिपक्षघटकदल
द्वयभिन्नत्वस्य तद्घटकविशिष्टद्वयेऽसत्त्वान्निरुक्तविशिष्टेऽतिव्याप्तेस्तद्वारणाय प्रतिहेतुव्यापकसाध्याभावप्रतिहे
तुमत्पक्षरूपो न पक्षेवदलद्वयं तेन विवक्षणीयतया दोषादिति प्रकृतत्वनिवेशपर्थ्यादिति चेत्। अत्राहुः। ह्रदो जलवद् मे९१२
भाववान् ह्रदत्वादित्यादौ जलव्यापकसमानाधिकरण जलवद्ह्रदः सत्प्रतिपक्षः। एवं च ह्रदः जलव्यापकत्वाभाववान् ते
९
जलेनवत्१

वान्नादिस्यादौ जलत्वव्यापकजलत्ववद्वृत्तिजलत्ववद्भेदः। निव्याप्तिवारणाय सत्प्रतिपक्षे प्रकृतत्वस्यावश्यकत्वादिति। प्रमात्मके
ति। प्रतिहेतुव्यापकत्वविषयितानिरूपितसाध्याभाववत्त्वावच्छिन्नविषयितात्वेन निवेश्यैव भेदो निवेश्य इति भावः। हेतुनाव
च्छेदकाघटितस्येति। साध्याभावाभाववद्वृत्तिर्मत्वतावच्छेदकावच्छिन्नएव सत्प्रतिपक्षो दोषः। व्याप्तिविशिष्टवैशिष्ट्याव
च्छिन्नविषयितायाः ज्ञाने वैशिष्ट्यानवच्छिन्नप्रतिबंधकतावच्छेदकत्वात् न तु साध्याभावाभाववद्वृत्तिजलत्ववद्ह्रदत्वावच्छि
न्नः यथाश्रुतनिष्कृष्टोभयविधविशिष्टांतराघटितत्वाभावात्। एवं तद्विषयकज्ञानस्य प्रतिबंधकत्वेपि तद्विषयस्य दोषत्वं नो
पपाद्यते जलं वह्न्यभावव्याप्यं जलवान् ह्रद इत्याकारकज्ञाने वैशिष्ट्यावच्छिन्नप्रतिबंधकतावच्छेदकविषयिताकत्वाघटितत्वा
त्। यथा जलत्वव्यापकसाध्याभावसमानाधिकरणजलवद्ह्रदज्ञानस्य प्रतिबंधकत्वेपि विषयस्य न दोषत्वं तद्वत्। एवं च व्याप
कसामानाधिकरण्यरूपव्याप्तिघटितेऽलक्ष्यत्वेन स्वयमेव सत्प्रतिपक्षत्वस्य प्रत्याख्यातत्वान्न तत्र ज्ञानवैशिष्ट्यानवच्छि
न्नप्रतिबंधकताघटितलक्षणव्याप्तिः॥ विशिष्टद्वयाघटितत्वं तु न प्रवेश्यं वैयर्थ्यादिति भावः। साध्याभावाभावेत्युपादानं च
बाधस्य साध्याभावघटितत्वेन तेन प्रतियोगितानिरवच्छिन्नात्वादित्याशयावच्छिन्नत्वव्याप्यंतिपोगितापास्तदभाववद वस्य
वृत्तित्वरूपव्याप्तिघटितायाः सत्प्रतिपक्षत्वं साध्यवद्वृत्तित्वघटितस्य तु बाधत्वं बाधग्रंथे दीधितौ व्यक्तं। व्याप्तिनिरिति

न२

गं०टि०सा० तस्यापि सत्प्रतिपक्षघटकदलद्वयभिन्नविशिष्टद्वयाघटितत्वादिति। अत्रेदं चिंत्यते। तदभाववद्वृत्तित्वघटितस्यैव सत्प्रतिपक्ष

१०३ त्वमित्यत्र निर्भरो न युक्तः। घटो गगनवान् मेयत्वादित्यादौ सत्प्रतिपक्षितत्वानापत्तेः तत्र गगनाभावाभावस्य गगनस्याधिकरणाप्रसिन

103 द्धेः नच तत्र सत्प्रतिपक्षाभावे का क्षतिः बाधेनैव दुष्टत्वसंभवादिति वाच्यं। तर्हि सत्प्रतिपक्षस्यैवाभासतानुपपत्तिः बाधव्यभि

चाराद्यन्यतरस्यावश्यकत्वात् तत एव दुष्टताव्यवहारनिर्वाहात्। यदि च बाधाद्यनुपस्थितिदशायां सत्प्रतिपक्षोपस्थित्याप्यनुमि

तिप्रतिबंधात्तस्य दोषत्वे स्वीक्रियते तदोक्तगगनादिसाध्यके व्यापकसामानाधिकरण्यघटितः सत्प्रतिपक्षः संभवन्नपलपितु

मशक्यः युक्तेरविशिष्टत्वात्। तथा चोक्तं उपधेयसंकरेप्युपाधेरसंकरादिति। नच व्यापकसामानाधिकरण्यघटितस्य लक्ष्यत्वो

पगमे जलव्यापकवह्न्यभावकालीनजलवद्ध्रदोवतिव्याप्तिरशक्यपरिहारैवेति तस्यालक्ष्यत्वमिति वाच्यं। सत्प्रतिपक्षघटक

दलद्वयविषयिनान्यकालीनत्वविशिष्टजलवद्ध्रदात्मकविशिष्टविषयितासद्भावेनादोषात्। नच यत्र वह्न्यभाव[redacted]स

देः कालिकादिसंबंधेन जलवद्ध्रदादिविशेषणत्वं तत्रैवमप्यतिव्याप्तिः तत्र कालीनत्वस्याविशेषणत्वादिति वाच्यं। तत्र [redacted]

वज्जलवद्ध्रदरूपद्वितीयविशिष्टस्य सत्प्रतिपक्षाघटकत्व[redacted]सत्त्वादिति। [redacted] पक्षवृत्तित्वाभाववद्गगनस्यापिव अत्र

क्ष्यमाणरीत्याबाधतयानव्याप्यवद्गगनस्य सत्प्रतिपक्षत्वं [redacted]। नहि यो यो बाधस्तद्व्याप्यस्तत्र सत्प्रतिपक्ष इति नियमः उत्त

न६६ इति।र घटित२ संभवात्सामानाधिकरण्यघटितस्य तथात्वं निर्दुष्टं ॥२ जलव्यापक४ वह्न्यभाव३

त्रिकालावच्छिन्नोपरागंधवानित्यादौ बाधसत्त्वेपि तद्व्याप्यसत्प्रतिपक्षासत्त्वादिति। किंच सामानाधिकरण्यघटितस्य कथं
सत्प्रतिपक्षताऽउदासीनविषयितानिरूपकपदार्थघटितस्यापि लक्ष्यत्वे प्रमेयत्वविशिष्टव्यभिचारादेः कथमलक्ष्यता प्रति
हेतुव्यापकसाध्याभावकालीनप्रतिहेतुमत्पक्षव्याहृतिरशक्यास्यादित्युत्तरग्रंथानुपायस्य प्रतिहेतुव्यापकसाध्याभाव
एव दोषः अधिकोद्भावनं तु प्राचां लक्षणसंगमनसूचनायेत्युच्यते नद्यापि तद्ग्रंथासंगतिः स्यात्। तथा च कालीनत्वघटि
लक्ष्य तस्यैव तादृशपदार्थघटिततया सामानाधिकरण्यघटितस्याप्यैतावाउचितत्वेनातिव्याप्तिरिति सत्प्रतिपक्षघटकविशिष्टद्वयवि
षयिताभिन्नत्वविशेषणमसुद्धमेवेत्यभिप्रेत्याविशेषादित्युक्तं न तु कालीनत्वघटितेऽतिव्याप्तिदुर्वारप्रकारस्याभिधानादिति। अत्र देश
वदंति। स्वव्यापकवह्न्यभाववज्जलवद्ध्रद एव सत्प्रतिपक्षः तत्र समानकालीनत्वं सामानाधिकरण्यमन्यद्वा संसर्गः कालीनत्वादि
संसर्गघटितोपि लक्ष्यः प्रकारतया सामानाधिकरण्यादिघटितस्त्वलक्ष्यः। प्रकारतया कालीनत्वघटितस्य लक्ष्यत्वे तद्घटिता
तिपरंपराघटितविशिष्टमात्रस्यैवं लक्ष्यत्वे च सामानाधिकरण्यघटितस्याप्यलक्ष्यतापादनमयुक्तत्वात् एवं च तादृशविशिष्टद्व
यविषयितायां सत्प्रतिपक्षरूपविशिष्टविषयितान्यत्वं प्रवेश्य सत्प्रतिपक्षसंग्रहोपि न जायते संसर्गभेदेन नाभिन्नसत्प्रतिपक्ष
रूपविशिष्टविषयितानामेकतिवेशेऽन्यासंग्रहापातात् ततः संप्रदायसिद्धतत्संग्रहानुरोधेन तद्घटकविशिष्टद्वयाभिधा

लक्ष्यतापातात्तद ३

ग०टि० व्या० नमुचितमेव। एवं च सत्यपि पक्षघटकतद्धटकभिन्नकालीनत्वसामानाधिकरण्यादिप्रकारविशिष्टघटितत्ववारणमिष्टमेवेति साध्या
१०४ भावाभाववद्वृत्तित्वमस्य पक्षस्य सम्मतिपक्षतायां निर्भरोनुचित इति। वस्तुतस्तु योयद्व्याप्यः स दोष एव तत्र साध्याभाववद्वृत्तित्वस्य तद्दत
104 व्याप्तित्वमनंगीकुर्वाणानां व्यापकसामानाधिकरण्यरूपप्रकारघटितस्य दोषतानतुकारीनत्वघटितस्येति निरूप्यनिरूपक
साध्याभाव भावापन्नप्रतिहेतुव्यापकसमानाधिकरणप्रतिहेतुमत्पक्षविषयितानाश्रयत्वविशिष्टद्वयविषयित्वोभयाभावः प्रती
तो निवेश्य इति न सामानाधिकरण्यतरप्रकारघटितेऽतिव्याप्तिः तेन संसर्गघटितस्य बाधानुन्नायकत्वेपि न क्षतिरिति दिक्। प
क्षधर्मताज्ञानं समानकालीनस्यैव साध्यव्यापकीभूताभावप्रतियोगित्ववद्धेतुतावच्छेदकावच्छिन्नहेतुविषयकज्ञानविशिष्टज्ञानत्वे ज्ञानस्य
न साध्यवत्तानुमितिं प्रति प्रतिबंधकत्वेपि पक्षवृत्तित्वाघटितसाध्यव्यापकीभूताभावप्रतियोगीहेतुरेव दोष इत्याशयेन समा
धत्ते। एवमपीति। दर्शितातिप्रसंगवारणाय पक्षाभाववज्जलादिमद्वृत्तिजलत्ववह्नेर्दोषत्वापत्तिप्रसंगवारणाय। पक्षवृत्तित्वाघटितेति। पक्ष दा४
वृत्तित्वघटितस्य तत्संसाधारण्यरूपत्वेऽपि सर्वं पक्षीकृत्य शब्दत्वेन हेतुना गोत्वसाधने तादृशासाधारण्यसंभवेपि गां पक्षीकृत्यास्व धा
पक्षत्व त्वेन हेतुना गोत्वसाधने असाधारण्याप्रसिद्धिः स्यादतः त्वाघटितं कृतमिति बोध्यं। न च तत्रासाधारण्यस्य विशिष्टद्वयाघटि
तत्वसंपादनं व्यर्थं दर्शितातिप्रसंगस्य ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशेनैव वारणसंभवात्। न चासाधारण्येऽव्याप्तिरुक्ते

वेतिवाच्यं।ज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयितानवच्छिन्नत्वोभयाभावस्यप्रतिबंधकतायांनिवेशनीयत्वात्।एवं
चयादृशसाध्यहेतुकस्थलेऽसाधारण्यमप्रसिद्धंतत्रज्ञानवैशिष्ट्यानवच्छिन्नत्वमात्रमुपादेयंननूक्तोभयाभाववत्वंप्रयोजकता
२८ भावास्साध्यहेतुभेदेनलक्षणभेदध्रौव्येभेदमात्रस्याकिंचित्करत्वात्।विशिष्टासाधारण्यविषयितामनिवेश्यवाऽसाधारण्य
घटकपदार्थानांनिरूप्यनिरूपकभावापन्नविषयितोपादानेनादोषात्।युक्तंचैतत्।विशिष्टद्वयाघटितत्वनिवेशेहृदोवह्नि
मानधूमादित्यादौजलत्वव्यापकसाध्याभावेऽतिव्याप्तेः।प्रतिहेतुमत्पक्षविषयानिहेतुसाध्यविषयकनिर्णयविशिष्टप्रतिहेतु
व्यापकसाध्याभावनिर्णयत्वेनप्रतिबंधकत्वात्।नचमवन्मतेप्रतिहेतुव्यापकसाध्याभाववद्वृत्तिप्रतिहेतुस्वरूपेसत्प्रति म
पक्षेऽव्याप्तिरितिवाच्यं।साध्याभावाभाववद्वृत्तित्वरूपव्याप्तिघटितस्यैवसत्प्रतिपक्षतापानिश्चितत्वेनव्यापकसामाना
धिकरण्यघटितस्यतस्याग्राह्यतायाग्रंथकृदभिमतत्वादिति।नवहेतुमत्पक्षेऽतिव्याप्तिः।असाधारण्यस्थलेविनिगमना
विरहात्असाधारण्यविषयकनिर्णयविशिष्टहेतुमत्पक्षविषयकनिर्णयत्वेनापिप्रतिबंधकतयातस्यप्रतिबंधकतायाअ
साधारण्यविषयित्वावच्छिन्नत्वादितिवाच्यम्।पक्षरूपावच्छिन्नविषयिताव्यापकस्योक्तोभयाभावविशेषितप्रतिबंधकत्वा
भावपक्षधर्मताज्ञानकालीनत्वोभयाभावस्यैवासाधारण्यसाधारणप्रकारस्यादरणीयतयाऽविशिष्टहेतुमत्पक्षज्ञानेउभ
याभावासत्वात्।प्रतिहेतुव्यापकसाध्याभावेपाषाणमयपर्वतेच प्रतिबंधकतायांज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयितानवच्छिन्नत्वो

४ यत्र तत्र महद्दूरकप्रतिबंधकतायां ज्ञानवैशिष्ट्यावच्छिन्नासाधारण्यविषयितासत्वे तत्वोभयाभावनिवेशनमावश्यकं। अन्यथा कांचनमयपर्वतो वह्निमानित्यादि
त्यादौ पक्षधर्मताज्ञानविशिष्टकांचनमयत्वव्यापकीभूताभावप्रतियोगिता पक्षतावत्प्रतिबंधकत्वपक्षधर्मताज्ञानकालीनत्वयोः सत्वेनातिव्याप्तेः तथा च साध्यवद्वृत्तप्रतिबंधकता

ग०टि०सा० मयसद्भावेनादोषात्। मैवं। प्रतिहेतुव्यापकसाध्याभावे विशिष्टद्वयाघटितत्वसद्भावेपि प्रकृतानुमितिप्रतिबंधकत्वपक्षतावच्छेदकाव

१०५ च्छिन्नविशेष्यतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारताशालिज्ञानकालीनत्वोभयाभावानिवेशेनातिव्याप्तिवारणेन तद्घटकप्रति

105 बंधकतायामुक्तोभयाभावो ननिवेश्यत इत्यभिप्रायात्। जलव्यापकवह्न्यभावस्य पक्षतावादिनस्तु प्रतिहेतुमत्ताज्ञानकालीनत्वगर्भ

त्वित्यभावनिवेशायं नि[illegible] विशिष्टद्वयाघटितत्वनिवेशेनैं। अत्र वैतियघनुमितिप्रतिबंधकतावच्छेदकत्वं स्वरूपसंबंधरूपं तदाहूदो वह्नि

मान्जलादित्यादौ हेतुमत्पक्षेऽतिव्याप्तिः हेतुमत्पक्षविषयितायां ताद्दशोभयाभाववद[illegible]साधारण्यज्ञानप्रतिबंधकतायाः स्वरूपसंबंधरूपावच्छेदक

कत्वस्य सत्वात्। एतेनाहृतिहेतौ रेवासाधारण्यमिति पक्षे दर्शितपरिष्कारस्त्वनचनहेतुपक्षेऽतिव्याप्तिरित्यपास्तम्। वृत्तिहेतोरप्यसाधारण्यस्य सिद्धां

तितत्वात्। यदि वाननतिरिक्तवृत्तित्वं नद्राजत्वं वह्निमज्जलादित्यादौ नाद्यात्म्यनहेतौ वह्न्यभाववद्वह्निव्यापकीभूताभावप्रतियोगित्ववद्वृत्तिताद्दशप्रतियोगि

त्ववज्जलत्वरूपेऽसाधारण्यघटिते ताद्दशविशिष्टांतराघटितेतिव्याप्तिरिति विशिष्टद्वयाघटितत्वमावश्यकं। अतेदंव[illegible]कथंमयत्वादिविशिष्टासाधा[illegible]वार

णाय विशिष्टांतरविषयितायां प्रकृतानुमितिप्रतिबंधकत्वपक्षधर्मताज्ञानकालीनत्वोभयाभावव्याप्यत्वस्य ज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयिता

नवच्छिन्नत्वोभयाभाववत्प्रतिबंधकतायाः स्वरूपसंबंधरूपावच्छेदकत्वस्य वा निवेश्यतया तथावि[illegible]धविशिष्टांतरेणासाधारण्येन घटितत्वान्नातिव्या

प्तिः। एतेन विशिष्टांतरविषयकनिश्चयस्यासाधारण्यविषयकत्वपक्षधर्मताज्ञानाकालीनत्वोभयाभावनिवेशेपि न निस्तारः। इदं तु बोध्यं प्रतिहेतुव्याप

कसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षसंग्राहकविशेषणाघटितं यत्किंचित्प्रतिबंधकताघटितलक्षणेन स्योक्तासाधारण्यघटितेऽतिव्याप्तिर्नो वि

शिष्टद्वयाघटितत्वं गदाधरीनोक्तहेयत्वं दुर्वारमिति। एतेन पक्षधर्मिकहेतुमत्ताज्ञानभिन्नज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकता। निवेशनमपि न सा

धु। तत्रापि स्वरूपसंबंधरूपावच्छेदकत्वनिवेशे हेतुमत्पक्षेऽतिव्याप्तेः अननतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशे वह्न्यभाववज्जलादिमद्वृत्तेऽतिव्याप्तिः।

जलहेतुकस्यले[illegible]जलवद्वृत्तविषयकनिश्चयविशिष्टवह्न्यभाववज्जलवद्विषयकत्वावच्छिन्नप्रतिबंधकतायाः ताद्दशज्ञानभिन्नज्ञानवैशि[illegible]

[illegible] त्वं ४ तिजलवद्वृ

ज्ञानावच्छिन्नतया तदनतिरिक्तवृत्तित्वस्य तादृशविशिष्टविषयितायां सत्त्वात् यदपि ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबं
धकतावच्छेदकत्वासाधारण्यविषयिताभिन्नत्वोभयाभाववद्वृत्त्यवच्छिन्नविषयितासामान्यं प्रकृतानुमितिप्रतिबं
धकतायाः स्वरूपसंबंधरूपावच्छेदकतावत्तद्रूपवत्त्वं वक्तव्यं तथा च हेतुमत्पक्षेनातिव्याप्तिः नापि पूर्वोक्तासाधारण्य
नविशिप्रद्य टि ४ घटितेऽतिव्याप्तिः तस्य विशिष्टांतरेण तादृशप्रतियोगित्वव्यक्तत्वरूपेण घटितत्वात् यदा यद्रूपावच्छिन्नविषयितासा
मान्यं निरुक्तोभयाभाववत्त्वे सति तादृशावच्छेदकत्ववदित्यादि स्वरूपसंबंधरूपावच्छेदकत्वोपादानान्न घटाद्यु
दासीनेऽतिव्याप्तिरिति तदपि न ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभाववद्ध्रदो व्याप्तेः तद्विषयितायाः वह्न्यभाववां ह्रदभ्रमाभाव
न्वह्न्यभाववान् ह्रद इति ज्ञाननिष्ठज्ञानवैशिष्ट्यावच्छेदकत्वासाधारण्यविषयिताभिन्नत्वयोः सत्त्वात् अभा
व ह्रभ्रभावनाद्व वान् अभाववान् ह्रद इति ज्ञानमादायेत्यपि वदंति तन्न बाधघटकतया वह्नेरधिकस्य भानेप्यभाववद्ध्रदवि
षयितात्वेनावच्छेदकत्वमेवेत्याशयेन एवं ह्रदो वह्निमान् वह्न्यभाववद्ध्रदवृत्तिजलाभावादित्यादौ स्वरूपासिद्ध्यादाव
व्याप्तिश्च ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानवच्छेदकत्वासाधारण्यविषयिताभिन्नत्वोभयाभावनिवेश
नं रमणीयमित्यपरे यदि च ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकतानिरूपितत्वासाधारण्यविषयित्वावृत्तित्वोभयाभा

वच्छिन्नप्रतिबंधकता ५ दद

१०६ वत्त्वप्रतिबंधकतावच्छेदकतावत्त्वयद्रूपावच्छिन्नविषयितासामान्यं तद्रूपवत्त्वं वक्तव्यमित्युच्यते तदापि वह्निव्या
ज्ञानस्य पकीभूताभावप्रतियोगिजलवान् वह्न्यभाववान् जलवृत्तितादृशजलमिति ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानिरूपितत्वा
106 साधारण्यविषयित्वावृत्तित्वेन यथाभाववदवच्छेदकत्वस्य जलवृत्तितादृशजलविषयित्वे सत्त्वात् जलवृत्तिवह्निव्या
पकीभूताभावप्रतियोगिजलेऽतिव्याप्तिः तादृशविशिष्टांतरेणाघटितत्वात् असाधारण्यमात्रस्य तत्प्रति~~बंधकत्वे~~
~~साधारण्यमतेनैव~~बंधकताघटिततादृशत्वाभावात् न च वह्निव्यापकीभूताभावप्रतियोगिजलवान् वह्न्यभाव
वानिति ज्ञानविशिष्टतादृशजलवत्ताज्ञानत्वेन न प्रतिबंधकता किंतु लाघवाद्वह्न्यभाववद्वह्निव्यापकीभूता
भावप्रतियोगित्वविशिष्टजलज्ञानविशिष्टजलवृत्तिजलज्ञानत्वेनैवेति वाच्यं तावतापि जलवान् वह्न्य
भाववानिति ज्ञानविशिष्टजलवृत्तिजलज्ञानत्वेनैव प्रतिबंधकतायाः प्रामाणिकतया तादृशप्रतिबं
धकतामादायैव वह्निव्यापकीभूताभावप्रतियोगित्वविशिष्टजलवृत्तित्वविशिष्टजलेऽतिव्याप्तेरुक्त
त्वात्। यदि चासाधारण्यविषयितेत्यत्रासाधारण्यत्वातिरिक्तप्रकारितानिरूपितत्वं विषयितायां निवेश्य
ते तदा स्वरूपसंबंधरूपावच्छेदकत्वकल्पेऽपि संभवतीति ध्येयं। अत्र वदंति एवमपि जलं वह्निमज्जला

दित्यत्रवह्न्यभाववद्वृत्तिव्यापकीभूताभावप्रतियोगित्ववह्निवृत्तित्वादृशप्रतियोगित्ववज्जलरूपविशिष्टेऽति
व्याप्तिः तत्रतादृशविशिष्टविषयितानिष्ठावच्छेदकतापर्याप्तज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतानिरूपि
तत्वेपिकेवलासाधारण्यमात्रविषयकज्ञानीयनिरूपितविषयितावृत्तित्वेनोभयाभाववत्वात् अप
तत्र [redacted] मेयत्वविशिष्टासाधारण्यवारण [redacted] मपर्वविशिष्टांतराघटितत्वनिवेशान्नातिरि व्याप्ति ४
क्त्यप्येतत्तदाहृतमसाधारण्य [redacted] विषयितानिवेचनप्रयासेनविशिष्टांतराघटितत्वानावेनैवतद्वारण
संभवादिति अपरेतुस्वरूपसंबंधरूपावच्छेदकत्वप्रवेशेसामान्यपदान्निवेशेनैवैकदेशातिव्याप्तिवार
णासंभवेपिपर्वतोवह्निमान् धूमादित्यादावच्छेदकधूमदर्शनविधयाप्रतिबंधकतामादायपाषाण
मयत्वविशिष्टपर्वतादावतिव्याप्तिः प्रतिबंधकतापर्याप्तज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशेननवारयि
तुंशक्यतेतथासत्यसाधारण्येऽव्याप्त्यापत्तेरितिनिर्गलितं। अत्रब्रूमः ज्ञानवैशिष्ट्यावच्छिन्नत्वासा
धारण्यविषयितानवच्छिन्नत्वोभयाभाववत्वस्यप्रतिबंधकतापर्याप्तनिवेशान्नपाषाणमयपर्वतादा
वतिव्याप्तिरसाधारण्येऽव्याप्तिश्चेतिपूर्ववत् यत्तुहेतुमत्पक्षेऽतिव्याप्त्यभिधानंतन्न। असाधारण्य

१०७ विषयितानवच्छिन्नत्वमित्यत्रावच्छेदकत्वं नावच्छेदकतावच्छेदकसाधारणं किंतु साक्षादवच्छेदकत्वमे
107 व प्रतिबंधकतावच्छेदकत्वमित्यत्रापीदृशमेव घटकं न तु परंपरासाधारणं एवं चासाधारण्यस्थले वि
निगमनाविरहादसाधारण्यविषयकनिर्णयविशिष्टहेतुमत्पक्षविषयकनिर्णयत्वेन हेतुमत्पक्ष
विषयकनिर्णयविशिष्टासाधारण्यविषयकनिर्णयत्वेन च प्रतिबंधकताद्वयेपि यत्प्रतिबंधकताव्य
क्त्यवच्छेदिका हेतुमत्पक्षविषयितासामान्यासाधारण्यविषयित्वावच्छिन्ने तेन हेतुमत्पक्षे इति व्याप्तिवि
शिष्टा असाधारण्यविषयितानवच्छिन्नत्वमित्यस्य स्वसमानाधिकरणभेद प्रतियोगितावच्छेद
कत्व स्ववृत्तित्वोभयसंबंधेनासाधारण्यविषयिताविशिष्टावच्छेदकत्वानिरूपकत्वमर्थः एवं प्रतिबंध
कतावच्छेदकत्वं न केवलेन स्वाश्रयत्वसंबंधेन किंतु स्वावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्य
नेह २ विशिष्टैनेति। यद्रूपप्रकृतहेतुप्रकारतानिरूपितप्रकृतपक्षविषयतान्यत्वस्य यद्रूपावच्छिन्नविषयि
ताविशेषणत्वमुपेयं न चैवमपि सत्प्रतिपक्षे व्याप्तिस्तत्र प्रतिहेतुव्यापकसाध्याभावनिर्णयविशिष्ट
प्रतिहेतुमत्पक्षविषयकनिर्णयत्वेनैव प्रतिबंधकतया तस्यां निरुक्तोभयवत्त्वादिति वाच्यं साध्याभावव
परं तु वृत्तित्वं धृति त्वाभावयद्व्याप्तित्वादि, पादो पक्षे साध्यहेतुमत्तातानत्वाहार्यतया न तत्र प्रतिबंधकताघटितलक्षणादरणीयमिति बोध्यं। भाया

प्रतिहेतुव्यापकसाध्याभावसामानाधिकरण्यानवच्छिन्न ५

दवृत्तित्वरूपव्याप्तिघटितस्यैव[redacted]सत्प्रतिपक्षतायां निश्चितत्वेनव्यापकसामानाधिकरण्यरूपव्याप्तिघटितस्या
लक्ष्यतापाएवगंथकृदभिप्रेतत्वात् यद्धानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयितानवच्छिन्नत्वसत्प्रतिपक्षविषयितान
वच्छिन्नत्वैतत्त्रितयाभावरूपप्रतिबंधकतायांविशेषणं यत्त्वेवंसतितद्धटकेप्रतिहेतुमत्पक्षेःतिव्याप्तेर्वज्रलेपत्वमितित
त्तुच्छंयदिप्रतिहेतुव्यापकसाध्याभावमात्रंदोषस्तदासम्यगेवयदितुतादृशसाध्याभावसमानाधिकरणप्रतिहेतु
मत्पक्षस्तदाप्रतिहेतुमत्पक्षाविषयकत्वेननिश्चयनिवेशान्नातिव्याप्तिवारणात् अन्येतुविशिष्टरूपाघटित
त्वंनदेयमेवज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयकत्वाव्यापकत्वोभयाभाववत्त्वंप्रतिबंधकतायांनिवेश्यं
असाधारण्यंचसाध्यव्यापकीभूताभावप्रतियोगिहेतुमत्पक्षादिकं वस्तुतःपक्षवृत्तित्वाघटितासाधारण्यक
त्वेएवज्ञानवैशिष्ट्यावच्छिन्नत्वपक्षधर्मताज्ञानविशिष्टासाधारण्यविषयकनिश्चयत्वाव्यापकत्वोभयाभाववत्त्वमे
न वतत्रविशेषणं एवंचहेतुमत्पक्षज्ञाननिष्ठप्रतिबंधकता[redacted]संग्रहः एवंचपाषाणमयपर्वतत्वादिवारणात्तज्ज्ञान
वैशिष्ट्यावच्छिन्नप्रतिबंधकताश्रयज्ञानकासाधारण्यसंग्रहाच्चस्वरूपसंबंधरूपप्रतिबंधकतावच्छेदकत्वनि
वेशापक्षःसम्यगेवेत्याहुः अपरेतुपाषाणमयत्ववत्पर्वतत्वादिवारणायज्ञानवैशिष्ट्यानवच्छिन्नत्वमात्रंनिवे

१०८ ध्यंतच्चतद्धर्मावच्छेदेनग्राह्याभाववत्तानिश्चयत्वेशिष्टावच्छिन्नंयत्तद्धर्मप्रकारककिंचिद्धर्मावच्छिन्नविशेष्यक
108 निश्चयत्वावच्छिन्नंप्रतिबंधकत्वंतदन्यत्वेसतितद्धर्मप्रकारककिंचिद्धर्मावच्छिन्नविशेष्यकनिश्चयत्वेशिष्टावच्छि
न्नंयत्तद्धर्मावच्छेदेनग्राह्याभाववत्तानिश्चयत्वावच्छिन्नंप्रतिबंधकत्वंतदन्यत्वं तेनसाध्यव्यापकीभूताभावप्र
तियोगिहेतुघटितासाधारण्यस्यसाध्याभावव्याप्यप्रतिहेतुघटितसत्प्रतिपक्षस्यचनासंग्रहइतिवदंतितन्न
तत्तद्धर्मभेदभिन्नानांप्रतिबंधकताभेदनिवेशेगौरवादितिकृतंपल्लवितेन संपादनीयत्वादिति यादृशविशिष्टविषय
कत्वंप्रकृतानुमितिप्रतिबंधकताशून्यपक्षधर्मताज्ञानकालीनज्ञानावृत्तियादृशविशिष्टविषयकत्वव्यापकः
प्रकृतानुमित्यप्रतिबंधकत्वपक्षधर्मताज्ञानकालीनत्वोभयाभावोवा तादृशविशिष्टत्वमर्थः तेनपक्षवृत्तित्वा
घटि तस्यहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वादिरूपस्यैवासाधारण्यत्वेनाव्याप्तिः नचयादृशविशि पि
ष्टविषयकत्वव्यापकः प्र[illegible]कृतानुमित्यप्रतिबंधकत्वपक्षधर्मताज्ञानत्वोभयाभावइत्येवास्तु किंकालीनत्व
निवेशे नेति[illegible]वाच्यम् पर्वतोवह्निमान्वह्न्यभावव्याप्यादित्यादौवह्निमत्पर्वतादावतिव्याप्तेः तन्निश्चयेप्र
त्य कृतानुमि[illegible]प्रतिबंधकत्वेपिपक्षधर्मताविषयकत्वासंभवात् कालीनत्वनिवेशेचपक्षधर्मताज्ञानकाली

वह्निव्याप्य

नत्वे[redacted]नादोषादिति अत्र पर्वतो वह्निमान्वह्न्यभावव्याप्यवांश्चेत्याहार्य्यमेव न त्वनुमितिरिति तु न भ्रमः स्यं
पर्वतत्वसामानाधिकरण्येन साध्यत्वे तदवच्छेदेन साध्यवत्त्य[redacted]तिव्याप्तेः तत्र तादृशानुमितिप्रसिद्धेः पर्वतो
घटवान्वह्न्यभावव्याप्यादित्यादौ वह्निमत्पक्षेऽतिव्याप्तिश्च एवं पर्वतो वह्निमान्धूमादित्यादौ जलव्यापकवह्न्यभा
ववारणाय हेतौ पक्षधर्मताज्ञानं विवक्षितं अथ यान्नह्रदत्वसामानाधिकरण्येन वह्नेः साध्यत्वे जलादिहेतौ ना
वसाधारण्यज्ञानविशिष्टं ह्रदो जलवानित्यादिसामानाधिकरण्येन पक्षधर्मताज्ञानमादायासाधारण्ये
व्याप्तिर्दुर्वारैवाबाधनिश्चयवत्सामानाधिकरण्येन तद्धत्तावुद्धावच्छेदकावच्छेदेनैव तत्तदभावव्या
प्यदर्शनस्य विरोधित्वात् पक्षतावच्छेदकावच्छेदेन हेतुमत्तानिश्चयो निवेश्य इति तु न वाच्यं सामा
नाधिकरण्येन साध्ये सामानाधिकरण्येन हेत्वभाववत्पक्षातिव्याप्तेः अवच्छेदकावच्छेदेन हेतुम
त्तानिश्चयकालीनस्य तन्निश्चयस्यानाहार्यत्वासम्भवात् एतेनानुमितेरवच्छेदकावच्छेदेन हेतु
मत्तावगाहित्वं विशेषणं। असाधारण्यज्ञानदशायां च सामानाधिकरण्येन साध्यमवच्छेदकावच्छे
[redacted]देन हेतुं चावगाहमानानुमितिर्नास्त्येवेति उभयाभावपर्यन्तानिवेशेऽपि नाव्याप्तिरित्युक्तावपि न

१०८ निसारः उक्तस्थलेतथाविधहेतुमत्ताज्ञानविरोधिसामानाधिकरण्येनहेत्वभाववत्पक्षात्तिव्याप्तेः एवं चानुमितौ हेतुता
109 वच्छेदकसंबंधेनहेतुत्वव्यापकत्वं यथाश्रुतमेव यद्रूपावच्छिन्नविषयितायांस्वावच्छेदकत्वं स्वं चावच्छेद
कावच्छेदेनहेतुमत्तानिश्चयगर्भोभयाभावघटकप्रतिबंधकत्वमिति नातिव्याप्तिरित्यपि नाशंक्यं। अभा
वो घटवान् आधेयत्वाभावादित्यादौ सामानाधिकरण्येनसाध्ये सामानाधिकरण्येनाधेयत्ववदभा
वत्वावच्छिन्नेऽतिव्याप्तेः घटव्यापकीभूताभावप्रतियोग्याधेयत्वाभावरूपासाधारण्यविषयितावच्छिन्ना
याः प्रतिबंधकतायाः अवच्छेदकीभूततद्घटकविषयिताव्यापकत्वस्यावच्छेदकावच्छेदेनहेतुमत्ताज्ञा
नकालीनत्वघटिततादृशाभावाभावे सत्त्वात् यदि च स्वावच्छेदकीभूतयद्रूपावच्छिन्नमुख्यविशेष्य
तानिवेश्यते अथवा व्यापकताशरीरेऽभावत्वमनिविष्टमेवप्रयोजनाभावात् अन्यथानिरुक्तासाधा
रण्यज्ञानविशिष्टस्यावच्छेदकाव[redacted]च्छेदेनहेतुमत्ताज्ञानस्याप्रसिद्ध्याप्रतिबंधकतायाएवानुपपत्तेरि
त्युच्यते तदापि वह्नित्वावच्छेदेनधूमाभाववद्वृत्तित्वस्य साध्यत्वे पक्षतावच्छेदकत्वे वा सामानाधिक
रण्येनाधेयत्वाभावादेर्हेतुत्वे बाधाश्रयासिद्ध्यादिघटकवृत्तिताविशिष्टव[redacted]ह्यावृत्तिव्याप्तिः स्वावच्छे

स्यानाहार्य

भावप्रतियोगित्वा २

त्वभा २ असाधारण्यपदके २

दकतद्विषयिताव्यापकत्वस्यावच्छेदकावच्छेदेनहेतुमत्ताज्ञानकालीनत्वतादृशप्रतिवंधकत्वोभयाभावेस
त्वात् पर्वतोघटवान्अभावप्रति■योगित्वादित्यादोसामानाधिकरण्येनसाध्यत्वेअभावप्रतियोगित्ववदेना
वत्वावच्छिन्नेःतिव्याप्तिःतादृशोभयाभावस्यतादृशतद्रूपावच्छिन्नमुख्यविशेष्यताव्यापकत्वसत्वादितिन
न।अवच्छेदकावच्छेदेनहेतुमत्तानिश्चयविशिष्टतादृशासाधारण्यनिश्चयस्याहार्यत्वेनप्रतिवंधकत्वास
त्वात्स्वरूपसंवंधरूपावच्छेदकत्वस्यैवतद्विषयितायाअसिद्धेः।यदपिवाधाविषयकंनाहार्यंतदातादृश
हेतुमत्तानिश्चयतादृशासाधारण्यनिश्चययोरनाहार्यतयाएककालीनत्वासंभवादुक्तासाधारण्यज्ञाने
प्रतिवंधकतायाएवासत्वेनदूषकताबीजाभावादलक्ष्येऽसाधारण्येऽतिव्याप्तेः उक्तोभयाभावस्यतादृश
मुख्यविशेष्यिताव्यापकत्वादितितदपिनतावतापितद्विषयितायांस्वरूपसंवंधरूपावच्छेदकत्वासिद्धेःमे
वं।सामानाधिकरण्येनसाध्यवत्ताज्ञानेप्रतिअवच्छेदकावच्छेदेनहेतुमत्ताज्ञानविशिष्टेऽसाधारण्यनिश्च
यःप्रतिवंधकःअवच्छेद[redacted]कावच्छेदेनचतंप्रतिसामानाधिकरण्येनहेतुमत्ताज्ञानविशिष्टःसत्प्रतिसा
मानाधिकरण्येनसाध्यतास्थलेऽवच्छेदकावच्छेदेनपक्षधर्मताज्ञानघटितोभयाभावघटितं[redacted]अ

११०
॥१०॥
क्षोभागा

वच्छेदकविच्छेदेन तत्स्थले च सामानाधिकरण्येन पक्षधर्मताज्ञानघटितोभयाभावघटितं प्रथकुलक्षणं एवं च सा
मानाधिकरण्येन साध्यसिद्धिस्थलीये लक्षणे अवच्छेदकावच्छेदेन हेत्ववगाहित्वमनुमितिविशेषणं तत्र हेत्वभा
ववत्पक्षे सिद्धिरूपतया लक्ष्यः अवच्छेदकावच्छेदेन साध्यसिद्धिस्थलीये च तत्र सामानाधिकरण्येन हेत्व[redacted]व
गाहित्वं तद्विशेषणं तेन तत्र [redacted] हेत्वभाववत्पक्षे नातिव्याप्तिः। यदि च सामानाधिकरण्येन साध्यसिद्धिस्थ
लीयलक्षणे एव पक्षादौ सामानाधिकरण्येन पक्षतावच्छेदकादीनामिव सामानाधिकरण्येन हेतुमत्ता
निवेश इत्याग्रहस्तदा साधारण्यविषयकत्वावच्छेदकावच्छेदेन पक्षधर्मताज्ञानकालीनत्वोभयाभावो नि
श्चयविशेषणं प्रतिबंधकतानुपपत्तिरिति चेत्तेन यद्रूपावच्छिन्नविषयिताव्यापकः पक्षसाध्यवैशिष्ट्या
वगाह्यनुमित्यप्रतिबंधकत्वावच्छेदकावच्छेदेन पक्षधर्मताज्ञानकालीनत्वोभयाभावः यद्रूपावच्छि
न्नविषयिताव्यापकं च पक्षे साध्यव्याप्यहेत्वनुमितिप्रतिबंधकत्वं तत्तदुभयान्यतररूपवत्त्वं तथाविधो
भयाभाववत्ता[redacted]दृशप्रतिबंधकत्वान्यतरत्व यद्रूपावच्छिन्नविषयिताव्यापकं तद्रूपवत्त्वमिति चानादे
यं। तथाविधं तादृशोभयाभावमादाय तथाविधहेत्वभाववत्पक्षातिव्याप्त्यनुद्धारात्। केचित्तु ज्ञानत्वे

५ वस्तुतस्तु सामानाधिकरण्येन साध्यहेतुस्थलीयं तथाविधपक्षसाध्यवैशिष्ट्यावगाह्यनुमित्यप्रतिबंधकत्वावच्छेदकावच्छेदेन पक्षधर्मताज्ञानका
लीनत्वोभयाभावसामानाधिकरण्येन हेतुमत्तापरामर्शाविरोधित्वान्यतरगर्भं। अवच्छेदकावच्छेदेन हेतुसाध्यस्थलीयं तादृशपक्षसाध्यवैशि
ष्ट्यावगाह्यनुमित्यप्रतिबंधकत्वसामानाधिकरण्येन पक्षधर्मताज्ञानकालीनत्वोभयाभावावच्छेदकावच्छेदेन परामर्शाविरोधित्वान्यतरगर्भं तत्र
अवसामानाधिकरण्येन हेत्वभाववत्पक्षावगाहिनिश्चयो ग्राह्यः २

शं. दी. ६

५

साध्यस्य पक्षतावच्छेदकत्वे साधारण्यापत्तेः ६

शिष्टावच्छिन्नत्वासाधारण्यविषयितानवच्छिन्नत्वे अनयाभाववत्प्रतिबंधकतावत्त्वेन निश्चये विशिष्टबु

ध्दिजनकतादृशहेत्वभाववत्पक्षेऽतिव्याप्तिः व्यभिचारादिविषयकतादृशहेत्वभाववत्पक्षज्ञानवारणाय स्व

विषयकत्वावच्छिन्नप्रतिबंधकतानिवेशात् अव्यापकविषयिताशून्यत्वं वा प्रवेश्यं एवं च हेत्वभाववत्पक्षस्य कचिद्घ

टकत्वेपि न क्षतिः कांचनमयपर्वतो वह्निमान् गगनादित्यादौ कांचनमयत्वव्यापकीभूताभावप्रतियोगिगगना

दिवारणाय अनयाभावनि[redacted]वेशेन पक्षतासाध्यतावच्छेदकव्यापकीभूताभावप्रतियोगिहेतुविषयकत्वस्य

निश्चयविशेषणत्वे[redacted] एवं च ह्रदो वह्निमान् जलादित्यादौ वह्न्यभाववज्जलवत्यपि स्वरूपसंबंधरूपावच्छे

दकत्वघटिते नातिव्याप्तिः विशिष्टबुध्द्याघटितत्वं त्वसाधारण्यघटितविशिष्टबुद्ध्यघटितवारणाय आवश्यकमिति सा

मान्यतः प्रतिबंधकतावच्छेदकविषयितापर्याप्त्यधिकरणत्वेन निश्चयविशेष्यत्वे अनयाभावविवक्षासामर्थ्यं हेतु

अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानघटिते अनयाभावघटिते कोत्तिपक्षं समर्थयंते। तन्न एवं सति तादृशे अनया

भावविवक्षणे वैयर्थ्येन संपादनीयत्वादिति ग्रंथविरोधात्। अव्यवहृत्पावच्छिन्नविषयिताप्रकृतानुमित्य

वच्छिन्नबुद्ध्यावच्छिन्नत्वे कौतुकं आपत्तिरिति वे तत्कदो वह्निव्याप्यवान् जलादित्यादौ वह्न्यभाववत्पदत्वेऽपि

१११ [redacted] अथ पक्षवृत्तित्वाघटितासाधारण्यसंग्राहकप्रकारादरणे ह्रदो वह्निमान् जलादित्यादौ जलव्यापकवह्न्यभाव इति व्या
प्तिः अनुमितिप्रतिबंधकत्वपक्षधर्मताज्ञानकालीनत्वोभयाभावस्य तादृशविशिष्टविषयकत्वव्यापकत्वात् मैवं।
एतन्मते वह्निव्यापकीभूताभावप्रतियोगिजलादेरिव जलव्यापकवह्न्यभावस्याप्यसाधारण्यरूपतया स्वयमेव
महाचार्यैः सव्यभिचारे निक्षिप्तत्वात् तादृशवह्न्यभावसमानाधिकरणजलत्वविशिष्टान्तरघटितत्वादलक्ष्यमेव।
वह्न्यभाववज्जलवदादेः स्वरूपसंबंधरूपावच्छेदकत्वघटितस्ययघलक्ष्यत्वं तदा तत्प्रतिबंधकताकभेद एव निवेश्यः ह्रदो
वह्निमान् धूमादित्यादौ तु जलव्यापकवह्न्यभावो वह्निव्यापकीभूताभावप्रतियोगिजलवदलक्ष्य एव सत्प्रतिपक्षो वे
व त्तियथामतं वोध्यं। अथैवं जलत्वावच्छिन्नधर्मिकवह्निबुद्धिं प्रति जलत्वावच्छिन्नधर्मिकवह्न्यभावव्याप्यत्वज्ञान
स्य प्रतिबंधकतायाः परामर्शग्रंथे स्वयं व्यवस्थापितत्वाज्जलवान् वह्निमान् धूमादित्यादौ वह्न्यभावव्याप्यत्ववि
शिष्टजलत्वेति व्याप्तिः तस्य पक्षाघटितत्वेन सत्प्रतिपक्षत्वासंभवादिति चेन्न। तत्र पक्षसाध्यग्रहाविरोधित्वे सति
पक्षसाध्यवैशिष्ट्यग्रहविरोधित्वरूपबाधविभाजकसत्वेन बाधांतर्भावात् तदनंतर्भावे तु सामान्यलक्षणे
विशेषलक्षणे च तत्प्रतिबंधकताभेदस्य निवेश्यत्वात्। व्यभिचारघटितपदार्थांतरे इति दूषं चालक्ष्यतावीज

नियतधर्मेण

माविष्कर्त्तुं। अन्यथा व्यभिचारादिविशिष्टवस्तुमात्रस्यैव दोषत्वापत्तेः विशिष्टवस्तुत्वे [redacted] केवलवस्तुत्वेने नापि
वाॅलक्ष्य[redacted]त्वात् न चैवं प्रमेयत्वविशिष्टव्यभिचारेऽव्यवतार्ये विरोध इति वाच्यं। व्यभिचारत्वा
दिना लक्ष्यस्येदानीं किंचिद्विशिष्टत्वेनापि लक्ष्यतासंदेहात् अन्यथा किंचिद्विशिष्टत्वस्य दार्थेद्वयैवाभिदध्यात् एवं
च स्वरूपसंबंधरूपावच्छेदकत्वकस्यापि प्रमेयत्वविशिष्टव्यभिचारवारणाय नानतिरिक्तवृत्तित्वकल्पौ यवि
शेषणस्यावश्यकत्तयानतिरिक्तवृत्तित्वनिवेशादुल्लनिधानासंगतिरित्यपि समाहितं निर्णीतालक्ष्यत्वकेता
दृशपदार्थान्तरे स्वरूपसंबंधरूपावच्छेदकत्वपक्षे तद्विशेषणानपेक्षणात् तथा च तादृशविशेषणप्रवेशोत्तरं
किंचिद्विशिष्टदोषेः व्याप्याशंकायामलक्ष्यमध्यसंपातसूचनाय दीधितिकृतां प्रमेयत्वविशिष्टस्याघ्राभिधा
नं यत्तु विशिष्टवस्तुमात्रस्य लक्ष्यता[redacted] [redacted]दोषत्वस्य केवलान्वयित्वापत्तिरित्युदासीनविषयिता
निरूपकस्येति नियमोपगमात् पश्चात् किंचिद्विशिष्टदोषेः लक्ष्यतानिर्णय इति महाचार्याणामाशयः यद्रू
पावच्छिन्नविषयकत्वं प्रतिबंधकतानतिरिक्तवृत्तितद्रूपावच्छिन्नं यत्त्वावच्छिन्नाविषयकप्रतीतिविषय
तावच्छेदकावच्छिन्नमित्युक्तो व्यभिचारत्वावच्छिन्नस्य तादृशप्रमेयत्वावच्छिन्नत्वादसं नवमनुमितिप्रति

११२ बंधकतावच्छेदकस्वावच्छिन्नाविषयिताकस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयोरैक्यविवक्ष
112 यानिराकरोति एवंचेति नन्वत्र यद्रूपावच्छिन्नविषयित्वस्वरूपसंबंधरूपावच्छेदकत्वनिवेशनेनोपप
त्तौविशिष्टद्वयाघटितत्वंव्यर्थं। वह्न्यभाववज्जलादिमद्वृत्तिजलादिमद्ध्रदादेरपिवारणसंभवादितिचेन्न। अभा
ववान्वह्न्यभाववान्ह्रदश्चाभाववानितिज्ञानस्यापिविरोधितयास्वरूपसंबंधरूपावच्छेदकताश्रयवि
ऽत्यादि षयितानिरूपकीभूताभाववद्ध्रदादिघटिततयासंभववारणायानतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशा
त्प्रमेयत्वविशिष्टासाधारण्यवारणायज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविषयितानवच्छिन्नत्वोभ
याभाववत्त्वस्यप्रतिबंधकतायाः प्रकृतानुमित्यप्रतिबंधकत्वपक्षधर्मताज्ञानकालीनत्वोभयाभाववत्त्वेवे
तच्छरीरेप्रवेशेचवह्न्यभाववद्ध्रदविषयिताघटकतया। भाववद्ध्रदविषयितास्वरूपसंबंधरूपावच्छेदक
तावत्तीबोध्यात्तथाच नविशिष्टद्वयाघटितत्वंव्यर्थमिति। वस्तुतस्तुस्वावच्छिन्नविषयिताशून्यनिश्चय
रतो निष्ठयद्रूपावच्छिन्नविषयितैत्यैवसम्यक् प्रतिविषयतावच्छेदकत्वेवैयर्थ्यात् एवंचविशिष्टांतरविष
सामान्य यित्वावच्छेदकत्वंनिरुक्तोभयाभाववत्त्वप्रतिबंधकतायांप्रवेश्यमित्यसंभववारणादनतिरिक्तवृत्तित्ववैयर्थ्यं
ती२ व-

अत्र प्रमेयत्ववाच्यत्वादिविशिष्टदोषेषु तद्घटकयत्किंचिद्दोषमादायातिव्याप्तिवारणाय ३
विशिष्टद्वयघटकत्वं तु न मर्थं

दुर्वारमेवेति बोध्यं यद्विषयकत्वोल्लोचनानतिरिक्तवृत्तित्वनिवेशसंभवः वह्न्यभाववद्ध्रदादेर्ह्रदानतिरिक्त
यातद्विषयकत्वस्यातिरिक्तवृत्तित्वात् स्वरूपसंबंधरूपावच्छेदकत्वपर्याप्तिनिवेशे चासंभव एवेति वि
शिष्टविषयितानिवेशः एवं चेति प्रमेयत्व वाच्यत्वादिविशिष्टदोषवारणाय यादृशयादृशरूपावच्छि
न्नविषयकत्वव्यापकं प्रतिबंधकत्वं स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं तादृशमित्युक्तौ यादृश
यादृशांतर्गतं दोषतावच्छेदकमपीत्यसंभवो ऽतः स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयद्रूपा
वच्छिन्नविषयकत्वं प्रकृतानुमितिप्रतिबंधकतानतिरिक्तवृत्तितद्रूपावच्छिन्नाविषयकप्रतीतिविषय
तावच्छेदकं यत्त्वं तदवच्छिन्नत्वमर्थः अनुयोगिनि स्वत्वविवक्षा च दीधित्यनुसारात् वाच्यत्वादय इ
ति। एकमात्रदोषस्थले यत्र लक्षणं संगमनीयं विशेष्यविशेषणभावव्यत्यासेन विशिष्टांतरं तत्रैव बोध्यं प
र्वतो वह्निमान् द्रव्यादित्यादौ पाषाणमयपर्वतादिवारणाय विशेष्यदलं। घटवद्ध्रदादौ प्रकृतानुमिति
त्वे प्रतिबंधकतावच्छेदकविषयतावं नवारणसंभवात् दुर्घटत्वादिति। ननु मेयत्वविशिष्टव्यभिचारत्वा
र्यविषयिणी व्यभिचारत्वेन घटावगाहिभ्रमात्मकप्रतीतिरित्यतिव्याप्तिवारणासंभवात् स्वाश्रयावि

११३ षयकत्वनिवेशेनायुक्त इतिचेत्। न हि वह्न्यभाववद्वृत्तित्वेन घटाद्यवगाहिभ्रमात्मकप्रतीतिमादाय वह्न्यभाव
113 वद्वृत्त्यादावसंभववारणाय स्वाश्रयाविषयकप्रतीतिः प्रमारूपा विवक्षणीया। तथा च मेयत्वविशिष्टव्य
भिचारादिवारणायैवोक्तविवक्षणमिति तद्दोषद्वृत्ति। अथावद्दोषधूमवान् वह्नेरित्यादौ वाधे व्यभिचारे च लक्ष
णसमन्वयसंभवेऽपि ह्रदो वह्निमान् धूमादित्यादौ वाधादौ वाधत्वादिरूपस्वाश्रयाविषयकप्रतीतिविष
यतावच्छेदकतादृशरूपान्तराप्रसिद्धिः असिद्ध्यादिप्रतीतेर्ह्रदविषयकत्वादिति तद्दोषपदोपादान
मनर्थकं। न च दोष इत्येव पाठः तथा च दोषपदेनाव्याप्तेरपि संग्रह इति वाच्यं तथा सति दुर्घटत्वादित्यस्या
न्वयप्रसंगादिति चेन्न स्वाश्रयमुख्यविशेष्यकत्वशून्यत्वनिवेशेनाव्याप्तेः सुवारत्वात् एवं च व्यभिचार
वत्ताप्रतीते व्यभिचारमुख्यविशेष्यत्वविवक्षणीया एवं व्यभिचारत्वेन घटाद्यवगाहिप्रतीतिवारणाय प्रमात्वमप्य
नुसंधेयं न च प्रमेयं गगनवद्वृत्तित्वादित्यादौ गगनाभाववत्प्रमेयत्वस्य केवलान्वयितया तद्वन्मुख्यविशेष्यकत्वाभाव
ती वत्त्वप्रसिद्ध्यप्रसिद्धिरिति वाच्यं। स्वाश्रयमुख्यविशेष्यकत्वं हि स्वाश्रयमुख्यविशेष्यकत्वस्वाभावकालीनत्वोभयसं
बंधावच्छिन्नस्वाभाववत्त्वं व्यभिचारज्ञानादौ निरुक्तोभयसंबंधावच्छिन्नप्रतियोगिताकगगनाभाववि

कत्वाभावेनासंभव इत्यतो द्वितीयामुख्यविशेष्य ४

प्रमेयत्वाभावः प्रसिद्धः [redacted] प्रमेयं गगनाभाववदिति प्रतीतेर्निरू एवं च
क्तस्वाश्रयाविषयकत्तयाबाधाव्याप्तिवारणाय केवलान्वयिधर्मावच्छिन्नमुख्यविशेष्यत्वातिरूपितृत्वं प्रती
तिविशेषणं। तथा च निरुक्तसंबंधावच्छिन्नमेयत्वविशिष्टव्यभिचारत्वाभाववती केवलान्वयिधर्मावच्छिन्नावि
षयिकाया प्रमाया मुख्यविशेष्यतावच्छेदकं न शुद्धव्यभिचारस्त्वमिति प्रमेयत्वविशिष्टव्यभिचारावृत्तिव्याप्तिवा
रणायेयस्वावच्छिन्नाविषयकत्वनिवेश इति। प्रमेयमिति। ननु वह्न्यभाववद्धूदावि[illegible]षयकप्रतीतिविषयता
वच्छेदकं यद्धूदविशिष्टवह्न्यभावत्वादि तदाश्रयाविषयकप्रतीतिविषयतावच्छेदकत्वं न तत्राधूमाभाववद्वृ
त्तिवृत्त्यादिघ्व्यभिचारव्याप्यवह्न्यादिरूपविशिष्टं तरघटितद्रूप्यसंभवएव वक्तुमुचितः अथ गगनवान्घ
टादित्यादौ तादात्म्येन हेतौ व्यभिचारिणि गगनाभाववत्तादात्म्यविशिष्टघटादेर्लक्षणसमन्वयः संभवति तत्ताद
त्म्यस्य केवलान्वयितया तदभाववद्वृत्तित्वरूपव्याप्यप्रसिद्धेः व्यापकसामानाधिकरण्यरूपव्याप्तिप्रसिद्धाव
पि तत्तादात्म्यं घटव्यापकं प्रपंचघट इतिज्ञानविशिष्टज्ञानस्य प्रतिबंधकतावत् तत्तादात्म्यादेरतादृशत्वा
त् घटव्यापकत्तत्तादात्म्यवद्घटाभिन्नत्वस्य यद्रूपशब्देनोपादाने पिज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्यविष

११४
114

यितानवच्छिन्नत्वद्व्याभावस्यप्रतिबंधकताविशेषणत्वेनादोषात् वस्तुतस्तु व्यापकसामानाधिकरण्यघटि
तस्यसत्प्रतिपक्षतानिरूपकरणात्तविशिष्टद्व्याघटितं विशिष्टांतरमुपादेयं लक्षणसमन्वयार्थं तद्यौगौरवादिति चे
न्नातर्हि साधन[redacted] वद्वृत्तिसाध्याभावादेस्तत्त्वविशिष्टांतरत्वादिति चेन्न दूषणासंभवस्यैवास्तवदोषत्वेपिक
चिदप्रसिद्धिरेवेतिविशेषणज्ञापनार्थंतदुपादानं यत्तु समानप्रकारकत्वेन विरोधितामते हृदविशिष्टवह्न्यभा
वत्वादेः प्रतिबंधकतानवच्छेदकत्वादप्रसिद्धिकथनसंगतिरिति तन्न खंड तथासत्प्रतिपक्षनिष्ठस्यह्रदहृदत्वसं
गतेः बाधव्याप्यवत्पक्षतावच्छेदकरूपसत्प्रतिपक्षत्वादिकमादायासंभवाच्च। केचित्तु तदाश्रयमुख्यवि
शेष्यताशून्यप्रतीतिविषयतावच्छेदकत्वं विवक्षणीयं एवंच गंगे नाभाववत्तादात्म्यविशिष्टघटादौ लक्ष
णसमन्वयान्नासंभवः एवं वह्न्यभाववद्धृदवान् घटइत्यादिप्रतीतेर्वह्न्यभावव्याप्यवद्धृदत्वाश्रयमुख्यवि
शेष्यताशून्यतयातद्विषयतावच्छेदकत्वमादाय लक्षणसमन्वय इति तन्न। स्वावच्छिन्नाविषयकप्रतीतिविषय
तावच्छेदकं तादृशं यत्किंचिद्विशिष्टप्रमेयत्वादितदाश्रयमुख्यतोशून्यप्रतीत्यप्रसिद्ध्याः संभवस्यदुर्वारत्वात् मेय विशेष्य
त्वविशिष्टवह्निचारवत्ताप्रतीतिमादायातिव्याप्तिवारणाय प्रतीतिमुख्यविशेष्यतानिवेशस्यावश्यकत्वेनोत्तरी

रीत्या बाधादौ लक्षणासमन्वयात् संभवाच्च । यत्तु स्वावच्छिन्नविषयकप्रतीतिनिरूपितविषयिताशून्यपदार्थवि
षयकप्रतीतिविषयतावच्छेदकं यत्तादृशं रूपं तदाश्रयाविषयकप्रतीतिविषयतावच्छेदकमित्युक्तौ ह्रदो वह्निमा
न् धूमादित्यादौ बाधादावन्यविधवा धर्तस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वेपि उक्तविशेषणा
नाक्रांतत्वाद् सिद्धित्वादिकमादाय लक्षणासमन्वयः प्रमेयं गगनवद्घटत्वादित्यादौ च तादृशं प्रमेयत्वादिकमा
दायैव रूपप्रसिद्धिरिति तन्तु च्छतरां एतादृशाविवक्षायाः प्रमेयत्वविशिष्टव्यभिचाराद्यवारकत्वेन दुष्करत्वात्
अत्र स्वावच्छिन्नाविषयकप्रतीतिनिरूपितयद्रूपावच्छिन्नविषयिताप्रकृतानुमितिस्वव्याप्तिस्तद्रूपावच्छिन्नाघटित
त्वमिति तु नोक्तं पर्वतः पर्वतीयवह्न्यभाववान् वह्न्यभावव्याप्यादित्यादौ बाधे वह्निमत्पर्वतत्वरूपविशिष्टां
तादृश्या तरघटितत्वेन याः व्याप्तेरिति स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयद्रूपावच्छिन्नविषयिताशालि
निश्चयोत्तरानुमितावनुमानाभावो विरोधिविषयिताप्रयुक्तस्तद्रूपावच्छिन्नाविषयकत्वं विशिष्टांतरविष
यित्वाप्रयोज्यानुमित्यभावप्रयोजकाभावाधिकरणताप्रयोजकयद्रूपावच्छिन्नविषयित्वरूपवक्ष्यमाण स्य
कस्य घटितत्वा विशिष्टांतराविषयकत्वं अथेति वह्निमत्त्वसामानाधिकरण्येन धूमाभावो न विरोधीति तद्व

११५

115

च्छेदेनत्वप्रसिद्ध इति व्यभिचारघटित तदा घोदोषः। स्वावच्छिन्नविषयकत्वावच्छिन्नत्वादिविशिष्टांतराघटितत्वघ त
टकप्रतिबंधकतायां प्रवेशोक्ताव्याप्तिवारणमाशंकते नचेति। स्वावच्छिन्नविषयकत्वावच्छिन्नविषयकत्वनि
ष्ठव्याप्यतानिरूपितव्यापकत्वं धूमाभाववान्ह्रदश्च धूमाभाववानिति ज्ञानस्य वह्निमत्ताज्ञानप्रतिबंधकतायाः
सामान्यांतर्गततया तदनतिरिक्तवृत्तिविषयितायाप्रसिद्धिरतः स्वरूपसंबंधरूपावच्छेदकत्वमुपेक्षितं द्वितीया ती ४
वच्छेदकमपिताद्दृशमेव स्वरूपसंबंधरूपं तन्निवेशे वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितावच्छिन्नप्रति
बंधकतासामान्यनिरूपितस्वरूपसंबंधरूपावच्छेदकत्वाश्रयविषयिताकत्वस्य केवलवह्न्यभाव इति तस्य वि
शिष्टांतरत्वापत्त्याऽसंभवप्रसंगात् स्वावच्छिन्नविषयकत्वव्यापकत्वविशिष्टप्रतिबंधकतात्वव्यापकं यद्रूपा
त३ वच्छिन्नविषयकत्वव्यापकमिति फलितं ह्रदेन वह्न्यभाववान्ह्रदे वह्न्यभावद्दत्यादि ज्ञानयोरेकं प्रतिबंधक मेव
त्वमुपेयते वह्न्यभावे ह्रद इति वह्न्यभावो ह्रदवानिति च ज्ञानव्यावृत्तस्वरूपसंबंधा[redacted]
वच्छिन्नाधेयतासंबंधानवच्छिन्नप्रकारताव्यह्रदत्वावच्छिन्नविषयितानिरूपितस्वरूपसंबंधानवच्छिन्नप्रकारतान्य
वह्न्य

भावत्तावच्छिन्नविषयिताशालि निश्चयत्वस्य तदवच्छेदकत्वसंभवादित्यभिमानेनेदं। यावत्प्रतिबंधकतानिवेशफलं प्रकाशयति व्य
भिचारस्येति। नथाचानुमितिप्रतिबंधकतायां व्यभिचारविषयकत्वसामानाधिकरण्यभेदप्रतियोगितावच्छेदकत्वसत्वेन तद्भावस्यता
दृश प्रतिबंधकतात्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वादित्यर्थः। यद्यपि प्रतिबंधकत्तासामान्यावच्छेदकमित्युक्तावपि
नायं दोषस्तथापि ग्रमसिद्धिवारणाया वच्छिन्नांतं प्रतिबंधकताविशेषणं। अभिमानं निरूपकुर्वन्नेव ह्रदो वह्न्यभाववानितिज्ञानस्य ह्रदेव ह्निमा
व इतिज्ञानस्य च प्रतिबंधकताभेदः इति सिद्धांतमुपगम्याह व्यभिचारत्वादिरूपेति। स्वानवच्छिन्नप्रकारतावच्छेदकं यत्स्वावच्छिन्नविषयकत्वाव। च्छि अत्रपर्यवसित:
न्नप्रतिबंधकतासामान्यावच्छेदकं प्र मेयत्वविशिष्टबाधत्वादि तदनवच्छिन्नप्रकारतावच्छेदकधर्मवत्त्वोक्तौ तु नायं दोषः। न चेति। प्र थमा प्रविष्टा = ५
वच्छेदकत्वस्य स्वरूपसंबंधरूपत्वे प्रमेयवह्निर्धूमवान्‌ वह्नेरित्यादौ धूमाभाववद्वृत्तिः प्रमेयवह्निः धूमाभाववद्वृत्तिश्च न वह्निमानिति ज्ञान वह्नि
प्रतिबंधकतायाः सामान्यांतर्गततया तदनतिरिक्तवृत्तिविषयिताप्रसिद्धिरितीयाँकत्वमेव चेत्स्वरूपसंबंधरूपं तदैकदेशविष
यित्तायाश्चापि तथात्वेनासंभव इत्युभयत्राप्यन तिरिक्तवृत्तित्वनिवेशः। उक्तस्थले ग्रापाततोऽव्याप्त्युद्धारत्वाभायसामर्थ्यपि प
दोपादानं। प्रमेयत्वविशिष्टव्यभिचारादिकमादायासंभववारणाय कश्चित्पदं। निरुक्तार्थत्वाभायतयास्तीति। तदवच्छिन्नापर्या

ही मत्तविषयताका निरूपकतावच्छेद ५

वच्छेद २

११६
116

त्वविषयतापर्याप्त्याश्रयत्वरूपतद्घटितत्वनिवेशेतुनदोषइतिस्मर्त्तव्यं। इदमत्रावधेयं। स्वपदेनबाधविशिष्टव्यभिचारत्वोपादा
नेनसंभवतितदवच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकस्यस्वावच्छिन्नावि[redacted]
षयकप्रतीतित्वविषयतावच्छेदकत्वाभावात् इदानींव्यभिचारविशिष्टबाधत्वस्यधर्त्तुमशक्यत्वात् किंतुप्रमेयत्वविशिष्टबाधविशिष्टव्य
भिचारत्वमेवेतिबाधविशिष्टव्यभिचारेऽतिव्याप्तेर्न्यूनता। अथबाधघटकपदार्थविशिष्टव्यभिचारत्वंस्वपदेनोपादायतथाविधकेवल
ल व्यभिचारत्वस्यतादृशव्यभिचारेसत्वेननतद्घटितत्वाभावान्नातिव्याप्तिरितिचेदेवमपितदवच्छिन्नापर्याप्तविषयतापर्याप्त्याश्र
यत्वकल्पेतत्रातिव्याप्तिरस्त्येव। एवंस्वानवच्छिन्नप्रकारतावच्छेदकेत्यादिकल्पेपितत्रातिव्याप्तिरेवतस्मादेतौकल्पौमहाचार्याणाम
नसंमतावित्येवसम्यक्नचेति। ननुप्रथमकल्पेस्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतेत्यत्रस्वावच्छिन्नविषयकत्वेऽथवेतिद्वि
तीयकल्पेयद्धर्मावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतेत्यत्रयद्धर्मावच्छिन्नविषयकत्वेचस्वरूपसंबंधरूपंप्रतिबंधकत्वाव
च्छेदकत्वमेवनिवेश्यतांतथाचबाधविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वनिष्टस्वरूपावच्छेदकताकप्रकृतानुमितिप्रति
बंधकतायाऽप्यवच्छेदकयत्किंचिद्विषयित्वस्यबाधत्वावच्छिन्ननिरूपिततयाबाधत्वावच्छिन्नाविषयकप्रतीतित्वविषयताव

रूपसंबंध २

यद्धर्मपदेन

छेदकत्वस्य तत्रासत्त्वेन स्वपदेन वा धविशिष्टव्यभिचारत्वादेरुपादानासंभवात् तदुपादानसंभवेपि वा
शुद्धव्यभिचारविषयिता वा धविशिष्टव्यभिचारानिरूपितत्वान्नातिव्याप्तिर्दर्शयितुं शक्यते इति यावच्छेदक
त्वस्य तथात्वे तु नितरां [redacted] शुद्धबाधत्वादेरुपादानसंभवाच्च सर्वत्र लक्षणासमन्वय इति चेन्न। तथा सति जलव
द्ध्रदे इति व्याप्तेः जलत्ववान् वह्न्यभाववान् इति ज्ञानकालीनतज्ज्ञाननिष्ठप्रतिबंधकतावच्छेदकं वन्ह्यभाववज्जल
वद्वृत्ति जलत्ववद्ध्रदविषयकत्वमेव न तु केवलजलवद्ध्रदविषयकत्वमविशिष्टज्ञाने गतत्वात् तच्च यादृश यादृश
तादृश धर्मावच्छिन्ना निरूपितेन तादृशविषयिताशून्यप्रतीतिविषयतावच्छेदकत्वस्य जलवद्ध्रदत्वे सत्त्वात्। स्वावच्छिन्न
विषयकत्वस्याव्यापकं यद्रूपावच्छिन्नविषयित्वं तद्रूपावच्छिन्नविषयिताशून्यज्ञानीयत्वनिवेशे तु वह्न्यभाववा
न् धूमाभाववान् वह्न्यभाववांश्च ह्रद इति ज्ञानद्वयस्य समूहालंबनस्य वा धूमवत्ताज्ञानं प्रत्यवच्छेदकधर्मदर्शनवि
धया प्रतिबंधकत्वात्तस्य च वह्न्यभाववान् धूमाभाववानित्याकारकज्ञानविशिष्टवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयिताशा
लिज्ञानत्वेनैव वाच्यतया तादृशज्ञानद्वयनिष्ठधूमवत्ताज्ञानप्रतिबंधकताया अपि वह्न्यभाववद्ध्रदत्वरूपस्वावच्छि
न्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यांतर्गततया तादृशप्रतिबंधकताशून्यवह्न्यभाववान् धूमाभाव
वानिति ज्ञानाविशिष्टवह्न्यभाववान् ह्रद इति ज्ञानसाधारणवह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वस्यता

११७ दृशप्रतिबंधकतानतिरिक्तवृत्तित्वाभावेनस्वपदेनवन्ह्यभाववद्ध्रदत्वादेर्धर्त्तुमशक्यत्वेनासंभवापत्तेरतःस्वा
117 वच्छिन्नविषयितायामनतिरिक्तवृत्तित्वरूपमेवप्रतिबंधकतावच्छेदकत्वंनिवेश्यं।एवंचस्वावच्छिन्नविष
या यितायांस्वादृशज्ञानाविशिष्टज्ञानसाधारण्यात्तयाधूमवद्ध्रदविषयकेज्ञाननिरूपितप्रतिबंधकतातिरिक्त
वृत्तित्वेनस्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यपदेननतादृशप्रतिबंधकतायाःसंग्र
हः किंतुबाधादिज्ञानप्रतिबंधकतायास्तत्स्वावच्छिन्नविषयितायास्तदनतिरिक्तवृत्तित्वात्।तथाचनिरुक्तप्रतिबं
धकतासामान्यावच्छेदकीभूतास्वावच्छिन्नविषयितैवसाचयादृशयादृशधर्मावच्छिन्नानिरूपितावृत्त्वादेरेवतादृ
तयातदवच्छिन्नविषयकप्रतीतिविषयत्वंलक्ष्यइतिलक्षणसमन्वयः।नचप्रतिबंधकतासामान्यावच्छेदकेत्व
त्रापिस्वरूपसंबंधरूपावच्छेदकत्वमेवनिवेश्यतांतथाचतादृशधूमवत्ताज्ञानप्रतिबंधकतानिरूपितस्वरूपसंबं
धरूपावच्छेदकत्वस्यवन्ह्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वेऽक्षतेतत्पास्वपदेनवन्ह्यभाववद्ध्रदत्वादेर्धर्त्तुंशक्य
संभवा त्वेनासंभवोदितिवाच्यम्।तथासतिह्रदत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकीभूतस्यह्रदत्वा
वच्छिन्ननिरूपितयत्किंचिद्विषयित्वस्यप्रमेयत्वविशिष्टह्रदत्वावच्छिन्नानिरूपितत्वेनतस्यतदवच्छिन्नवि
षयकेप्रतीतिविषयतावच्छेदकत्वेनह्रदत्वादेरपिस्वपदेनोपादानसंभवेनैकदेशेदर्शितव्यापकविषयितारूप

त्वनिवेशे पूर्वोक्तजलत्ववह्न्यादावतिव्याप्तिः। यदि च वह्न्यभाववज्जलत्ववह्निविषयितापि तादृशप्रतिबंधकतावच्छेदिकेति नानयोर्ज
लत्ववह्न्योरतिव्याप्तिस्तदा पाषाणमयत्ववत्पर्वतेनेति व्याप्तिः। तत्र पाषाणमयत्वविशिष्टपर्वतत्वावच्छिन्नविषयितावच्
छिन्नप्रतिबंधकतासामान्यावच्छेदकं पाषाणमयत्वविशिष्टपर्वतविषयित्वं तादृश्या तादृशधर्मावच्छिन्नानिरूपिततादृ
शतादृशधर्मावच्छिन्नाविषयकप्रतीतिविषयत्वस्य पाषाणमयत्ववत्पर्वतेऽसत्त्वात्। न च प्रतिबंधकतासामान्यावच्छेदकय
त्किंचिद्विषयित्वं वह्न्यभावविशिष्टपाषाणमयत्वावच्छिन्नविषयित्वं तच्च पाषाणमयत्ववत्पर्वतत्वावच्छिन्नानिरूपितमिति नाति
व्याप्तिरिति वाच्यं। तादृशसामान्यावच्छेदकं पाषाणमयत्वावच्छेदेन वह्न्यभावाप्रसिद्धेर्न तदवगाहित्वं नापि पाषाणमयत्वसामाना
धिकरण्येन वह्न्यभावावगाहित्वं प्रतिबंधकतानवच्छेदकत्वात्। न च पाषाणमयत्वावच्छेदेन वह्न्यभावविषयितां नः प्राति पाषाण
मयत्वविशिष्टावगाहित्वं स्वनिरूपकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नावगाहित्वानात्मकत्वात्। ननु स्वावच्छिन्न
विषयकत्वावच्छिन्नेत्यत्र स्वव्यापकतत्त्वस्वरूपं पारिभाषिकमेवावच्छेदकत्वमस्तु प्रतिबंधकतासामान्यावच्छेदके स तत्र च
स्वरूपसंबंधरूपावच्छेदकत्वनिवेशे को दोष इति चेत्। वह्न्यभाववद्ध्रदत्वरूपस्यावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकता
सामान्यावच्छेदकीभूत[illegible]त्वावच्छिन्नयत्किंचिद्विषयितायाः वह्न्यभाववद्ध्रदत्वावच्छिन्नानिरूपितत्वेन तदवच्छिन्नावि

वह्न्यभाव

गं॰टी॰सा॰ षयकपदनीतिवि[redacted]षयतावच्छेदकत्वस्य तत्राभावेन वह्न्यभाववद्ह्रदत्वादेर्धर्तुमशक्यत्वेनासंभवापत्तेः व्यभि
११८ चार घटितबाधव्याभिशंकायामीदृशसमाधानासंगतेश्च तत्र धूमाँववद्धूमव्यभिचारिवह्निमत्त्वावच्छिन्नविषयकत्वावच्छि भा
118 न्नप्रतिबंधकतासामान्यावच्छेदकीभूतव्यभिचारविषयितायास्तादृशबाधत्वावच्छिन्नानिरूपितत्वात्। नचैवमपि वह्न्यभा
ववद्ह्रदत्वावच्छिन्नविषयकत्वस्य प्रतिबंधकताशून्यजातिमान् वह्न्यभाववानितिज्ञानसाधारणतया प्रतिबंधकतायाः स्वा
वच्छिन्नविषयकत्वव्यापकत्वाभावेन स्वपदेन वह्न्यभाववद्ह्रदत्वस्योपादातुमशक्यत्वेनासंभवोऽस्त्येवेति वाच्यम्। अव्यापक
विषयिताशून्यानाहार्याप्रामाण्यज्ञानानास्कंदितनिश्चयवृत्तित्वविशिष्टस्वावच्छिन्नविषयिताव्यापकप्रतिबंधकताया
एव निवेशनीयत्वात्। ननु स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकीभूतयत्किंचिद्विषयित्वं वह्न्यभा
ववद्ह्रदत्वावच्छिन्नविषयित्वमेव वक्तव्यं तच्च न संभवति तादृशयत्किंचिद्विषयितायाः अपि जातिमान् वह्न्यभाववानितिज्ञान
साधारणतया स्वव्यापकतत्कत्वरूपपारिभाषिकप्रतिबंधकतासामान्यावच्छेदकत्वस्य तत्रासंभवस्तदवस्थ्य एवेति चेन्न। अ संभवात्त्वद्
त्राप्यव्यापकविषयिताशून्यानाहार्याप्रामाण्यज्ञानानास्कंदितनिश्चयवृत्तित्वविशिष्टोपादाने वयत्किंचिद्विषयितायाग्राह्य
त्वात्। नचैवमपि ह्रदो वह्न्यभाववानितिज्ञानीयनिरूप्यनिरूपकभावापन्नविषयितान्तर्गतशुद्ध[redacted]तावच्छिन्नपर्याप्तिं चेद्विष
वह्न्यभाव

षयितायाः वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकतयाता दृशविषयितायास्तदव
च्छिन्नानिरूपितत्वेनवह्न्यभाववद्ध्रदत्वस्यापिप्रथमकल्पेयादृश्यादृश्या[illegible]धर्मावच्छिन्नानिरूपितमित्यत्रयादृशपदे
नधूर्तुश[illegible]क्यनतयात्पृथवेत्यादिद्वितीयकल्पेयद्धर्मावच्छिन्ननिरूपितत्वव्याप्यत्वमित्यत्रयद्धर्मपदेनधर्तुमश
क्यतयाव्यासंभवोदुर्वारएवेतिवाच्यम।प्रथमकल्पेपत्किंचिद्विषयितायाः स्वनिरूपकतावच्छेदकतापर्याप्त्यधिकरणध
र्मावच्छिन्ननिरूपितविषयितात्वेनप्रतिबंधकतासामान्यावच्छेदकत्वस्यविवक्षणीयतयाद्वितीयकल्पेयद्धर्मावच्छि
न्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकीभूतविषयितात्वमित्यत्रविषयितापात्प्रपिस्वनिरूपकता
८ वच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविषयितात्वेनप्रतिबंधकतासा[मा]न्यावच्छेदकत्वस्यविवक्षणीयतयास्वपदस्य
यत्किंचिद्विशिष्टविषयितापरतयास्वनिरूपकतावच्छेदकतापर्याप्त्यधिकरणीभूतहृदत्वावच्छिन्नविषयितात्वेनिरू न
प्यनिरूपकभावांतर्गततयात्किंचिद्विषयितायाः प्रतिबंधकतासामान्यावच्छेदकत्वाभावेनानुपपत्त्यभावादिति।यत्किं
चित्सदंवप्रमेयत्वविशिष्टव्यभिचारादावतिव्याप्तिवारणाय यनन्वत्रासाधारण्येकथंलक्षणसमन्वयः नहियद्धर्मप्रतिबंध
शस्य कतापक्षधर्मताज्ञानकालीनज्ञानात्पत्तिसनिवेशः संभवतिउक्तदोषात।प्रकृतानुमितिसप्रतिबंधकत्वपक्षधर्मताज्ञानवि

वह्न्यभाव

ग०टी०सा० शिष्टत्वोभयाभावस्य प्रतिबंधकतासामान्यपदार्थत्वे धूमव्यभिचारिवह्निमान् धूमवानित्यादौ व्यभिचारविषयित्वस्य व्यभिचारवृत्ति प

व्या त्ववाधविषयित्वावच्छिन्ननिरुक्तोभयाभावस्य तस्यानादृशबाधाव्याप्तेरिति चेन्न। प्रकृतानुमितिनिरूपितपक्षसाप्रतिबंधकत्वा

११९ भाववृत्तितोभयाभावकूटस्य पक्षसाध्यवैशिष्ट्यतदाप्रतिबंधकत्वपक्षधर्मताज्ञानकालीनत्वोभयाभावपरामर्शप्रतिबंधक

119 तासामान्यस्यवायद्रूपावच्छिन्नविषयित्वादिव्यापकत्वोपादानात्। वस्तुतस्तु पक्षधर्मताज्ञानकालीनत्वासाधारण्यविषयकत्वो

भयाभावविशिष्टत्वेनैव निरूप्यो विशेष्यः एवं च प्रतिबंधकतासामान्यनिवेशोऽपि पुनरिति। अत्र पाषाणमयत्ववत्सर्वतादेवीर

एणह्निशेष्यस्त्वं वैयर्थ्यमित्याशयेनाह समुदितलक्षणार्थ इति। अत्र यादृशपदेन दोषतानवच्छेदकोपादाने तेषामानंत्यात्तत्कू

टनिवेशे गौरवं गुरुतरप्रतीकांतरनिवेशापत्तिश्चेत्यतः यादृशधर्मपदेन दोषतावच्छेदकानुपादौ यादृशधर्मावच्छिन्नानिरू यथा

मानाधिकर पितत्वासौ[illegible]ण्यमेव निवेश्यमित्याशयेनाह। अथवेति परे तु। स्वनिरूपितविषयिताकविशिष्टनिरूपितविषयितात्वमिति द्वि

तीयनिरुक्तौ पाठः। ननु स्वनिरूपितविषयिताताकविशिष्टनिरूपिते स्वाधिकं। अत एव प्रथमनिरुक्तौ तादृशप्रतिबंधकतासा

मान्यावच्छेदकपर्याप्तिं किंचिद्विषयित्वमेवाभिहितं न तु स्वनिरूपितविषयिताकविशिष्टनिरूपितया किंचिद्विषयित्वमिति चे

त्सत्यं। प्रतिबंधकतावच्छेदकत्वं तदीयस्वरूपसंबंधविशेषः तथा सति एकदेशविषयिताया अपि तथात्वेन तस्यां वैशिष्ट्यनिरू

निरूपितत्वाभावादसंभवापत्तेः। परं त्वनतिरिक्तवृत्तित्वं तच्च स्वव्यापकतत्कत्वम्। एवं च यथा धूमव्यापकस्य वह्नेर्धूमत्वावच्छिन्न
समानाधिकरणभेदप्रतियोगितानवच्छेदकत्वं प्रतीयते तथा प्रकृतेऽपि व्यापकतार्थकपदसमभिव्याहृतपदार्थतावच्छेदका
ना वच्छिन्नसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वं स्यायनीयमिति। स्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकं स्वावच्छि त्वे
न्नविषयकत्वावच्छिन्नप्रतिबंधकतात्वं व्यापकत्वं निविष्टं वाच्यं। तत्र तत्तद्विषयिताव्यक्तीनामेव स्वपदार्थत्वेन ह्रदो वह्न्यभाव
वानिति निश्चयीयनिरूप्यनिरूपकभावापन्ननिखिलविषयिताव्यक्तीनामेव स्वपदेनोपादानसंभवादुक्तदोषतादवस्थ्यं तस्मा
दयमत्र लक्षणे शब्दाहल्लभ्यमपि स्वनिरूपकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नविषयित्वं विषयित्वपदेन विवक्षणी
यं तथा सति तादृशविषयितात्वरूपसमभिव्याहृतपदार्थतावच्छेदकावच्छिन्ननिरूपितव्यापकत्वलाभाद्वह्न्यभावविशिष्ट
ह्रदादिविषयितोपा[illegible]वस्वपदार्थ[illegible]केवलह्रदादिनिरूपितविषयितासमानाधिकरणभेदप्रतियोगितायां निरुक्तप्रति
बंधकतायाश्चावच्छेदकत्वेन केवलह्रदादेः स्वपदेन दुर्धरत्वान्न दोषावकाशः। एतल्लक्षणे च वह्न्यभावविशिष्टह्रदात्मकविशि
ष्टनिरूपितविषयितात्वरूपपदार्थतावच्छेदकावच्छिन्ननिरूपितव्यापकत्वलाभस्याभिमतस्य शब्दत एव संभवात्तथा नि
हितं नचानतिरिक्तवृत्तित्वनिवेशेऽपि ज्ञातिमान् वह्न्यभाववानिति प्रतिबंधकज्ञाने वह्न्यभाववद्ध्रदादिविषयित्वसत्त्वेन ताशस्व

निरूपितत्वयद्रूपावच्छिन्नविषयिता ४

ग०री०सा० पदार्थाप्रसिद्धिरिति स्वनिरूपितविषयिताव्यापकविषयिताशून्यनिष्ठप्रवृत्तित्वविशिष्टविषयितानामेवानतिरिक्तवृत्तित्वं निवेश्यं
१२० एवं च तादृशविषयितायाः स्वरूपसंबंधरूपावच्छेदकत्वनिवेशेऽपि नोक्तदोषावकाशः ह्रदो वह्न्यभाववानिति ज्ञानीयवह्न्यभावप्र
120 कारित्वादेरतथात्वात् केवलं तत्पदार्थज्ञानीयविषयितायाः प्रतिबंधकतानवच्छेदकत्वात् एवं प्रथमलक्षणेऽपीति बोध्यम्
यदि यद्रूपावच्छिन्नविषयितात्वं स्वविषयिताव्यापकतावच्छेदकमित्युच्यते तदा घटः पृथिवीत्यादिबाधमीपृथि प्र ४
वीत्वादिविषयितायानिरुक्ताव्यापकविषयिताशून्यज्ञानीयतया पृथिवीत्ववद्घटादिरूपबाधाव्याप्तिप्रसंगात् । यदि यद्रूपा
वच्छिन्नविषयितात्वं तादृशमित्युच्येत तदा वह्न्यभाववान् ह्रदो वह्निमानित्यादौ बाधभ्रममादायाव्याप्तिरिति । वस्तुतस्तु यत्किं
चिद्विषयित्वमित्यस्य किंचिद्रूपावच्छिन्नविषयितात्वेन प्रतिबंधकतावच्छेदकत्वविवक्षया सामंजस्यात् द्वितीयेऽपि पाठकल्प
नं तथैव । वह्न्यभावत्वावच्छिन्नप्रकारितायास्तद्व्यक्तित्वेनैवावच्छेदकत्वान्न तु वह्निर्नास्तीत्यप्रतिबंधकज्ञानसाधारणवह्न्य
भावत्वावच्छिन्नविषयितात्वेनेति सदोषादिति सारं । बाधेति । कालिकसंबंधावच्छिन्नप्रतियोगिताकायोगोलकाभाववद्वह्नि
मदयोगोलकं धूमवद्ह्रद इत्यादौ ह्रदो धूमवान् कालिकसंबंधावच्छिन्नप्रतियोगिताकधूमाभाववद्वह्न्यभाववद्मा
द्ह्रद इत्यादौ च बाधविशिष्टव्यभिचारेऽतिव्याप्तिर्दुष्टव्याः न तु धूमवान्वह्ने इत्यादौ संबंधांतरेण बाधविशिष्टव्यभिचार

विषयित्वस्य यत्किंचिद्विषयितान्तर्गतस्य यद्धर्मावच्छिन्ननिरूपितत्वात् तत्साधारणस्य तादृशविषयितात्वस्य यद्धर्मावच्छिन्ननिरू
पितत्वव्यभिचारित्वाच्च। प्रथमे स्वपदेनेति। इदं तु चिंत्यते स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकीभूतं
यत्किंचिद्विषयित्वं व्यभिचारविशिष्टबाधत्वावच्छिन्नविषयित्वं तच्च बाधविशिष्टव्यभिचारत्वावच्छिन्नानिरूपितमिति बा
धविशिष्टव्यभिचारत्वाद्यवच्छिन्नेऽनतिप्रसंगात्। न च ह्रदे वह्न्यभाववानिति ज्ञानयोः ह्रदत्वावच्छिन्नविषयितानिरूपितव
५ न ह्रदो वह्न्यभा ह्न्यभावत्वावच्छिन्नविषयिताकनिश्चयत्वेनैकरूपेण प्रतिबंधकत्वपावह्न्यभावविशिष्टह्रदत्वावच्छिन्नप्रतिबंधकतावच्छे
दकयत्किंचिद्विषयित्वं ह्रदवृत्तिवह्न्यभावत्वविशिष्टविषयित्वं तच्च वह्न्यभावविशिष्टह्रदत्वावच्छिन्नानिरूपितमित्यसंभवो
ऽतः स्वावच्छिन्नविषयितासमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नविषयितात्वं तद्रूपावच्छिन्नविषयि
ताशून्यज्ञानीयत्वेन स्वावच्छिन्ननिरूपितविषयिताकविशिष्टनिरूपितत्वेन वा यत्किंचिद्विषयित्वं विशेषणीयमिति ष
संगति ३ बाधविशिष्टव्यभिचारत्वावच्छिन्नेऽतिव्याप्तिरिति वाच्यं। कालिकादिसंबंधेन वह्न्यभाववतो ज्ञानस्याप्रतिबंधकतया स्वरूप
संबंधनिवेशस्यावश्यकतया स्वरूपसंबंधावच्छिन्नाधेयतामादायैकप्रतिबंधकताया दुर्घटत्वात्। न च स्वरूपसंबंधावच्छि
न्नवह्न्यभावत्वावच्छिन्नप्रकारतानिरूपितह्रदत्वावच्छिन्नविषयिताकनिश्चयत्वेनाधेयतासंबंधावच्छिन्नह्रदत्वाव

ग०टी०सा० च्छिन्नप्रकारतानिरूपितवह्न्यभावत्वावच्छिन्नविशेष्यताकनिश्चयत्वेन प्रतिबंधकत्वद्वयं नोपपद्यते किंतु स्वरूपसंबंधान्यसंबं

१२१ धानवच्छिन्नवह्न्यभावत्वावच्छिन्नवह्न्यभावत्वावच्छिन्नविषयितानिरूपसंबंधावच्छिन्नाधेयतासंबंधान्यसंबंधानवच्छिन्नह्रद रूपितस्व

कार २ त्वावच्छिन्नविषयिताकनिश्चयत्वेनैकमेव तावतापि संबंधांतरेण वह्न्यभावप्रकत्वानवारणादित्यसंभवः। अथवा संयंतोर्भेरिव प्रतीतिस्थले स्व

121 रूपसंबंधावच्छिन्नाधारतानिरूपिताधेयतासंबंधोभासते आधारस्य प्रथमांतत्वस्थले स्वरूपसंबंधावच्छिन्नाधेयतानिरूपि

ताधारतेति ह्रदत्वावच्छिन्नविषयितानिरूपिताधारत्वविषयितानिरूपितनिरूपविषयितानिरूपिताधेयत्वविषयितानिरूपि तत्वावि

तवह्न्यभावत्वावच्छिन्नविषयिताशालिनिश्चयत्वेन एकरूपेण प्रतिबंधकतयाऽसंभवस्तद्वारणाय स्वावच्छिन्नविषयित्वाव्याप

कविषयिताशून्यत्वादिच्छिकमावश्यकमिति नातिव्याप्त्यसंगतिरिति वाच्यं। अप्रामाण्यानास्कंदितमैनैकप्रतिबंधकतायाअसंभवात्

।वह्न्यभावाभाववतिवह्न्यभावप्रकारकत्वह्रदाभाववतिह्रदप्रकारकत्वादेर्ज्ञानाभावद्वयस्य निवेशे ह्रदे वह्न्यभाववानितिज्ञाने ह्र

दाभाववतिह्रदप्रकारकमिदमितिज्ञानदशायां प्रतिबंधकत्वानुपपत्तेः। यदि च वह्न्यभावत्वावच्छिन्नविषयितायां ह्रदत्वावच्छि

न्नविषयितायां च किंचिद्धर्मे विशिष्टविषयता विशिष्टविषयता विशिष्टान्यत्वमप्रामाण्यज्ञानानास्कंदितत्वं। प्रथमविशिष्टत्वं

स्वावच्छिन्नाभाववद्विशेष्यतानिरूपितत्वप्रकारतानिरूपितत्वोभयसंबंधेन। द्वितीयविशिष्टत्वं स्वसामानाधिकरण्योभयसंबं

न्नत्वप्रकारतानिरूपितत्वस्यावच्छि त्वं च स्वविशेष्यत्व १

श्रि

धेनस्वनिरूपकज्ञानँशिष्टज्ञानीयत्वस्वाश्रयप्रकारतावच्छेदकावच्छिन्नप्रकारितात्वोभयसंबंधेनेतिस्वविषयतावच्छेदकी
भूतप्रकारितानिरूपकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वप्रकारतानिरूपितविशेष्यतानिष्ठप्रका
निरूपितत्व रतानिरूपितँनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकताश्रयप्रकारतात्वसंबंधावच्छिन्नप्रतियोगिताकज्ञानसामान्या
भावोवाविषयिताद्वये निवेश्यः। प्रकारिताद्वयस्यावच्छेदकतायाः अवच्छेदकतावच्छेदकताकधर्मेस्यादिरीत्यावृत्तित्वप्रका
रतांतंनिरूप्यनिरूपकभावापन्नविषयतात्मकमेवोपादेयं। तेनवह्न्यभाववतिसंप्रकारकमित्यादिज्ञानव्युदासः। सामानाधिकर भावा
ण्यसंबंधेनस्वाश्रयज्ञानविशिष्टज्ञाननिरूपितत्वसंबंधेनस्वविषयताविशिष्टत्वंधर्मितावच्छेदकतायांनिवेश्यंतेनपुरुषां
तरीयाप्रामाण्यज्ञानास्कंदिताद्बाधनिश्चयादप्रामाण्यज्ञानास्कंदितबाधनिश्चयोत्तरतदनास्कंदितबाधनिश्चयाच्चानुमि
नु त्सुँसादविरोधः। एवंप्रामाण्यज्ञानाभावस्योत्तेजकत्वनिर्वाहाययत्किंचिद्धर्मविशिष्टविषयताविशिष्टान्यत्वमन्यदपि तत्रविशे
षणं। प्रथमविशिष्टत्वंचस्वावच्छिन्नत्वस्वावच्छिन्नवद्विशेष्यतानिरूपितत्वोभयसंबंधेनस्वनिष्ठावच्छेदकताकप्रकारतावृत्ति
प्रतियोगिताकत्वघटितसामानाधिकरण्यसंबंधेन। द्वितीयंचोक्तसंबंधेनस्वनिरूपकज्ञानविशिष्टज्ञानीयत्वस्वाश्रयप्रतियो
गिभूतप्रकारतावच्छेदकावच्छिन्नत्वोभयसंबंधेनेतिकथंचिदनुगम्यतेतत्रापिह्रदेवह्न्यभावः वह्न्यभाववान्ह्रद इतिज्ञानयोर्निश्च

ज्ञान ४

अथवा स्वनिरूपितत्वस्वावच्छेदकधर्मविशिष्टाश्रयवृत्तित्वोभयसंबंधेनप्रकारताविशिष्टविशेष्यतानिरूपकत्वमप्रामाण्यमिति

ग०टी०सा० यत्र स्यात्तन्नुमाप्रतिबंधकताभेद एव। अथ निश्चयत्वस्यापि कथं विरहानुगमः संभवस्तथा हि। वह्न्यभावत्वावच्छिन्नविषयिता
१२२ यां विरोधविशिष्टसंयोगसंबंधावच्छिन्नवह्नितावच्छिन्नप्रकारतानिष्ठप्रतियोगितावच्छेदकताकभेदवत्त्वं देयं। एवं वह्नित्वा
122 वच्छिन्नप्रकारतास्थाने वह्न्यभावाभावत्वावच्छिन्नप्रकारताप्रवेश्य दलांतरमपि देयं। उभयत्रापि स्वनिरूपकताननिरूपितविशेष्य त्यस्वनिरूपित
तावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वोभयसंबंधेन प्रतियोगितावच्छेदकत्वं निवेश्यं। तेन ह्रदो वह्निमान्न वा ह्रदो वह्न्यभा
ववान्न वेति संशयद्वयव्युदासः। न चैवमपि वह्न्यभावकोटौ विरोधावगाहि ह्रदो न संशयद्वयस्य कथं व्युदासः॥ विरोधानवच्छिन्न
स्व स्वरूपसंबंधावच्छिन्नप्रकारतान्यत्वं पूर्वोक्तविशेषणार्थत्वात्। द्वितीयपक्षे विरोधानवच्छिन्नस्वरूपसंबंधावच्छिन्नत्वेनाधा
विषयितान्यत्वसाध्यवत्पक्षविषयितात्वोभयाभावएव निवेश्यइति वाच्यं पर्वतोवन्हिमान्वन्हेरित्यादौ सिद्धिविषयस्यावा
रणात् हेतुमत्तानुमितेरपि सिद्धिप्रतिबध्यत्वात् यदि तु पक्षांशे साध्यव्याप्यहेत्ववगाहित्वाभावं निवेश्यपरिष्कारः साध्य
व्याप्यहेतुविधेयिकानुमितिश्चाधिकावगाहितयान सिद्धिप्रतिबध्येत्युच्यते तदापि सद्धेतौ साध्यव्याप्यहेतुमत्पक्षेऽति
व्याप्तिर्दुर्वारैव तादृशहेत्वनुमितौ तादृशहेतुविषयकसिद्धेः प्रतिबंधकत्वात्तादृशहेतुमत्पक्षविषयितायां तद्रूपावच्छि
न्नविषयितान्यत्वाभावात् एवं साध्यव्याप्यहेतुरूपसिद्धिविषयवारणाय हेतुमत्पक्षविषयतान्यत्वमावश्यकं तदुपादाने ह्र
दोवन्हिमान्वन्ह्यभावादित्यादौ बाधाव्याप्तिः यद्रूपावच्छिन्नविषयताशालिनिश्चयोत्तरानुँति सामान्ये पक्षेसाध्यावगा मि
हित्वाभावस्तद्रूपावच्छिन्नविषयितान्यत्वहेतुमत्पक्षविषयितात्वोभयाभावविवक्षणेनु पर्वतोवन्हिमान्वन्हेरित्यादौ सिद्धिविष
योदुर्वारः नचसाध्यवत्पक्षविषयितान्यत्वे सति साध्यव्याप्यहेतुमत्पक्षविषयितान्यत्वोक्तौ पर्वतोवन्हिमान्वन्ह्यभावादित्यादौ स्व
वे रूपासिद्धौ वन्हिव्याप्याव्याभावन्धूमभयवान्धूमादित्यादौ वन्हिव्याप्यवत्पर्वतत्वरूपबाधेऽव्याप्तिरतः उभयाभावप्रतियोगिप्रविष्टप्र
काराभाववत्तादृशविशेष्यविषयितान्यत्वसाध्यवत्पक्षविषयितात्वोभयाभावत्वं बहिर्भूततत्वं नार्थइति वाच्यं तथापि सा
मानाधिकरण्येनवन्हितदभावयोः साध्यसाधनभावस्थले साध्यवत्पक्षेतिव्याप्तेः नचोभयाभावप्रतियोगिकोटिप्रविष्ट

सा॰ विशेष्यविशेष्यकताहृशप्रकारप्रकारकत्वावच्छिन्ननिरूपितप्रतिबंधकतानवच्छेदकत्वसाध्यवत्पक्षविषयितात्वोभया

१५९ भावववत्वस्यबहिर्बभूतत्वांतार्थत्वेपिनिस्तारः निर्वन्हिः वन्हिमानित्यादिस्थलीयदोषाव्याप्तेश्चयद्यप्यत्रवदंतीत्यादिकृत्स्ने

159 तदव्याप्तिरस्वरसबीजमेवनहितस्याः विरोधित्वाप्रसिद्धिनिबंधनत्वमात्रमपितुविषयिताप्रसुक्तत्वात्प्रसिद्धिनिबंध

नत्वमपिप्रातिविरोधितात्प्रसिद्धेर्नक्षतिकरीतथाचोक्तविरोधित्वंसुनिवेशमेव तथाप्याहार्यमतेतदव्याप्तेरसत्वादिदानींताहृश प

विरोधित्वनिवेशायितुमशक्यमेव नवानाहार्यमानसज्ञानघटितविरोधि[illegible]त्वानिवेशात्तल्लक्षणसमन्वयः सुवचः तथाप्य

नुमितिघटितलक्षणेविरोधित्वसत्वेनतदव्याप्तिर्वज्रलेपायते अत्रवदंतियत्रसिद्धिविषयस्यलक्ष्यतातत्रानुमितिघटितलक्ष

णेविरोधित्वंनप्रवेश्यतेप्रयोजनाभावात् एवंचनोक्तस्वरूपासिद्धाव्याप्तिःनापिनिर्वन्हिर्वन्हिमानित्यादिस्थलीयदोषास

ग्रहइतिअथोभयाभावप्रतियोगितावच्छेदकगर्भेत्यादिरीत्यानिरुक्तप्रतिबंधकतावच्छेदकत्वरूपंविरोधित्वंकुतोनोच्यते

निर्वन्हिर्वन्हिमानित्याकारकानुमित्यप्रसिद्ध्याऽप्रतिबंधकतयासिद्धिविषयेतिव्याप्त्यभावेनतत्रविरोधित्वानुपादानेनसामंज

स्यादितिचेन्न पर्वतोवन्हिमान्वन्हिमत्त्रिर्वन्हिकालीनधूमादित्यादौह्रदेसामानाधिकरण्येनजलस्यसाध्यत्वेह्रदत्वसामानाधि

करण्येनजलाभावघटितेजलवज्जलाभाववत्कालीनजलाभाववद्ह्रदादिहेतौचविरोधित्वानुपादानेसिद्धिविषयेऽतिव्या

२

धेः॥ नतूपादानेनतुवह्निमत्त्वावच्छेदेनवह्निमत्त्वरूपजलत्वावच्छेदेनजलत्वस्वरूपसाधनाप्रसिद्ध्याव्याप्तेःयदिचोभयाभावप्र
तियोगिकोटौयदंशोयेनसंबंधेनयदवगाहित्वंप्रविष्टंतदंशेतेनसंबंधेनतत्प्रकारकज्ञानत्वोपस्थावच्छिन्नप्रतिबंध्यता
निरूपितप्रतिबंधकतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभाववत्त्वसाध्यवत्पक्षविषयतात्वोभयाभाववत्त्वरू
पंविरोधित्वमेकोक्त्यानिर्वहतीतिमन्यतेतदापिलाघवादेवसाध्यवत्पक्षविषयितावहिर्भूतत्वमात्रंसिद्धिविषयस्याल
क्ष्यतारूढत्वेउपादेयंनतुतल्लक्ष्यतारूढत्वेशब्दैकत्वस्यानुपादेयत्वादितियत्त्वथैतस्याशंकायांनिर्वह्निःपर्वतोवह्निमानित्यादौ
नदोषःस्यादित्येनसजातीयदोषदौर्लभ्यमभिप्रेतंवह्निव्याप्यवन्ह्यभाववान्पर्वतइतिज्ञानस्याप्याहार्यत्वेनप्रतिबध्यताव
च्छेदकविषयितादौर्लभ्येनप्रयुक्तत्वाप्रसिद्धेःवसत्वेनप्रकृतदोषस्यापिसजातीयत्वादितिकिंसमाधानेनेतितन्न॰परेतु
मतेसमाधानस्यापेक्षितत्वात्॰ननुयद्विषयकनिश्चयेऽप्रामाण्यग्रहाभावोनिवेश्यतेतत्रप्रयोजनाभावेनसाध्यवत्तानि
श्चयीयाप्रामाण्यज्ञानाभावेननिवेशयामइतिसिद्धिविषयकदासःअप्रामाण्यज्ञानास्कंदितसिद्ध्युत्तरानुमितावुभयाभा
वस्यैवासत्त्वादितिकिंविरोधित्वनिवेशप्रयासेनेतिचेन्न॰पर्वतोवह्निमान्वह्निमत्पर्वतादित्यादौवन्ह्यभाववद्वृत्तित्ववन्हि
मत्पर्वतरूपव्यभिचारसंग्रहायसाध्यवत्पक्षज्ञानीयाप्रामाण्यग्रहाभावस्यावश्यकत्वात्॰अत्रकेचित्तुसाध्यवत्ता

सा॰ निश्चयीयानुगतसाध्याभाववतिसाध्यप्रकारकत्वरूपाप्रामाण्यग्रहाभावो न निवेश्यः प्रयोजनाभावात् किंतु कव्यभिचा
१६० 160 रसंग्रहायाननुगततदभावः अननुगताप्रामाण्यज्ञानानामप्यप्रामाण्यज्ञानत्वानुगतरूपेणाभावनिवेशेपत्रवि ध्ये
षयविशेषेतादृशाप्रामाण्यशून्यकालीनयद्विषयकनिश्चयोप्रसिद्धस्तत्कालीयदोषाव्याप्तेः एवंचाप्रामाण्यग्रहका
लीनसिद्ध्युत्तरानुमितौ नोभयाभाव इति कथंसिद्धिविषयेऽतिप्रसंग इत्यारुचिः पत्रेति नन्वत्रापि दीधितिकाराणामभिप्रा
यः यद्विषयकनिश्चयेनाहार्यत्वं नेच्छाजन्यत्वं किंत्विच्छाविशिष्टान्यत्वं एवंचेच्छाकालीनसिद्धेरनाहार्यत्वाभावादेवचातिप्रसं
गप्रसक्तिः भट्टाचार्याणांतु विषयविशेषमवलंब्यातिप्रसंगप्रसंजनाभिप्रायं नावधारयामः नच विनश्यदवस्थेच्छाजन्याहा
र्यज्ञानवारणाय स्वाव्यवहितोत्तरत्वस्वसामानाधिकरण्योभयसंबंधेनेच्छाविशिष्टान्यत्वं वाच्यं तथाच पत्रक्रमेण प्रात्यक्षिकीसि
द्धिपरामर्शसिसाधयिषानुमितयः तत्र सिद्धेर्निरुक्तानाहार्यतया तदुत्तरानुमितावुभयाभावासत्वेनातिव्याप्त्यसंभवाद्भट्टाचार्या
णां तदनुधावनमिति वाच्यं यद्विषयकनिश्चयाव्यवहितोत्तरेत्यत्र तत्तृतीयक्षणाव्याप्तेः नाव्यवहितोत्तरत्वस्य निवेशे नादोषादिति
चेन्न यत्र विषयविशेषेच्छाविशिष्टान्ययद्विषयकनिश्चयोप्रसिद्धस्तत्राव्याप्तिवारणायेच्छाजन्यत्वपर्यंतमावश्यकमिति भट्टा
चार्याणामाशयात् पक्षांशेऽधिकावगाह्यनुमित्युपादानाच्च विषयतामात्रमिति अन्यथाऽनाहार्यमानसेच्छाघटितसामग्र्य

भावप्रयुक्तोभयाभावसत्वेननिर्वह्निः पर्वतोवह्निमानित्यादौ घटादावतिव्याप्तेरित्यर्थः मात्रपदेनविरोधित्वविशेषणव्यवच्छे
दः विशिष्टांतरविषयितात्वेति अत्रमेयत्वविशिष्टाव्यभिचारवारणाय स्वविषयिताप्रयोज्यत्वनिवेशनं अन्यथातादृशाभ
याभावप्रयोजकीभूतायां पक्षेसाध्यावगाहित्वाभावाधिकरणतायां विशिष्टांतरविषयित्वाप्रयोज्यत्वसत्वेनातिव्याप्तेः स्वपूर्व
वृत्तिज्ञानीयप्रतिबंधकतावच्छेदकविषयितायाः स्वनिष्टप्रतिबध्यतावच्छेदकधर्माभावाधिकरणताप्रयोजकत्वात्साम
ग्र्याभावप्रयुक्ततादृशसाध्यावगाहित्वाभावाधिकरणतायां तादृशविषयितायाप्रयोजकत्वात् नचविषयिताप्रयुक्तत्वमे
वास्तु तत्र किंस्वविषयित्वविशेषणेनेतिवाच्यं पर्वतोधूमाभाववानितिभ्रमात्मकबाधज्ञानीयप्रतिबंधकतावच्छेद
कविषयिताप्रयुक्तसाध्यावगाहित्वाभावाधिकरणतायां विशिष्टांतरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वसत्वे
नतत्रैवमेयत्वविशिष्टव्यभिचारादावतिव्याप्तेः धूमाभाववत्पर्वतात्प्रसिद्ध्या विशिष्टांतरपदेनबाधस्यधर्तुमशक्यता
त्वनचस्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकावच्छिन्नयत्किंचिद्विशिष्टनिरूपितविषयितात्वव्यापकरूपाव
च्छिन्नाप्रयोज्यत्वनिवेशमपेक्ष्यलाघवात्स्वावच्छिन्नविषयिताशून्यप्रतीतिविषयतावृत्तिरूपावच्छिन्नाप्रयोज्यत्वनि
वेशेनव्यभिचारघटितबाधसंग्रहसंभवे व्यापकत्वगर्भपर्यंतनिवेशोनिष्प्रयोजनः तथाचस्वीयत्वानुक्तावपिमेयत्ववि

सा०
२६१
161

शिष्टव्यभिचारेणातिव्याप्तिः प्रमेयत्वविशिष्टव्यभिचारविषयिताशून्यदर्शितभ्रमात्मकबाधज्ञानविषयताप्रवृत्तियत्किंचिद्रूपावि
रूपकभावापन्नबाधविषयितात्वं तदवच्छिन्नप्रयोज्यत्वसत्त्वादिति स्वीयत्वं व्यर्थमिति वाच्यं तथा सत्यसंभवापत्तेः व्यभि
चारत्वाद्यवच्छिन्नविषयिताशून्यभ्रमात्मकव्यभिचारप्रतीतिविषयताप्रवृत्तियत्किंचिद्विषयितात्वं तदवच्छिन्नप्रयोज्यत्व
सत्त्वात् व्यभिचारप्रमाविषयताया अपि तदवच्छिन्नत्वात् प्रतीतेः प्रमात्वविशेषणे तु मेयत्वविशिष्टव्यभिचारवारणा
य स्वीयत्वस्यावश्यकत्वात् अथ स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकः स्वानवच्छिन्नप्रकारतावच्छेदको
वा यो धर्मस्तदवच्छिन्नविषयिताप्रयोज्यत्वमेव विवक्षितं तद्विशिष्टविषयिताप्रयोज्यत्वनिवेशप्रयोजनाभावा
त् एवं चोक्तभ्रमीयपर्वतत्वधूमाभावोभयावच्छिन्नविषयितात्वव्यापकरूपावच्छिन्नप्रयोज्यत्वसत्त्वादेवादोषात्स्वी
यत्वं व्यर्थमेवेति चेदेवमपि पाषाणमयत्वावच्छेदेन धूमाभावनिश्चयविशिष्टपाषाणमयत्ववत्पर्वतनिश्चयः पाषाणमय
त्वत्वेन घटावगाहितत्र घटस्य स्वरूपतो भानाद् घटविशिष्टपर्वतविषयितात्वव्यापकं न घटवत्पर्वतविषयितात्वं नापि पाषाणम
यत्वत्वावच्छिन्नविषयतानिरूपितपर्वतत्वावच्छिन्नविषयितात्वमिति स्वीयत्वस्यावश्यकत्वं बोध्यं (इदमत्रावधेयं यत्कि
ञ्चिद्विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वनिवेशमपेक्ष्य यत्किंचिद्विशिष्टान्तरविषयिताप्रवृत्तिरूपानवच्छि)

५

यत्तु भ्रमात्मकमेयत्वविशिष्टव्यभिचारविषयकनिर्णयोत्तरानुमितिनिष्ठतादृशोभयाभाववत्तायांयत्किंचिद्विशिष्टविषयि १ त=
तात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वमितित्त्वीयत्वनिवेशः तथाचत्त्वीयविशिष्टव्यभिचारविषयित्वाप्रयुक्तत्वान्नातिव्याप्ति
रितिन तुच्छं निरूप्यनिरूपकभावापन्नविषयितासाधारणरूपस्यैवव्यापकतयातदवच्छिन्नप्रयोजकत्वाकत्वात् यदपितादृशवि
षयितात्वव्यापकंयद्विषयितामात्रंतदवच्छिन्नप्रयोज्यतासत्वादसंभव इति तदपि तुच्छं विषयितात्वमात्रस्य प्रतिबंधकता
नवच्छेदकतया प्रयोजकतानवच्छेदकत्वात् ननु व्यभिचारघटितबाधविषयितायाः भ्रमव्यभिचारविषयितात्वेनोभयाभावप्रयो
जकीभूतविशिष्टपक्षेविशिष्टसाध्यावगाहित्वाभावप्रयोजकत्वासंभवेपिबाधविषयितयासार्धं निरूप्यनिरूपकभावापन्नवि
षयितात्वेन व्यभिचारविषयितायाः तत्प्रयोजकत्वमक्षतमेवेति अव्याप्तिरितिशंकते ननु चेति दोषैकदेशमादायासंभवस्यसंभ
वेपितादृशविशिष्टांतरोपादाने व्यापकत्ववैयर्थ्यमित्यतोवास्तवं व्यापकत्वनिवेशप्रयोजनमव्याप्तिरेवतादृशत्वं तु व्यर्थमित्याश
यः यत्किंचिदिति अत्र यत्किंचिदिति किमर्थं विशिष्टांतरशब्देनस्वाभिन्नदोषसामान्यसंग्रहात्तद्विषयितात्वव्यापकं मेयत्वादिक
मेवेति न तदवच्छिन्नविषयित्वाप्रयोज्यत्वप्रयोज्योभयाभावाधिकरणताकत्वस्य भ्रमपेत्वविशिष्टव्यभिचारादेः सत्वादतिव्याप्ति
रिति तदुपादानं नचैकदोषस्ययत्किंचित्पदेनोपादानेपि तद्विषयितात्वव्यापकत्वस्य मेयत्वे सद्भावेन तदवच्छिन्नाप्रयोज्यत्वे स्यादि

सा॰ क्रमेणप्रमेयत्वविशिष्टे व्यभिचारेतिव्याप्तिर्दुर्वारैवेतिवाच्यं स्वघटकव्यापकीभूतव्यभिचारविषयितात्वावच्छिन्नप्रयोज्यत्वसत्वेनतादृ
१६२ शरूपावच्छिन्नप्रयोज्यत्वसामान्याभावासंभवात् व्यापकत्वं च तत्समानाधिकरणभेदप्रतियोगितानवच्छेदकत्वं व्यभिचारादी॥
ति॰ व्यभिचारघटितबाधघटकव्यभिचारविषयितायां रूपद्वयं वर्ततेएकं च्छन्नूव्यभिचारविषयितात्वं अपरं च पूर्वोक्तंसाध्याभावप्रकारि
162 तानिरूपितपक्षविशेष्यितानिरूपितव्यभिचारविषयितात्वपर्यवसितंतेनरूपेणचव्यभिचारविषयतायाः प्रयोजत्वेपितादृशवि
षयितात्वस्यनयत्किंचिद्विशिष्टांतरविषयितात्वव्यापकत्वमपितुकेवलव्यभिचारविषयितात्वस्यैवतेनरूपेणतुस्वविषयिताप्रयु
क्तायाः पक्षेसाध्यावगाहित्वाभावाधिकरणतायाः बाधांतःपातिव्यभिचारविषयितायामपिनप्रयोजकत्वमितिभावः विशिष्टांतरविषयि
तादृशनिरूपावच्छिन्नाप्रयोज्यत्वोपादानेइतरविषयितानिरूपितव्यभिचारविषयतात्वेनप्रयोजकत्वाद् व्याप्तिरितित
त्रव्यापकत्वनिवेशः अतएवविशिष्टांतरविषयितात्वावच्छिन्नाप्रयोज्यत्वोपेक्षा इतरविषयितानिरूपित
त्वसहितव्यभिचारविषयितात्वेनव्यभिचारघटितबाधांतःपातिव्यभिचारविषयितायाः प्रयोजकत्वात्अव्या
प्तिरितिप्रयोजकतावच्छेदकतापर्याप्त्युपादानेप्रमसाधारणनिरूप्यनिरूपकभावापन्न॰ विषयि
तात्वेएवलघुपर्याप्तिसत्वेनतद्धारणेपिअसंभवोगौरवंवोध्यः तेनैवरूपेणेतिबाधविषयितांतःपाति
व्यभिचारविषयितायाः व्यभिचारविषयितात्वेनकुतोनप्रयोजकत्वमितिशंकानिरासाय [illegible] १६२ ७

१ इदमत्रावधेयं। यत्किंचिद्विशिष्टांतरविष। पितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वनिवेशमपेक्ष्य यत्किंचिद्विशिष्टांतरविषयितावच्छिन्निरूपानवच्छि१

न्नप्रयोजकताकत्वमेव निवेश्यतां व्यापकत्वानिवेशेन लाघवात् व्यभिचारघटितबाधविषयता निष्ठप्रयोजकता
याः ऽकृद्व्यभिचारविषयतात्वेनानवच्छिन्नतया तादृशबाधाव्याप्तेर्वारणात्। न च ऽसमव्यभिचारी वह्निर्धू
मवान्वह्नेरित्यादौ तादृशबाधाव्याप्तिः तादृशयत्किंचिद्विशिष्टांतरविषयितावृत्तिबाधविषयितात्वेन बाध
विषयितानिष्टप्रयोजकत्वस्यावच्छिन्नत्वादिति व्यापकत्वनिवेशः ध्रौव्ये तत्कल्पे किं लाघवमिति वाच्यं ता
वतापि तत्कल्पे उभयाभावाधिकरणतायामेव तादृशविशेषणानिवेशेन लाघवात्। पूर्वकल्पे चोभया
भावप्रयोजकाभावाधिकरणतायामिति गौरवात् व्यभिचारघटितबाधविषयता निष्टप्रयोजकतायाः ता
शि दृशबाधविषयितात्वावच्छिन्नायाः तादृशविशिष्टांतरविषयितात्वव्यापकरूपानवच्छिन्नतयाऽव्याप्त्य
नवकाशात्। अत एव यादृशबाधो निपमेन सत्प्रतिपक्षज्ञानविषयस्तत्रापि नाव्याप्तिः तत्रापि प्रयोज
कताद्वयसत्वेन बाधविषयता निष्ठप्रयोजकतायां तादृशरूपानवच्छिन्नत्वेन लक्षणसमन्वयसंभवा
त्। न चेदृशस्थले मानाभावः आधेयताऽभाववदनिरूपिताधेयतात्वादित्यादौ अभाववन्निरूपितत्वाभा

सा. ववदवृत्तिमदाधेयतारूपसत्प्रतिपक्षस्याभाववन्निरूपितत्वविशिष्टाधेयतारूपबाधघटितत्वस्यजागरूकत्वा
१६३ त्.यत्तुहृदत्वावच्छेदेनवन्हेःसाध्यत्वेहृदत्वसामानाधिकरण्येनवन्ह्यभावघटितेहृदत्वावच्छेदेनवन्ह्यभावघटितबा
163 धेपिस्वरूपसंबंधघटितवन्ह्यभाववद्धृदात्मकविशिष्टांतरविषयिताप्रयोज्यत्व तादृशाधिकरणत्वाभावप्रयुक्ताव्याप्ते
रपिनावकाशइतितन्न.प्रतिबंधकताघटितलक्षणाव्याप्तिप्रसंगात्.यत्तुतत्रयत्किंचित्प्रतिबंधकताघटित
विशिष्टांतराघटितत्वमभिहितंतदपिशिथिलमेवतद्धर्मावच्छेदेनतद्विशिष्टबुद्धौतद्धर्मावच्छेदेनप्रकाराभा
वग्रहस्याविरोधित्वेपिधर्मितावच्छेदकावच्छेद्यत्वविषयितायास्तेनवच्छेदकतयाऽवच्छेद्यत्वाघटितवन्ह्यभावव ८
द्धृदविषयितात्वव्यापकत्वस्यस्वावच्छिन्ननिरूप्यतायामसत्वात्.एवंयत्किंचिद्विशिष्टांतरविषयतावृत्तिरूपेणावच्छेद्य
त्वाघटिततादृशविषयितात्वेनैवप्रकृतपक्षेव्यापकत्वविशिष्टसाध्याभाववदवगाहित्वाभावाधिकरणताप्रयोजकतायाऽवच्छिन्न
त्वात्.अवच्छेद्यत्वाघटिततादृशविषयितात्वस्यतादृशप्रयोजकतानवच्छेदकत्वात्इतितदलक्ष्यतायाएवोररीकरणीयत्वा
त्.यत्तुभ्रमात्मकमेयत्वविशिष्टव्यभिचारविषयकनिर्णयोत्तरानुमितिनिष्ठतादृशोभयाभाववत्तायांयत्किंचिद्विशिष्टांतरविषयि

(तात्वे एवतं न्नयाप्तिसत्वेन तद्दारणेपि असंभवो गौरवं वोध्यः तेनैव रूपेणेति वाध विषयि
तातःपातिव्यभिचारविषयिताया: व्यभिचारविषयितात्वेन कुतो न प्रयोजकत्वमिति शं
कानिरासाय) इतउत्तरं स्वविषयिताप्रसुक्तत्वनिवेशफलं छलतो दर्शयति मे य त्वे ति स्वविष
यिताप्रसुक्तत्वानुपादाने च विशिष्टांतरविषयिताप्रसुक्तायाः साध्यवत्पक्षावगाहित्वाभावाधिकरणता नवता=
याः सत्वादतिप्रसंग इति तदुपात्तं उभयाभावप्रयोजकाभावाधिकरणतासामान्यनिवेशो ऽव्याप्तिशंका
यत्किंचिदधिकरणतां निवेश्य निरस्यति बाधेति: समूहालंवनात्मकबाधादिज्ञानं सार्वत्रिकमिति हृदयं
अभावाधिकरणतापदोपादानमेवाधिकरणतापर्यंतोपादानफलसूचकं क्वचित्तु बाधादिविषयिताप्र ल
योज्यस्य साध्यादिमत्वावगाहित्वविरहस्य सत्प्रतिपक्षादिरूपविशिष्टांतरविषयिताप्रयोज्यत्वनि
यमादसंभव इति उभयाभावप्रयोजकाभावे विशिष्टांतरविषयिताप्रयोज्यत्वमनिवेश्य तादृशा
भावाधिकरणतायां तन्निवेशः तथा सत्यधिकरणतायाऽधिकरणभेदेन भिन्नतया एवं वृत्तिज्ञानी

सा॰ २६४ 164

यप्रतिबंधकतावच्छेदकधर्मस्यैव तदुत्तरोत्पन्नप्रतिबध्यतावच्छेदकधर्माभावाधिकर
णताप्रयोजकत्वेन वाधादिनिश्चयोत्तरोत्पन्नानुमितिनिष्ठसाध्यादिमत्त्वावगाहित्वा
भावाधिकरणतायां सत्त्वाति पक्षविषयतायाः प्रयोजकत्वेन सामंजस्यादित्यनुपदं
दृश्यते व्यभिचारादीतिः व्यभिचारघटितवाधनिश्चयोत्तरानुमितौ उभयाभावाधिकर
णताप्रयोजकत्वं व्यभिचारविषयितायाः व्यापकाभावप्रयोजकस्येति न्यायात् व्याप्त्या
घवगाहित्वस्य निरुक्तोभयव्यापकत्वात् कृद्दोषमवाञ्चन्केरित्याबुभयाभावस्यैकतया दा
व्याप्त्याद्यवगाहिताधिरहद्वारा विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नप्रयोज्यत्वेपि घि
अधिकरणभेदेनाधिकरणतानां भेदादुभयाभावाधिकरणतायामेव तन्निवेशोक्ति
त्याशंकावारणाय व्यभिचारघटितवाधाव्याप्त्यनुधावनं अथैतल्लक्षणे एतादृशा वि

शिष्टांतराघटितत्वनिवेश एवंच वस्तुमात्रनिश्चयानंतरमित्यादिना यद्विरोधिविषयिता
प्रयुक्तत्वदलप्रयोजनं तदसंगतमापद्येत. तथाहि निर्वह्निः पर्वतो वह्निमान् धूमादित्यादौ निरुक्त
भयाभावप्रयोजकीभूताया पर्वतत्वविशिष्टे वह्न्यभाववैशिष्ट्याभावाधिकरणतानस्या घटादिविषयिताप्रयोज्यत
यास्त्वपदेन घटाद्युपादानासंभवेन वि-शिष्टांतराघटितत्वस्यैवाभावात्. अत्र केचित्तु न तावत्प्रथमं विशिष्टांतराघटि
तत्वरूपविशेषणनिवेशः परं तु नादृशलक्षणे उक्ते तदंतर्वर्तिविशेषणस्यैव व्यावृत्तिः प्रथममनुचिते तस्मात् एवं प्रथममुक्तौ
ततः समुदितलक्षणमेयत्वविशिष्टव्यभिचारादावतिव्याप्त्याशंकायां विशिष्टांतराघटितत्वं निवेशनं तत्रापि यथाश्रुतेव्य
भिचारघटितबाधादेरसंग्रहापत्त्या एतादृशप्रकारोनुसरणीय इति न संदर्भविरोध इति तन्न. विशेष्यदले विरोधिविषयिता
प्रयुक्तत्वे पर्य्यस्य पश्चात् दृष्टत्वे विशेष्यदले विरोधिविषयिताप्रयुक्तत्वाभिधानविरोधात्. न चैवमप्यावश्यकविशिष्टां
तराघटितत्वस्य विरोधिविषयिताप्रयुक्तत्वघटितत्वलाभाय हि तथाभिधानमिति वाच्यं तथापि स्वावच्छिन्नविषयकप्रतीतिविषयताव

स्वविषयिताप्रयोजकत्वं=२

सा. १६५. 165

छेदकपद्रूपावच्छिन्नविषयिताशालिनिश्चयोत्तरानुमितौ विरोधिविषयिताप्रयुक्तोभयाभावस्तद्रूपावच्छिन्नाघटितत्वरूपतादृशवि
शिष्टांतराघटितत्वस्यव्यभिचारघटितबाधघसंग्राहकतयादुर्निवेशत्वात्पारिभाषिकेतच्चेतरांशावद्विरोधिविषयिताप्रयुक्तत्व
निवेशस्यकस्यानपेक्षणात् अन्येतु अतिव्याप्तिवारकतयाप्रथममेवतद्विशेषणंलक्षणेनिविष्टंतदर्थंचस्वविषयिताप्रयोज्यविशि
ष्टांतरविषयित्वाप्रयोज्यनिरूक्तोभयाभावप्रयोजकाभावाधिकरणताकंयद्यत्तदन्यत्वमेव. तथाचनिर्वह्निः पर्वतोवह्निमानित्या
दौतादृशोघटादिरपिइतितद्वारणायविशेष्यदलेविरोधिविषयिताप्रयुक्तत्वनिवेशः अत्रलक्ष्येलक्षणंसंगमनीयंयदितदा
किंचिद्विशिष्टंलक्ष्यमेवस्वपदेनधर्तव्यंनतुश्क्रद्वमन्यथाविशिष्टांतरविषयिताप्रयोज्यश्क्रद्वस्वविषयिताप्रयोज्यतादृशाभावा
धिकरणतायाऽप्रसिद्धत्वादसंभवापत्तेः अलक्ष्येचश्क्रद्वमलक्ष्यमेवस्वपदेनधर्तुंशक्यतएवेतिनातिव्याप्तिः ननुचैवमपिव्य
भिचारविशिष्टमेयत्वेऽतिव्याप्तिः व्यभिचारविशिष्टमेयत्वादिविषयितात्वेनप्रतिबंधकतानवच्छेदकतयास्व
विषयिताप्र·योज्यतादृशाधिकरणतायाऽप्रसिद्धेः स्वपदेनतदुपादानासंभवेनतत्रतादृशाधिकरणताकान्यत्वरूप

प्रमेयत्वव्यभिचारित्वाभावे=४

विशिष्टांतराघटितत्वस्यत्वाद्विशेष्यदलं सत्ताद्वैत्तिवाच्यं विशेष्यदलेऽपि विरोधिविषयितायां स्वनिरूपितत्वस्य निवेशनीयत्वात्
न चानुयोगिनिस्वत्वांतर्भावेणैव तादृशमेयत्वादेर्वारणात् विशेष्यदले स्वीयत्वं व्यर्थं वस्तुमात्रनिश्चयानंतरमिति ग्रंथ
स्वरसतूद्ध एवास्त्विति वाच्यं अनुगमार्थमेव प्रतियोगिनिस्वत्वांतर्भावात् प्रतियोगिनिस्वत्वांतर्भावमभिप्रेत्य वस्तुमा
त्रनिश्चयानंतरमित्यादिग्रंथसंगमनाद्वेत्याहुः तदसत् तथा सति बाधादावसंभवापत्तेः बाधादेः स्वविषयिताप्रयोज्यबा
धसत्यनिपक्षज्ञानोत्तरज्ञाननिष्ठपक्षसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणताकत्वात् यदि च विशिष्टांतरविषयिताप्र
योज्यस्वविषयिताप्रयोज्यतादृशाभयाभावप्रयोजकाभावाधिकरणतासामान्यकं यत् तदन्यत्वं विशिष्टांतरविषयिताव्यापक
रूपावच्छिन्नस्वविषयितानिष्ठप्रयोजकताकाधिकरणताकं यद्यत् तदन्यत्वं वा निवेश्यते तेन दृशानासंभवः किंतु व्यभिचारविशिष्टमे
यत्वादिविषयकत्वेनाप्रतिबंधकतया तद्विषयताया तादृशाधिकरणताप्रयोजकत्वासंभवात्तद्वारणाय विशेष्यदले विरो
धिविषयितायां स्वीयत्वं निवेश्यमिति नासंगतिरिति। इदं तु बोध्यं अनुयोगिनिस्वत्वांतर्भावेन तदनंतर्भावेण वा तादृशवि
शेषणनिवेशकत्वे विशेष्यदलेऽनुमितिनिवेशकत्वे विरोधिविषयिताप्रयुक्तत्व विशेषणस्य सिद्धिनिषयेऽतिव्याप्तिवार

सा०
१६६
166

कृता अनाहार्यमानसज्ज्ञाननिवेशकल्प्येतु अनुयोगिनिरूत्वांतर्भावेन नावच्छिन्नविषयता प्रयुक्तत्वमपि निविशते ऽतिव्याप्त्यभावात्
मतियोगिनिरूत्वांतर्भावेतु सिद्धिविषयेतिव्याप्त्यभावेपि वस्तुमात्रेतिव्याप्तिवारकतयैव विषयताप्रयुक्तत्वमात्रं न तु विरोधित्वप
र्यंतं प्रयोजनाभावात् सिद्ध्यंतरानाहार्यमानसज्ज्ञानसामान्यनिष्ठं यन्निरूक्तो भयाभाववत्त्वं तस्य विषयताप्रयुक्तत्वाभावात्
इच्छाघटितसामग्र्यभावस्यैव तत्प्रयोजकत्वस्वीकारात् न चेच्छाघटितसामग्र्यभावेऽतिव्याप्तिः यादृशविशिष्टविषयिताशा
लिनिश्चयत्वेनैव लक्षणे निवेश्यत्वादिति अत्र केचित् एतत्स्वमतानुरोधेन वस्तुतस्तु स्वसजातीयविशिष्टांतराघटितत्वं लक्ष
लक्षणे निवेश्यं तेन तादृशविशिष्टांतराघटितत्वस्य घटादिसाधारण्येन तत्राऽतिव्याप्तिवारणार्थमेवैवं चेत्यादिग्रंथस्योत्थानात् व्यभि
चारविशिष्टबाधघटितव्याप्तिवारकपरिष्कारस्तु स्ववृत्तिहेत्वाभासविभाजकोपाधित्वव्यापकतावच्छेदकस्वघटकांतरवृ
त्तितात्वकं यत्स्वं तद्विषयकमतीति विषयत्वं पूर्वोक्तमेव तत्र व्यभिचारघटितबाधादौ व्यभिचारविशिष्टमेयत्वे च नाव्याप्त्य
तिव्याप्ती इत्याहुः परे तु तादृशविशिष्टांतराघटितत्वनिवेशकल्प्य एव यथाश्रुते पूर्वादावतिव्याप्तिर्हृताता
दृशविशेषणदाने च निर्वह्निः पर्वतो वह्निमानित्यादौ वह्निमत्पर्वतविषयकज्ञानोत्तरज्ञाननिष्ठपक्षतावच्छेदकावगा

१(अनुमित्यव्यवहितपूर्वमाहार्यसामग्र्यभाववैयर्थ्येन तन्निष्ठविषयितायां विशिष्टांतरविषयिताव्यापकरूपावच्छिन्नत्वासत्त्वा [illegible]

हित्वाभावाधिकरणतायां पूर्वोक्तज्ञानीयवह्निविषयिताप्रयुक्तत्वसत्त्वेन वह्न्याद्यव्याप्तिरतः तद्दत्त्वसार्थक्यं न तु पादाने च केवलवह्नि
ज्ञानोत्तरज्ञानविशेषाभावाधिकरणतायाः विरोधिविषयिताप्रयुक्तत्वाभावात् तादृशानुमितिसामान्येन तादृशविषयिताप्रयुक्तोभयाभा
वाधिकरणत्वमिति नातिप्रसंगः इदं तु चिंत्यं व्यभिचारघटितवाक्यैकदेशे प्रमव्यभिचारिवह्निमत्त्वतिव्याप्तिवारणाय स्वविषयि
तात्वव्यापकरूपावच्छिन्नप्रयोज्यताकत्वस्य विवक्षणीयतया तावता वह्न्यादिरूपाश्रयासिद्ध्यादिभागवारणात् साध्यवत्प
क्षवारणाय तु विरोधिविषयिताप्रयुक्तत्वमावश्यकं न च तथापि निर्वह्निः पर्वतो वह्निमानित्यादौ पाषाणमयत्वव
त्पर्वतादावतिव्याप्तिः समानाकारकज्ञानीयविषयितायाः भिन्नतया तत्प्रयुक्तत्वस्य तादृशाधिकरणतायां
सत्त्वात् यदि च तद्विषयितायां विरोधित्वाभावान्नातिव्याप्तिरित्युच्यते तेन दायद्विरोधिविषयितासामान्यप्रयुक्तः ता
दृशोभयाभाव इत्यनेनासामंजस्ये शेषवैयर्थ्यं स्यादिति विरोधिविषयितापदेन साध्यवत्पक्षविषयतावह्निमत्त्वविषयिता
यास्तु विवक्षणीयत्वादिति वाच्यं वस्तुगत्या प्रतिबंधकीभूतज्ञानोत्तरजायमानेन ज्ञानेन प्रतिबध्यतावच्छेदकविषयित्वाभाव
स्य तद्व्याप्याभावस्याधिकरणतायां तादृशविषयिताप्रयुक्तत्वोपगमात् तादृशज्ञानाकालीनपाषाणमयत्ववत्पर्वत

२

सा० ज्ञानोत्तरज्ञाननिराधिकरणतायां तत्प्रयुक्तत्वासत्वेन तज्ज्ञानोत्तरज्ञानसामान्ये विरोधिविषयिताप्रयुक्तो
२५७ भयाभावासत्वादिति व्याप्तिविरहात्. एवं च पाषाणमयत्ववसर्वतत्वारणाय विरोधिविषयिताप्रयु
वि 167 क्तत्वं सप्रयोजनमित्याहुः अपरे त्वेतदेवं दूषणं तु न तथा हि नन्वेवं विशिष्टांतराघटितत्वविवक्षणे
विशेष्यदले विरोधिविषयिताप्रयुक्तत्वं व्यर्थं निर्वह्निः पर्वतो वह्निमानित्यादौ घटवद्ध्रदादि
रूपोदासीनस्य स्वविषयिताप्रयुक्तो भयाभावप्रयोजकाभावाधिकरणताकत्वविरहादेवव्यक्तदा
सात्. न च विशिष्टांतराघटितत्वशरीरे स्वविषयिताप्रयुक्तत्वाभिधानं विशेष्यदलस्य विरोधि
विषयिताप्रयुक्तत्वतात्पर्यकं स्वरूपकीर्तनमात्रं न तु लक्षणे निविष्टं परे तु विशिष्टांतरविषा।
यित्वाप्रयोज्ये निरुक्तो भयाभावप्रयोजकयत्किंचिदभावाधिकरणताकत्वमात्रं विशिष्टांतवि
षयित्वं च स्वानवच्छिन्नप्रकारतावच्छेदकधर्मावच्छिन्नविषयित्वं स्वाविषयकप्रतीतिविषयताव
च्छेदकधर्मावच्छिन्नविषयित्वं वा एवं च अनुमित्यव्यवहितपूर्वमाहार्यसामान्यभावने येत्येन घटव चैवं।

दृ॰हैत्रहोत्तरानुमितौ निर्वह्निः पर्वतो वह्निविशिष्टावगाहित्वाभावस्य स्वकारणविरहप्रयुक्तत्वेन उदासीनवारकतया विरोधिविषयिताप्र
युक्तत्वमावश्यकमिति वाच्यं तथासति मेयत्वविशिष्टव्यभिचाराद्दावतिव्याप्तेः भ्रमात्मकमेयत्वविशिष्टव्यभिचारनि
र्णयोत्तरानुमितिनिष्ठोभयाभावप्रयोजकाभाववत्तायांच किंचिद्विशिष्टांतरविषयितात्वव्यापकरूपावच्छिन्नाप्रयो
ज्यत्वस्याक्षतत्वात् तन्निवेशे तु तादृशनिर्णयीयविषयितायां विशिष्टव्यभिचारनिरूपितत्वाभावात् नातिव्याप्तिः प्रत्येकप
दार्थनिरूपितविषयितात्वस्य च प्रयोजकतानवच्छेदकत्वादिति· अत एव सामान्यतो विषयिताप्रयुक्तत्वं विहाय स्वविषयिता
प्रयुक्तत्वपर्यंतमभिहितं स्वीयत्वनिवेशः प्राग्व्याकृतः केचित्तु पर्वतो धूमाभाववानिति प्रतिबंधकभ्रममादाय मेयत्ववि
शिष्टव्यभिचाराद्दौ नातिव्याप्तिसंभवः धूमाभावपर्वतत्वोभयात्मकत्वानवच्छिन्नप्रकारतावच्छेदकरूपावच्छिन्नविष-
यिताप्रयोज्यत्वस्यैवोभयाभावप्रयोजकाभावाधिकरणतायां सत्त्वात् प्रयोजकताभावेन तादृशरूपविशिष्टविषयिता
पर्यंतानिवेशात् किंतु हेतुमत्पक्षात्मकविशिष्टांतरविषयिताप्रयोज्यत्वसत्त्वेनासाधारण्ये व्याप्तिरतः तादृशविशिष्टां
तराविषयिताप्रयोज्यत्वं विवक्षणीयं एवं च पाषाणमयत्वावच्छेदेन धूमाभाववत्तानिश्चयविशिष्टपाषाण
मयत्ववत्पर्वतनिश्चयसत्त्वे तदुत्तरकालीनानुमितौ तद्विषयिताप्रयुक्ततादृशाभावसत्त्वात् पाषाणमयपर्वतस्य स्वावच्छि

विशिष्टविषयितानिवेशफलवो

सा० भविषयकनिश्चयोत्तरानुमितित्वव्यापकीभूयाभाववत्त्वरूपनादृशत्वाभावेन तादृशविशिष्टान्तराविषयिताप्रयोज्यत्वमादायमेयत्व
१५८ विशिष्टव्यभिचारादावतिव्याप्तिरतः स्वीयत्वनिवेशं रोचयंते तत्र तादृशत्वनिवेशमपेक्ष्यैव तादृशनिवेशाध्यं · यदि च स्वविषयिताप्रयुक्तत्वा
168 निवेशेऽपि न क्षतिः व्यभिचारघटकपदार्थानां निरूप्यनिरूपकभावापन्नधर्मीयविषयितासाधारणविषयितात्वस्य विशि
ष्टान्तरीभूतकेवलव्यभिचारादिविषयितात्वव्यापकतया निरुक्ताधिकरणताप्रयोजकतावच्छेदकत्वेन मेयत्वविशिष्टव्यभिचारादा
वतिव्याप्तेरेवासत्त्वादितिमन्यते तदा तादृशनिवेशे व्यभिचारघटितबाधैकदेशे धूमव्यभिचारिवह्निमत्यतिव्याप्तिं वा
५ क्षाम: अथाये दलद्वयस्यैव निष्कर्षः एवं विशेष्यदलनिवेशो नास्तीति चेत् पर्वतो वह्निमान् धूमादित्यादौ पाषाणमयत्ववत्पर्वतादा
वतिप्रसंगात् पाषाणमयो न वह्निमानिति निर्णयस्य भ्रमतया तद्विषयविशिष्टस्याप्रसिद्धतया यथोक्ताधिकरणतायां
विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वाक्षतेः न च वस्तुमात्रेतिव्याप्त्यभिधानं यथाश्रुत विशिष्टान्तरा
घटितत्वनिवेशमभिप्रेत्य यथा स्वविप्र के तु तत्र निर्वह्निपर्वतो वह्निमानित्यादौ वह्निमत्पर्वतादिरूपाश्रयासिद्ध्येकदेशे
वह्न्यादावतिव्याप्तिर्बोध्या तस्य स्वविषयकनिश्चयोत्तरानुमितिसामान्यनिष्ठनिरुक्ताभावाभावाधिकरणताकत्वेन विशे
ष्यदलसत्त्वात् विशिष्टान्तविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यवह्निमत्पर्वतविषयितानतः प्रतिस्वविषयिताप्रयोज्यनिरुक्ता

पर्वतादितादृशत्वनिवेशे तु साधनाप्रसिद्ध्यादि=१

भावाधिकरणताकत्वेन विशिष्टांतराघटितत्वाच्चेति तदुपादानेतु केवलवह्निविषयकनिश्चयोत्तरानुमितौ सामान्यांतर्गतायां तादृ
शाभावाधिकरणताया विरोधिविषयितांप्रयुक्तत्वाभावान्न दोष इति वाच्यं विशिष्टांतराघटितत्वदले निरुक्ताभावाधिकरणतायां स्व
विषयितात्वव्यापकरूपावच्छिन्नप्रयोज्यत्वनिवेशस्यावश्यकत्वात् ततएव बुद्ध्यादिरूपैकदेशवारणात् अन्यथा धूमव्यभिचा
रिवह्निमान्वह्नेरित्याद्यबाधविषयितानां पातिधूमव्यभिचारिवह्निमद्विषयिताप्रयोज्यायाः पक्षेसाध्यावगाहित्वाभावाधिक
रणताया विशिष्टांतरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यतया तद्विषयकनिश्चयोत्तरानुमितिसामान्यवृत्तिप्रयोज्याभाव
कतयाच धूमव्यभिचारिवह्निमत्यतिव्याप्तिः तथाविवक्षणेतु तत्रबाधविषयतात्वेनैव प्रयोजकतया स्वविषयितात्वव्यापकीभू
तधूमव्यभिचारिवह्निमद्विषयतात्वस्य प्रयोजकतानवच्छेदकत्वादिति नच सिद्धिविषयताया व्यावृत्त्यर्थं यद्रूपावच्छिन्न
विषयितायां विरोधित्वमात्रनिवेशेपि वारणसंभवात् तस्माद्विशेष्यदले विरोधिविषयिताप्रयुक्तत्वं व्यर्थमि
तिचेन्न निर्वह्निः पर्वतो वह्निमान् धूमादित्यादौ पाषाणमयत्वप्रवर्ततेति व्याप्तिवारणाय तदावश्यकत्वात्
तत्पाषाणमयत्वावच्छेदेन वह्निमत्त्वज्ञानस्य भ्रमतया तद्विषयविशिष्टस्याप्रसिद्ध्या वि
शिष्टांतरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यस्वविषयितात्वव्यापकरूपावच्छिन्नप्रयोज्यनिरुक्ता

४

सा०

१६९

169

भावाधिकरणताकत्वेन तस्य विशिष्टांतराघटितत्वात्. स्वविषयकनिश्चयोत्तरानुमितिसामान्यनिष्ठतादृशोभयाभावाधिकर
णताकत्वेन विशेष्यदलसत्त्वाच्च. तन्निवेशे च तन्निश्चयोत्तरानुमितिसामान्यांतर्गतपाषाणमयो वह्निमानिति निश्च
यानुत्तरानुमितिनिष्ठाधिकरणतायामेव विरोधिविषयिताप्रयुक्तत्वाभावेनातिव्याप्त्यभावादिति. द्वितीयकल्पी
य विरोधित्वनिवेशे तत्रातिव्याप्तिविरहेऽपि नीलनिर्वह्निः पर्वतो वह्निमानित्याद्यौ नीलत्वाभाववद्वह्निमानित्यादिज्ञा
नकालीनस्य पर्वतो नीलत्वाभाववानित्यादिज्ञानस्य विरोधिविषयतामादाय पर्वतत्वसामानाधिकरण्येन नीलत्वाभावघटित
नीलत्वाभाववत्पर्वते विशिष्टपक्षतायां विरोधितया आश्रयासिद्धावतिव्याप्तिः न हि विषयिताप्रयोज्यनिरूपकोभया
भावप्रयोजके पर्वतत्वविशिष्टे निर्वह्नित्ववैशिष्ट्यावगाहित्वाभावाधिकरणत्वे नीलत्वाभाववान् वह्निमा
निति भ्रमविषयितायाः प्रयोजकत्वेऽपि भ्रमविषयविशिष्टस्याप्रसिद्धौ विशिष्टांतरविषयितात्वव्यापकरूपावच्छिन्ना
प्रयोज्यत्वसत्त्वेन नीलत्वाभाववत्पर्वतस्य विशिष्टांतराघटितत्वसत्त्वात्. तद्वारणाय विशेष्यदले विरोधिविषयिताप्रयुक्तत्वनिवेशः

एवंनिर्वह्निःपर्वतोवह्निमान्पाषाणमयत्वाभाववत्पर्वतीयधूमादित्यादौसामानाधिकरण्येनपाषाणमयत्वविशिष्टप
र्वतादावतिव्याप्तिःसामानाधिकरण्येनपाषाणमयत्वाभावस्यपर्वतांशेहेतुघटकतयाविशिष्टसाधनतयाहावि
रोधित्वेनालक्ष्यत्वात् नहिप्रतिबंधकतावच्छेदककोटिप्रविष्टानांप्रत्येकपदार्थानामितरासहकृतानामपिप्र
तिबध्यतावच्छेदकाभावप्रयोजकत्वंव्यापकाभावप्रयोजकानांव्याप्याभावप्रयोजकत्वमितिअथपर्वतःपाषाणम
पइतिनिखिलज्ञानविषयतानामेकेनसर्वासामपिज्ञानव्यक्तीनांनिरूक्तोभयाभावप्रयोजकविषयत्वावलम्बत्वमेव
तथाचकेवलपाषाणमयपर्वतज्ञानोत्तरघटाद्यनुमितावपिपक्षेवह्निवैशिष्ट्यावगाहित्वाभावोनकथंतद्विषयि
ताप्रयुक्तइतिचेत्केवलपाषाणमयःपर्वतइतिज्ञानोत्तरंपर्वतोवह्निमानित्याद्यनुमितेहेत्वासामान्यांतर्गतत्वंतथा
विधानुमितौनिर्वह्निपर्वतेवह्निवैशिष्ट्यावगाहित्वाभावस्यकथंचिदपिपाषाणमयत्वविशिष्टपर्वतविषयताप्रयुक्त
त्वासंभवेनतत्रातिव्याप्त्यभावात् वस्तुतस्तुकारणाभावात्कार्याभावइतिवत्प्रकृतेपिस्वरूपसंबंधरूपप्रयोजक
त्वंस्वसत्ताव्याप्यसत्ताकत्वंपन्निरूपितंयत्रतन्निष्ठंतन्निरूपितमेवत्वपेयतेतथाचस्वंप्रयोज्यंप्रतिबध्यतावच्छे
दकाभाववत्त्वस्यप्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणसमुदायसत्ताव्यापकसत्ताकतयातत्प्रयोजकत्वंसमुदा

१७०
170

पस्यैवनतु मन्येकस्य अत एव प्रतिवंधकीभूतज्ञानाव्यवहितोत्तरज्ञाने पाप्रतिवध्यतावछेदकविषयिताभावाधिकर
णतायाचप्रतिवध्यतावछेदकविषयित्वव्याप्याभावाधिकरणतानतस्याएवचप्रतिवंधकतावछेदकविषयिताप्रयु
क्तत्वेनतु निश्चयमात्रोत्तरानुमितिनिष्ठायाइतिनचतथापि पाषाणमयत्ववत्पर्वतविषयितायानिरुक्तविरोधित्वा
भावादेवक्षतासइतिवाच्यंतत्रसाध्यवत्पक्षविषयितावहिर्भूतत्वरूपविरोधित्वसत्वात्: पाषाणमयत्वावछेदेनवह्नि
मत्वस्यासत्वेनविशिष्टांतरविषयित्वाप्रयोज्यत्वात्ततः नचनिर्वह्निपर्वतेवह्निवैशिष्ट्यावगाहित्वस्यपर्वतत्वसामा
ना·धिकरण्येनवह्निवैशिष्ट्यावगाहित्वव्याप्यमेवसामानाधिकरण्येनपाषाणमयत्ववत्पर्वतविषयिताचननाद
शवैशिष्ट्यावगाहित्वाभावप्रयोजिकेतिनातिव्याप्तिरितिवाच्यंपाषाणमयोवह्निमानितिज्ञानकालीनस्यसामाना
धिकरण्येनपाषाणमयत्ववत्पर्वतज्ञानस्यपर्वतत्वावछेदेनवह्न्यभावबुद्धिप्रतिवंधकत्वेननिर्वह्निपर्वतेवह्निवै
शिष्ट्यावगाहित्वस्यपर्वतत्वावछेदेनवह्न्यभावावगाहित्वव्याप्यत्वात्: अथवापाषाणमयोनवह्निमानितिनिर्णये
विशिष्टपाषाणमयःपर्वतइतिनिर्णीयपाषाणमयत्वविशिष्टपर्वतीयविषयितायाःपर्वतत्वावछेदेनवह्निवैशि
ष्ट्यावगाहित्वाभावाधिकरणताप्रयोजकत्वात्: नचपाषाणमयोनवह्निमानितिनिर्णयसहकारेणैवनोदृशनिर्णयस्य

प्रतिबंधकतया विशिष्टांतरविषयित्वाप्रयोज्यत्वमेव नास्तीति वाच्यं तन्निर्णेयस्य भ्रमत्वादिति तद्वारणायापि विशेष्य
दलेविरोधिविषयिताप्रयुक्तत्वमावश्यकमिति नचैवं विशिष्टांतरविषयितात्वव्यापकस्य व्यभिचारादिविषयिता·
त्वस्यक्वापि प्रयोजकतावच्छेदकत्वासंभवात्· प्रमेयत्वविशिष्टव्यभिचारादावतिव्याप्तिवारणं दुर्घटमिति वाच्यं व्यापक
प्रति त्वं स्वाश्रयपरत्वपर्याप्तिवृत्तिभेदप्रतियोगितानवच्छेदकत्वं तस्य च व्यभिचारत्वविशिष्टनिरूपितविषयितात्वस्य निरूप्य
निरूपकभावापन्नव्यभिचारादिघटकपदार्थस्तोमविषयिताघटितसमुदायत्वे संभवेन तादृशसमुदायत्वावच्छिन्न
प्रयोज्यतामादायैव प्रमेयत्वविशिष्टव्यभिचारादावतिव्याप्तिवारणसंभवादिति· वस्तुतस्तु स्वातंत्र्येण तादृशविशि
ष्टांतराघटितत्वविशेषणापेक्षया लाघवेन दीधितिकारोक्तविशेष्यदलप्रविष्टोभयाभावाधिकरणतायामेव करण
तायामेव तादृशविशिष्टांतरविषयितात्वव्यापकरूपानवच्छिन्नविरोधिविषयितानिष्ठप्रयोजकताकत्वनिवेशान्न
घटादौ विरोधिविषयिताप्रयुक्तत्वदलव्यावृत्त्यसंगतिः अत एव पूर्वमुक्तं भट्टाचार्येण स्वातंत्र्येण तादृशविशेषणं पद
दार्थेऽनिवेश्यज्ञाने एवं तादृशविशिष्टांतराविषयकत्वं निवेश्यमिति· अत्र कल्पे उभयाभावाधिकरणताप्रयोजक
तायां तादृशविशेषणमिति विशेष इति स्वरसात्· यत्त्वेवं सति विरोधिविषयिताप्रयुक्तत्वस्य प्रमेयत्वविशिष्टव्यभिचा

(अनुमित्यव्यवहितपूर्वमाहार्यसामग्र्यभावनैयसेन तन्निष्ठविषयितायां विशिष्टांतरविषयितात्वव्यापकरूपानवच्छि [illegible]

१७१ 171

रवारकतासंभवात्तदनुपादानेन्यूनता॰यदिचतद्वारकविशेषणंस्यगेवतदुपादानेपिवस्तुतःलविशेषएववस्तुमा
त्रेतिव्याप्तिप्रदर्शमितिनन्यूनतानदोनतद्विशेषणेनैवघटादिवारणसंभवात्पुनर्वस्तुमात्रत्वादिव्यावृत्तिप्रदर्शनासं
गतिरितिउक्तौरीतिरेवसाधीयसीतितनद्येशलमेव॰अमेपत्वविशिष्टदोषेतिव्याप्तिवारणंचविशिष्टांतरविषयितात्व
व्यापकरूपावच्छिन्नाप्रयोज्यत्वनिवेशेपीतितादृशरूपानवच्छिन्नप्रयोज्यत्वेतिनज्ञव्यत्वासफलतायास्तत्रवस्तु व
मात्रेतिर्व्यर्थविवारणएवसत्वात्तदनुधावनसंगतेः एतेनविरोधिविषयिताप्रयुक्तत्वनिवेशोपथाश्रुताभिप्रा
पकएव॰नतुपारिभाषिकविशिष्टांतरघटितत्वकल्पाभिप्रायकइत्यपास्तंघटतुगगनमभावाप्रतियोगिगगना
दित्यादेअभावाप्रतियोगित्वव्यापकीभूताभावप्रतियोगिगगनरूपाऽसाधारण्यबाधघटितेऽव्याप्तिः तज्ज्ञानोत
रज्ञाननिष्ठतादृशसाध्यावगाहित्वाभावाधिकरणतायांवाधरूपविशिष्टांतरविषयिताप्रयोज्यःत्वसत्वादिति
तेतुघटसाध्यवतावुद्धौवाधज्ञानत्वेनैवप्रतिबंधकत्वंनतुतत्रज्ञानविशिष्टज्ञानत्वेनवाधज्ञानस्याप्रतिबंधक
त्वमितितस्यातव्यापत्वात्॰स्वातंत्र्येणदूषकत्वाभावेनदोषत्वस्वीकारस्यायुक्तत्वात्॰व्यभिचारघटितवाधा
देश्चस्वातंत्र्येणदूषकत्वात्तत्संग्रहप्रकारस्यावश्यकत्वात्॰एतेनवाधघटितसत्प्रतिपक्षोप्यलक्ष्यएवदूषकत्वःअ

७

तएवाभाववदनिरूपिताधेयतासुंदरीरमणीयत्वादित्यादौ अभाववन्निरूपितत्वाभाववद्वृत्तिमदाधेयताद्रूपप
क्षाप्रसिद्धेरपि विशिष्टांतरघटितत्वं गीयते॥ अतएव बाधसत्प्रतिपक्षासमूहालंबनमेव विशिष्टांतराघटितत्वसंपा
दकमुक्तं भट्टाचार्यैः बाधघटितसत्प्रतिपक्षस्य लक्ष्यत्वे तदसंगतमापद्येतेति॥ ननु विशिष्टांतरविषयितात्वव्यापकरू
पावच्छिन्नाप्रयोज्यत्वकल्पे मेयत्वविशिष्टव्यभिचारादावतिव्याप्तिर्दुर्वारैव जातिमतिधूमव्यभिचारविषयताया अ
ऽप्रयोजकतयातस्य धूमव्यभिचारिजातिमद्विषयितासाधारणविषयितात्वाव्यापकत्वात्॥ यदि चाप्रसिद्ध्यैव नाति
व्याप्तिस्तदासंभवोऽव्याप्तिर्वा स्यादिति न च विशिष्टांतरविषयितायामुभयाभावप्रयोजत्वनिवेशाज्जातिमद्धूमव्य
भिचारिविषयिताव्यक्तेरसद्इति वाच्यं तथापि धूमव्यभिचारिजातिमद्वान्धूमवान्वह्नेरित्यादौ मेयत्वविशिष्टव्य
भिचारातिव्याप्तेः जातिमद्धूमव्यभिचारिविषयित्वाव्यापकविषयिताशून्यज्ञानीयविशिष्टांतरविषयितानिवे
शान्न दोष इति चेत् तर्हि स्वघटकव्यभिचारविषयितायाः स्वाव्यापकबाधविषयिताशालिज्ञानीयत्तयास्वाघ
टकतद्विषयिताशालिज्ञानस्य च पूर्वमसत्वेनैव व्यभिचारघटितबाधादेः संग्रहसंभवात्॥ विशिष्टांतरवि
षयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वपर्यंतविवक्षावैयर्थ्यं मेयत्वविशिष्टव्यभिचारादिज्ञानस्य विशि

ताधाउभयाभावप्रयोजकत्वात्। अथविशिष्टांतरविषयि ४

=स्वविषयिताख्यव्यापकरूपावच्छिन्नप्रयोज्यत्वविवक्षणं पाषाणमयत्वव त्प्रतिवारणाय विशेष्यदलं। तत्राहार्यस्थले तद्वारणाय विरोधिविषयिताप्रयुक्तत्वदलमित्यवधेयं=८

१७२ 172 ष्टव्यभिचारादिज्ञानस्य विशिष्टांतरविषयित्वाव्यापकत्वेन शुद्धव्यभिचारज्ञानस्य तत्प्रागसत्त्वेन मेपत्वविशिष्टव्य
भिचारादावतिव्याप्तेश्चेति चेत्। यद्रूपावच्छिन्नविषयितात्वं पात्किंचिद्यद्रूपावच्छिन्नविषयकत्वसमानाधिक
रणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयिताशून्यस्यावच्छिन्नाविषयकप्रतीतिविषयतावच्छेद
कीभूततद्रूपावच्छिन्नविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वं विवक्षितं। केचित्तु विशेष्यदलप्रविष्ट
विरोधिविषयितानिष्ठप्रयोजकतायां विशिष्टांतरविषयितात्वाव्यापकत्वं विशेषणं तावतैव व्यभिचाराद्या
हितवाधादिसंग्रहे मेपत्वविशिष्टव्यभिचाराद्यसंग्रहसंभवात्। न चैवं तादृशबाधैकदेशे धूमव्यभिचारिवह्निम
त्त्वादिति व्याप्तिरिति वाच्यं। प्रयोजकतायां स्वविषयितात्वव्यापकत्वस्य तद्व्यापकरूपावच्छिन्नत्वस्य वा विरोधि
विषयितानिष्ठत्वेन विवक्षितत्वात्। एवं च भट्टाचार्योपदर्शितविशिष्टांतराद्यघटितत्वं न दोषमेवेत्याहुः। एतन्म
ते वह्निव्यापकीभूताभावप्रतियोगिजलवद्ह्रदवारणाय पद्धिशिष्टाह्रदाद्यघटितत्वमावश्यकमिति तु बोध्यं। अ
थ साध्यव्यापकीभूताभावप्रतियोगित्वविशिष्टहेतुरूपासाधारण्येऽव्याप्तिः पक्षवृत्तिर्हेतुरिति ज्ञानका
लीनाऽसाधारण्यज्ञानोत्तरजायमानानुमितिष्ट साध्यावगाहित्वाभावाधिकरणतायामेव स्वविषयिताप्रयो

नि

ज्यत्वसत्वात् तत्र हेतुमत्पक्षरूपविशिष्टांतरविषयिताप्रयोज्यत्वस्यावश्यकत्वात् न च तादृशविशिष्टांतरविष
यिताव्याप्रयोज्यत्वं वक्तव्यं पक्षरूपावच्छिन्नविषयकनिश्चयोत्तरानुमितित्वव्यापकोभयाभावस्तद्रूपावच्छिन्नत्वं
तादृशत्वं केवलहेतुमत्पक्षादि किंचन तत्तथेति वाच्यं जलाभाववद्ध्रदकालीनवह्नेः साध्यतायां जलवद्ध्रदरूपहेतु
मत्पक्षस्य तादृशतयातत्र वह्निव्यापकीभूताभावप्रतियोगित्वरूपासाधारण्ये ऽव्याप्तेः पक्षविषयकनिश्चयेत्यादि
दलानार्कनत्वाच्च पक्षविषयकनिश्चये पक्षधर्मताज्ञानकालीनत्वनिवेशे तु तत्रैवानाहार्यत्वस्यावश्यकतया
स्वरूपासिद्ध्यव्याप्तेः न च हेतुमत्पक्षविषयिताभिन्नविशिष्टविषयितैव विशिष्टांतरविषयितापदेन विवक्ष
णीया जलव्यापकवत्त्वभावादावतिप्रसंगात् न च तस्यासाधारण्यं तभोवोभिप्रेतः अन्यथा तत्र वक्ष्यमाणरी
त्या अत्र वदंतीत्यादिलक्षणातिव्याप्तिप्रसंगात् एवं वन्यभाववज्जलवतोपि व्यभिचारमध्ये ऽतर्भावः व
ह्निमद्वृत्ति जलं तु विरोध इति तयोर्लक्ष्यत्वान्नातिव्याप्तिरिति वाच्यं ह्रदो जलाभाववद्ध्रदकालीनवह्निमा
न् जलादित्यादौ मेयत्वविशिष्टजलं ह्रदादावतिव्याप्तेः जलवद्ध्रदस्य साध्याप्रतिच्छिन्नेन लक्ष्यत्वेपि मे
यत्वविशिष्टस्य तस्यालक्ष्यत्वात् अत्र केचित् असाधारण्यविषयित्वानिरूपितत्वज्ञानवैशिष्ट्यानिरूपि

१७३
173

न्त्वोभयाभाववत्त्वेनविशिष्टांतरविषयितानिरूपितप्रयोज्यताविशेषणीयाप्रतिबंधकतावच्छेदकता। योस्य
धिकरणसमुदायस्यतादृशसमुदायत्वेनप्रतिबंधकतावच्छेदकाभावप्रयोजकत्वमहेतैवपक्षधर्मताज्ञानवै
शिष्ट्यासाधारण्यविषयकत्वनिश्चयत्वादानांतथात्वेनतत्समुदायत्वेनैकंप्रयोजकत्वंतन्निरूपितंचैकमे
वप्रयोज्यत्वं एवंविनिगमनाविरहेणसाधारण्यज्ञानवैशिष्ट्यपक्षधर्मताविषयकत्वनिश्चयत्वादिघटि
तसमुदायत्वेनैकंप्रयोजकत्वंतन्निरूपितंचैकंप्रयोज्यत्वंइदमेवचविशिष्टांतरविशिष्टांतरविषयितानि
रूपितंनपूर्वंतत्रविशिष्टांतरविषयितायाःप्रयोजकसमुदायेअनंतर्भावात्। एतच्चनिरुक्तोभयाभावव
त्त्वंदुर्भयस्यैवतत्रसत्त्वादितितत्संग्रहः यदिचैवंसतिह्रदोवह्निमानित्यादौवह्न्यभाववज्जलत्ववद्वृत्तिजलव
द्ध्रदादावतिप्रसंगः तद्वृत्तकजलवद्ध्रदादिविषयताप्रयोज्यतायाःनिरुक्तोभयाभाववत्त्वविरहेणयथा।
विवक्षित। विशिष्टांतराघटितत्वसत्त्वात्। एवंह्रदोवह्निमान्वह्निमद्वृत्तिजलादित्यादौसाधनाप्रसिद्धि
रूपवह्निमद्वृत्तिजलेनघटितमेयत्वविशिष्टेतत्रातिव्याप्तिः वह्निमद्वृत्तिजलंप्रमेयंजलत्वाद्वाह्रदइ
तिज्ञानोत्तरंघटाद्यनुमितिनिष्ठस्यप्रमेयत्वविशिष्टतादृशजलविषयिताप्रयोज्यपक्षसाध्यवैशिष्ट्याव

गाहित्वाभावाधिकरणस्य तद्धूरकवह्निमद्वृत्ति जलादिरूपविशिष्टांतरविषयिताप्रयोज्यत्वेपि तादृशाप्रयो
ज्यतायानिरुक्तोभयाभाववत्ताविरहेण विशिष्टांतरघटितत्वाक्षतेरिति विभाव्यते तद्विशिष्टांतरविष
क यितायामेवासाधारण्यविषयिताप्रयोज्याधिकरणताप्रयोजकत्वासाधारण्यविषयितान्यत्वोभयाभाववत्वं
विशेषणं न तु प्रयोज्यतायामुक्तोभयाभाववत्ता च नोक्तातिव्याप्तिरूपं न वासाधारण्यासंग्रहः एवं च प्रतिबंधक
तावच्छेदकतापर्याप्त्यधिकरणधर्माणां दंडचक्रादिवत् प्रत्येकं परस्परसहायभावेन प्रयोजकत्वोपगमेपि
न क्षतिः अथैवमपि ह्रदो वह्निमान् जलादित्यादौ प्रमेयत्वविशिष्टबाधेन व्याप्तिर्दुर्वारैव निर्वह्निर्ह्रदः प्र
मेयः वह्निव्यापकीभूताभावप्रतियोगि जलवान् ह्रद इति ज्ञानोत्तरघटाद्यनुमितिनिष्ठपक्षसाध्यवैशिष्ट्या
वगाहित्वाभाववत्तायाः विनिगमनाविरहेण बाधासाधारण्यविषयितयोरेव प्रयोजकतया बाधविषयिता
यास्तादृशोभयवत्वेन विशिष्टांतराघटितत्वस्यासत्त्वादिति चेत् तत्तत्त्वविषयिताया अपि असाधारण्यविष
यिताप्रयोज्याधिकरणताप्रयोजकत्वासाधारण्यविषयितान्यत्वोभयाभाववत्वेन विशेषणीयत्वात् उक्त
स्थले बाधविषयितायामुभयस्यैव सत्वेन तादृशविशिष्टांतराघटितत्वसत्वात् केवलमेयत्वविशिष्टबा

२७४ धविषयकनिश्चयोत्तरानुमितिनिष्ठाभावाधिकरणतायांचविशिष्टांतरविषयित्वाप्रयोज्यत्वमेवनास्तीति
नदोषइत्याहुः अपरेतुउक्तक्रमेणासाधारण्यसंग्रहेपिव्यापकसामानाधिकरण्यरूपव्याप्तिघटितस्यातिप
175 क्षासंग्रहोदुर्वारएव·तस्याप्युक्तक्रमेणविशिष्टांतरघटितत्वात्·नचतस्यालक्ष्यत्वेसांप्रतंगगनादिसाध
कहेतोःसत्प्रतिपक्षितत्वानुपपत्तेः इष्टापत्तौचकिमपराद्धं निर्वह्निःपर्वतोवह्निमानित्यादावपीष्टापत्त्या·
तस्मादसाधारण्यसंग्रहायविशिष्टांतरपदस्यतादृशविशिष्टांतरपरत्वमेवादरणीयं·अतएवविशि
ष्टांतरविषयितात्वव्यापकरूपावच्छिन्नपर्याप्ताविवक्षणेव्यभिचारघटितबाधएवाव्याप्तिर्ग्रंथकृता
प्रदर्शिता अन्यथाबाधघटकदेशमादायासंभवस्यैवप्रदर्शनौचित्यात्· अथैवंवन्ह्यभाववज्जलव
द्वृत्तिजलत्ववद्ध्रदादावतिप्रसंगोदुर्वारः तस्यापिविशिष्टांतराघटितत्वात् नचात्रापिपादृशविशिष्टवि
षयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयोत्तरानुमितिसामान्येविरोधिविषयिताप्रयुक्तो
निरुक्तोभयाभावःसत्प्रतिपक्षघटकदलरूपभिन्नतादृशविशिष्टरूपाघटितत्वनिवेशान्नदोषइतिवाच्यं
तथासतिवह्न्यभाववद्वन्ह्यभाववद्ध्रदरूपविशिष्टरूपादिकमादायासंभवप्रसंगात्· विरोधिविषयिताप्रयुक्त

त्वस्थानेज्ञानवैशिष्ट्यस्यप्रयुक्तत्वनिवेशेपिह्रदोवह्निमान्वह्न्यभाववज्जलादिमद्वृत्तिजलाभाववानित्यादौस्वरूपा
सिद्ध्यादीनामसंग्रहप्रसंगादितिचेन्न स्वरूपासिद्ध्यादिघटकदलद्वयभिन्नत्वस्यापिविशेषणीयत्वात् वह्न्य
भाववज्जलवत्कालीनजलवद्ध्रदादेस्तु असिद्धिघटककालीनजलवद्ध्रदघटितविशिष्टद्वयघटिततयानातिव्याप्तिः। एतेन
प्रति हेतुव्यापकसाध्याभाववत्कालीनप्रतिहेतुमत्त्ववारणायसत्प्रतिपक्षविषयित्वाघटकत्वेविवक्षणीयमित्यपास्तं काली
नत्वघटितस्यसत्प्रतिपक्षाघटकत्वेनवारणात् यत्तुयादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टवि
मि षयकनिश्चयोनरानुमितिसामान्येविरोधिविषयिताप्रयुक्तोभयाभावः ज्ञानवैशिष्ट्याप्रयुक्तनिरुक्तोभयाभावप्रयो
जकाभावाधिकरणत्वाप्रयोजकसत्प्रतिपक्षघटकदलद्वयभिन्नतादृशविशिष्टद्वयविषयिताशून्यत्वेननिश्च
यविशेषणात्स्वरूपासिद्ध्याद्यसंग्रहः तादृशविशिष्टद्वयनिरूपितत्वानुपादानेह्रदोवन्ह्यभाववानित्यादिनिर्णे
येतादृशप्रतिबंधकतानवच्छेदकविषयितासत्त्वेनतादृशविषयिताशून्यज्ञानस्यैवाप्रसिद्धिः विषयितायां
किंचिदवच्छिन्नत्वनिवेशेतुएकदेशातिव्याप्तिरितितन्निवेशः नचतादृशविशिष्टविषयकनिश्चयोतरानुमि
तिसामान्येनिरुक्तोभयाभावः निरुक्तविशेषणाक्रांतसत्प्रतिपक्षभिन्नतादृशविशिष्टनिरूपितविषयिताशू

१७५ 175

न्यत्वेनैवनिश्चयोविशेषणीयःकिंविशिष्टरूपनिवेशेनेतिवाच्यंतथासतिह्रदोवह्निमान्जलाभावादित्यादौव
ह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदादावतिप्रसंगात्तादृशविशिष्टविषयितायानिरुक्तविशेषणानाक्रां
तत्वात् अस्माकंतुज्ञानवैशिष्ट्याप्रयुक्तनिरुक्तोभयाभावप्रयोजकाभावाधिकरणत्वाप्रयोजकविषयताघटि
तनिरुक्तोभयविषयिताशून्यत्वस्यनिवेश्यतयातत्रानतिप्रसंगादितिसमाधानंतन्नतथापिवह्निमज्जलवत्का
लीनजलाभाववद्ध्रदकालीनह्रदोवह्निमान्जलवद्ध्रदकालीनजलादित्यादौवह्न्यभाववज्जलादिमत्काली
नजलाद्वद्ध्रदादावतिप्रसंगस्यदुर्वारत्वादितिकृतमावेशेनेत्याहुः अन्येतुअसाधारण्यविषयकनिश्चयोत्तरा
स नुमितिनिष्ठोभयाभावप्रयोजकाभाववत्तायाहेतुमत्स्वरूपविशिष्टान्तरविषयिताप्रयुक्ततयाऽसाधारण्ये
व्याप्तिरतःस्वघटकत्वेनविशिष्टान्तरविशेषणीयंहेतुमत्स्वश्चनासाधारण्यघटकइत्यदोषः नचघटःपृथिव्यन्य
इत्यादौपृथिवीत्ववद्वृत्त्यादिरूपवाधावाप्तिःस्वघटकविशिष्टान्तरप्रयोज्यतायाअसिद्धेरितिवाच्यंकिंचिद्वि
शिष्टविशिष्टान्तरनिवेशात् एवंचनानाविधवाधादिनिश्चयोत्तरानुमितिनिष्ठाधिकरणतामादायलक्षणसमन्व
यसंभवेपिएकैकविधवाधानुधावनंयथाश्रुताभिप्रायेणेत्याहुः अपरेतुहेत्वनवच्छेदकरूपेणपदार्थान्तरावगा

हिभ्रमात्मकपक्षधर्मतानिश्चयोत्तरानुमितिनिष्ठाधिकरणतापाविशिष्टांतरविषयित्वाप्रयोज्यतयाऽसाधारण्य
संग्रहः नचतत्रविशिष्टांतरविषयितात्वव्यापकीभूत निरूपभावापन्नविषयितात्वेनप्रयोजकत्वंदुर्वारमितिवाच्यं
वि·शिष्टांतरविषयितात्वव्यापरूपावछिन्नप्रयोजकतापाविशिष्टांतरविषयितानिष्टत्वेनविशेषणीयत्वादित्याहुः
परेतुअसाधारण्यविषयताप्रयुक्तोभयाभावाधिकरणतायानियमतोहेतुमत्पक्षरूपविशिष्टांतरविषयताप्रयु
क्ततयाऽसाधारण्येविशिष्टांतराघटितत्वविरहादव्याप्तिः अतः विशिष्टांतरविषयिताप्रयोज्यतायामसाधारण्य
विषयित्वानिरूपिता त्वज्ञानवैशिष्ट्यप्रयोज्याधिकरणतावृत्तित्वोभयाभाववत्वंविशेषणंदेयं अथतादृशाधिक
रणतानिष्ठप्रयोज्यत्वंप्रतिवंधकतावछेदकतापर्याप्त्यधिकरणघटकैर्योवदृतिनिरूपितमेकमेवनतुनानेतिकथं।
विशिष्टांतरविषयत्ताप्रयोज्यतायांतदुभयाभावनिवेशेनासाधारण्यसंग्रहइतिचेत्· सत्यंतथापितादृशप्रयोज्य
तानिरूपितहेतुमत्पक्षविषयितानिष्ठाऽसाधारण्यविषयितानिष्ठाचप्रयोजकतानानेव·अवछेदकभेदात्· ता
सांविभिन्नानामपितत्प्रयोज्यतानिरूपितप्रयोजकतात्वेनव्यासज्यवृत्तितयामहानसीयवन्ह्यभावप्रतियोगितावं
छेदकत्ववत्पर्याप्तेरैक्येननतद्भेदेनप्रयोज्यताभेदः एवंचविशिष्टांतरविषयित्वाप्रयोज्येत्यनेनज्ञानवैशिष्ट्यप्र

176

१७६ योज्यतानिरूपितत्वासाधारण्यविषयितात्वानवच्छिन्नत्वोभयाभाववती या विशिष्टांतरविषयितात्वव्यापकरूपा
वच्छिन्नप्रयोजकतातन्निरूपितप्रयोज्यत्वाभावस्य विवक्षितत्वाद्धेतुमत्पक्षविषयितानिष्ठप्रयोजकतां दृशो यास्ता
मान्वह्नि भयवत्त्वान्न दोषः अथात्र ह्रदो वह्निमद्वृत्तिजलादित्यादौ साधनाप्रसिद्ध्या [illegible]कवह्निमद्वृत्तिजलेन घटिते मेय स
त्वविशिष्टे तत्रातिव्याप्तिः वह्निमद्वृत्तिजलं प्रमेयं जलवान् ह्रद इति ज्ञानोत्तरं घटाद्यनुमितिनिष्ठाया मेयत्वविशि
ष्टतादृशजलविषयिताप्रयोज्यपक्षधर्मिकसाध्यधर्मिकसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायाः तद्धेतुकीभू
ततादृशजलविषयिताप्रयोज्यत्वसत्त्वेपि तत्प्रयोज्यतानिरूपिततादृशजलविषयिताप्रयोज्यत्वसत्त्वेपि तत्प्रयो
ज्यतानिरूपिततादृशजलविषयितानिष्ठप्रयोजकतायाः ज्ञानवैशिष्ट्यप्रयोज्यतानिरूपितत्वासाधारण्यवि
षयितात्वानवच्छिन्नत्वोभयवत्त्वेन तादृशोभयाभाववद्विशिष्टांतरविषयितानिष्ठप्रयोजकतानिरूपित
प्रयोज्यत्वाभावस्य तादृशाधिकरणतायां सत्त्वेन तमादाय विशिष्टांतराघटितत्वसत्त्वात्। एवं ह्रदो वह्निमानि
त्यादौ वह्न्यभाववज्जलादिमद्वृत्तिजलवद्ध्रदादावतिव्याप्तिः तद्धेतुकीभूतवह्न्यभाववज्जलवदादिरूपे विशि
ष्टांतरविषयितानिष्ठतादृशाधिकरणताप्रयोजकतायास्तादृशोभयवत्त्वात्। न चासाधारण्यविषयिताप्रयोज्या

धिकरणताप्रयोजकत्वासाधारण्यविषयितान्यत्वोभयाभावत्वविशिष्टांतरविषयितायांनिवेशर्पंनतूक्तोभयाभा
वः तथा च नोक्तातिव्याप्तिरुयावकाशइति वाच्यं ह्रदो वह्निमानित्यादौ प्रमेयत्वविशिष्टबाधेतिव्याप्तेः वन्ह्यभाववान्
ह्रदः प्रमेयः वह्निव्यापकीभूताभावप्रतियोगी धूमः धूमवानितिज्ञानोत्तरघटाद्यनुमितिनिष्ठपक्षसाध्यवैशिष्ट्या
वगाहित्वाभावाधिकरणतायां बाधासाधारण्यविषयितयोर्विनिगमनाविरहेण प्रयोजकतया बाधविषयिता
यास्तादृशोभयवत्वात्· मैवं असाधारण्यविषयिताप्रयोज्यतानिरूपिततत्वासाधारण्यविषयितात्वानवच्छिन्ना
त्वोभयाभाववत्वेन विशिष्टांतरविषयितानिष्ठप्रयोजकताया विशेषणीयत्वात्· अत्रापि धूमाभाववत्पर्वतकालीनः
पर्वतो वह्निमान् धूमादित्यादौ आश्रयासिद्ध्यात्मकधूमवत्पर्वतेमेयत्वविशिष्टेऽतिव्याप्तिः वह्निव्यापकीभूताव· प्रति
योगी धूमः धूमवान् पर्वतः प्रमेय इतिज्ञानोत्तरघटाद्यनुमितौ पक्षसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतामा
दायविशिष्टांतराघटितत्वसत्वात्· धूमवत्पर्वतविषयितानिष्ठतादृशाधिकरणताप्रयोजकतायाः असाधा
रण्यविषयितात्वानवच्छिन्नत्वासाधारण्यविषयिताप्रयोज्यतानिरूपितत्वोभयवत्वात्· यदि च विशिष्टां
तरविषयितानिष्ठतादृशोभयाभाववत्प्रयोजकतानिरूपितप्रयोज्यताशून्यस्वविषयितानिष्ठतादृशोभ

याभाववत्त्वप्रयोजकतानिरूपितप्रयोज्यतावन्नादृशाधिकरणताकत्वं विशिष्टांतराघटितत्वं तदा न कोपि दो
षः एवं च ज्ञानवैशिष्ट्यप्रयोज्यतानिरूपितत्वघटितोपदर्शितोभयाभाववत्त्वस्य प्रयोजकतायां निवेशोपि
साधीयानिति॰ केवलमेषत्वविशिष्टसाधनाप्रसिद्ध्यादिनिश्चयोत्तरानुमितिनिष्ठतादृशाधिकरणतायां वि
शिष्टांतरविषयित्वाप्रयोज्यत्वमेव पूर्वमतवदेतन्मतेपि नास्तीत्यनुसंधेयं॰ इदं तु बोध्यं भावाभावयोरेक
धर्मिकनिश्चये परस्परसामग्र्योरिव विरोधप्रतियोग्यनुयोगिनोर्विरोधज्ञानेकालीनैकधर्मिकनिश्चये
पि परस्परसामग्र्योः प्रतिबंधकत्वमिति मतेनैतत्सर्वं प्रपंचितं यदि चैकधर्मिकतदुभयप्रकारकनिर्णये तदेक
तरधर्मिकान्यतरनिरूपितविरोधनिर्णय एव विरोधी तदभावश्च कार्यसहवर्तितया हेतुः प्रत्यक्षे चेद्दोषोत्तेजि
कानन्त्वनुमित्यादावितिमतं तत्तद्विशिष्टांतरविषयित्वाप्रयोज्यस्वविषयिताप्रयोज्यानिरूपकाभावाधिक
करणकत्वं यथाश्रुतमेव हेतुमत्पक्षज्ञानाकालीनासाधारण्यविषयकज्ञानोत्तरघटाद्यनुमितिनिष्ठता
य दृशाभावाधिकरणतामादाय विशेष्यदलसत्त्वं सम्यक् परंतु कांचनमयः पर्वतो कांचनमयवह्नि
मान् कांचनमयधूमादित्यादौ कांचनमयत्वव्यापकीभूताभावप्रतियोगित्वे धूमनिष्ठेति व्याप्तिः स

मवायेन प्रमेयवान्नभावः प्रमेयवान्नभाववत्वादित्यादौ संयोगेन साध्ये साध्येतरव्यापकाभावप्रतियोगित्वा
नवगाहित्वस्याप्रसिद्धेरिति विभावनीयं । यत्तु विशिष्टान्तरविषयितेत्यत्र विशिष्टपदं तादृशाविशिष्टपरं हे
तुमत्त्वस्य तादृशत्वान्नासाधारण्येऽव्याप्तिः अत एव विशिष्टान्तरविषयितात्वव्यापकेत्यादिविवक्षा
याऽसंभववारणप्रयोजनकत्वमनुक्त्वाव्यभिचारघटितवाधाव्याप्तिवारणप्रयोजकत्वमुक्तमिति तदस
त् । उक्तरीत्यैवोपपत्तौ तादृशपदवैयर्थ्यात् । वह्न्यभाववज्जलादिमद्वृत्तिजलत्ववद्ध्रदादावतिव्याप्तेश्चेति हृ
तमतिपल्लवेन । अथैवमपि हेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वरूपासाधारण्येऽव्याप्तिर्दुर्हृ
दैव । वह्न्यभावव्याप्यतया गृहीतस्य पर्वतांशे वह्निमत्ताबुद्धिविशेष्ये प्रकारतया भानेन तदुद्देश्याहार्यत्वनि
यमेन निरुक्तासाधारण्यविषयकनिश्चयोत्तरानुमितिसामान्ये निरुक्तोभयाभावाधिकरणतासत्त्वेपि
विरोधिविषयिताप्रयुक्तत्वविशिष्टतादृशाभावाधिकरणताविरहात् । स्वपूर्ववृत्तिप्रतिबन्धकीभूत
ज्ञानीयविषयितायाः एवं प्रयोजकतया हेतुमत्ताज्ञानाकालीनतादृशासाधारण्यविषयितायाऽप्रयो

१७८ 178 जकत्वात्ः अन्यथा निर्वह्निमानित्यादौ पाषाणमयत्ववत्पर्वतादावतिप्रसंगात्ः अत्र केचित् हेतुमत्पक्षज्ञाना
कालीनत्वासाधारण्यविषयकत्वोभयाभावो यद्विषयकनिश्चये तन्निश्चये निवेश्यः एवं च पक्षधर्मताज्ञाना
कालीननिश्चयव्यक्तावसाम्नदोषः हेतुमत्पक्षज्ञानत्वमनिवेश्य तत्कालीनत्वाभावनिवेशाद्धूमस्वभाववत्पर्व
तकालीनपर्वतीयवह्निमान्वत्स्वभावव्याप्यादित्यादौ वह्निमत्पर्वते नातिव्याप्तिरित्याहुः अथोक्तदोषवारणा ह्न
षयद्रूपावच्छिन्नविषयिताशालिनिश्चयः पक्षधर्मताज्ञानकालीनत्वेन विशेष्यः तथा सति साधनसाध्य
व्यापकीभूताभावप्रतियोगित्वनिश्चयोत्तरं पक्षतावच्छेदकतात्मकमेकं धर्मं धर्मितावच्छेदकीकृत्य साध्यसा
धनोभयावगाह्यनाहार्यानुमत्यात्तदुत्तरानुमितिसामान्यान्तर्गतपक्षधर्मताज्ञानानुत्तरानुमितौ विरोधिवि
षयिताप्रयुक्तोभयाभावासत्त्वेपि अव्याप्तेरभावासत्त्वेपि अव्याप्तेरभावात्ः न च जलवान्ह्रदो जलाभाववान्नित्या
हार्यपक्षधर्मताज्ञानविशिष्टासाधारण्यज्ञानमादाय तद्दोषतादवस्थ्यवारणायानाहार्यत्वेन पक्षधर्मताज्ञानं विशे
षणीयं एवं चान्यत्राप्यनाहार्यपक्षधर्मताज्ञानकाले लौकिकस्वरूपासिद्धिज्ञानमादाय स्वरूपासिद्धौ लक्षणगम
नेपि ज्ञातीन्द्रियपदार्थघटितस्वरूपासिद्धावव्याप्तिः तत्राना

ली

हार्यपक्षधर्मताज्ञानकालेऽनाहार्यस्वरूपासिद्धिनिश्चयाप्रसिद्धेरिति वाच्यं स्वरूपासिद्धिज्ञानाकालीनत्वाहार्यत्वोभयाभावस्यैवानाहार्यत्वरूप
तया स्वरूपासिद्धिज्ञानकालीनस्याहार्यपक्षधर्मताज्ञानस्यापि निरुक्तानाहार्यत्वाक्रान्ततया तादृशाहार्यपक्षधर्मताज्ञानकालीनानाहार्य
स्वरूपासिद्धिज्ञानमादाय तत्र लक्षणगमनात् जलवान् ह्रदो जलाभाववानिति ज्ञानस्य स्वरूपासिद्धिज्ञानत्वेनासाधारण्येऽव्याप्तिर्न शंक्या।
=यथाश्रुत= स्वरूपासिद्धिज्ञानस्यानाहार्यत्वेन विशेषणीयत्वात् यत्र जलाभाववान् ह्रद इति स्वरूपासिद्धिज्ञानोत्तरं जलवान् ह्रदो जलाभाववानित्याहार्यत
त्तोः साधारण्यज्ञानं तत्र पक्षधर्मताज्ञानसंग्रहेणाव्याप्तिरपि न शंक्या। मूलीनत्वस्याव्याप्यवृत्तित्वेनासाधारण्यज्ञाने पक्षधर्मताज्ञाने उभयाभावा ला
नुपगमादिति चेन्न जलवान् ह्रदो जलाभाववान् जलं वह्निव्यापकीभूताभावप्रतियोगि जलाभाववांश्च ह्रद इति स्वरूपासिद्धिविषयकसमूहालंब
नकालीनस्य निरुक्तानाहार्यत्वाक्रान्तत्वेन तत्कालीनदर्शितसमूहालंबनोत्तरानुमितिसामान्यविरोधिविषयिताप्रयुक्तोभयाभाववत्त्वाभावे
नाव्याप्तेर्दुर्वारत्वात्। न च दर्शितसमूहालंबनस्य स्वरूपासिद्धिविषयकत्वेन तदुत्तरानुमितौ पक्षे हेतुग्राहित्वाभावप्रयुक्तोभयाभावोऽस्त्येवेति वा
च्यं अत्रोभयाभावं प्रति प्रयोजिका स्वरूपासिद्धिविषयिता वास्तवानाहार्यपक्षधर्मताज्ञानस्थले चासाधारण्यविषयितेति साधारण्यविष
यकनिश्चयोत्तरानुमितिसामान्यवृत्तिविरोधिविषयिताप्रयुक्तोभयाभाववत्त्वस्य विषयितादृशयत्किंचित्प्रयोज्यतायाः प्रसिद्ध्यादुरुपपाद
त्वात्। अथोक्तदोषवारणाय यद्रूपावच्छिन्नविषयक ○ निश्चये अनाहार्यपक्षधर्मताग्रहकालीनत्वमेव निवेश्यते अनाहार्यत्वं चासाधारण्य

१

१७९ विषयकनिश्चयकालीनत्वाहार्यत्वोभयवत्त्वमितिस्वरूपासिद्धिसंग्रहः नापि ह्रदो वह्निमान् जलादित्यादौ जलत्वव्यापकवह्न्यभावादावतिव्याप्तिः आहार्य
179 पक्षधर्म पक्षधर्मताज्ञानकालीनतद्विषयकनिश्चयोत्तरानुमितितावुभयाभावस्याविरोधिविषयित्वात् ·मैवं· वह्निव्यापकाभावप्रतियोगिजलत्वं वह्नि त्वाप्रयुक्त
मज्जलादित्यादौ स्वरूपासिद्ध्यव्याप्तेः पक्षधर्मताग्रहस्यैवासाधारण्यग्रहत्वेनानाहार्यस्यैवोपादेयत्वात्· अत्रैव जलत्वव्यापकवह्न्यभावे ऽतिव्या
व प्तेश्च एतेन हेतुमत्पक्षविषयकानाहार्यज्ञानाकालीनत्वासाधारण्यविषयकत्वोभयाभावविशिष्टमेव यद्विषयकनिश्चयविशेषणं अतो नासाधा
रण्याद्यसंग्रहः इत्यपास्तं वह्निव्यापकीभूताभावप्रतियोगिजलत्वं जलाभाववदितिस्वरूपासिद्धिविषयकनिश्चयस्यानाहार्यहेतुमत्पक्षज्ञानाकालीन
त्वासाधारण्यविषयकत्वोभयवत्त्वात्· जलव्यापकवह्न्यभावे ऽतिव्याप्तेश्च· यत्तु पक्षधर्मताज्ञानं न पक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मघटितमपि तु
पक्षतावच्छेदकताश्रयघटितमेव· विशिष्टधर्मावच्छिन्नपक्षकस्थले वह्निव्यापकीभूताभावप्रतियोगिजलत्वं जलत्ववान् ह्रद इति ज्ञानसत्त्वेपि नीलह्रदो वह्नि
मानिति ग्रहप्रतिबंधकत्वे पर्याप्तिनिवेशप्रयोजनाभावात् एवं चोक्तस्थले केवलजलत्वं जलत्ववदित्याहार्यपक्षधर्मताज्ञानस्यापि निरुक्तविशेषणाक्रान्ततया न
जलव्यापकवह्न्यभावादौ चातिप्रसंगः उक्तस्थले केवलजलाभाववज्जलस्यैव स्वरूपासिद्धित्वं न तु जलाभाववद्विशिष्टजलस्य विशिष्टांतरघटितत्वादि
ति तन्न· विशिष्टजले जलत्ववत्ताज्ञानं प्रतिजलत्वसामानाधिकरण्येन जलाभाववत्ताग्रहस्याप्रतिबंधकत्वात्· अवच्छेदकावच्छेदेन तद्ग्रहस्य च विशिष्टजले ज शिव·
लाभाववत्त्वशरीरे ऽनंतर्भावात्· तादृशस्वरूपासिद्धेरलक्ष्यत्वे बीजाभावात्· तस्मात्पक्षवृत्तित्वाघटितमेवासाधारण्यमित्यनेन विरोध इति· अत्रेके समाद

धनिपक्षवृत्तित्वाघटितमेवासाधारण्यं परंतु यद्विषयकनिश्चयेअसाधारण्यत्वावच्छिन्नविषयतामात्रनिरूपितत्वपक्षधर्मतानिश्चयाकालीनतो
भयाभावो विशेषणं पक्षधर्मताज्ञानकालीनएवासाधारण्यनिश्चयस्तादृशोभयाभाववानिति नासाधारण्येऽव्याप्तिः एवं च तत्स्थलीयस्वरूपा
सिध्यादावपि नाव्याप्तिः तद्विषयकज्ञानस्यासाधारण्यविषयितातिरिक्तहेत्वभावादिविषयकत्वात् तन्मात्रविषयकत्वं च तदव्यापकविषयिताशू
न्यत्वे सति तद्विषयितावत्त्वं तेन नतद्घटकपदार्थविषयितानां तद्विषयितातिरिक्तविषयकत्वेपि न तन्मात्रविषयकत्वाप्रसिद्धिः न च पक्षधर्मताज्ञाना
कालीनासाधारण्यघटादिविषयकनिश्चयस्यापि यथोक्तविशेषणाक्रान्ततया तदुत्तरानुमितौ निरुक्तोभयाभावविरहादिति वाच्यं जातिमा
निरूक्त न्वह्न्यभाववानिति ज्ञानवारणार्थमव्यापकविषयिताशून्यत्वस्यावश्यकतयाऽनिश्चयस्य तादृशयद्रूपावच्छिन्नविषयनिश्चयानंतर्भूतत्वेनादोषात्
यद्वाऽसाधारण्यत्वपर्याप्तावच्छेदकतानवच्छिन्नविषयिताकत्व पक्षधर्मतानिश्चयाकालीनत्वोभयाभाव एव विशेषणं निश्चयश्चाप्रामाण्यज्ञानानास्कंदि
तानाहार्यनिश्चय इति तेनाव्यापकविषयिताशून्यत्वस्यैतदर्थमनुपादानेपि न क्षतिरिति अनाहार्यपक्षधर्मताज्ञानकालीनत्वमेव यद्विषयकनि
श्चयविशेषणं वह्निव्यापकीभूताभावप्रतियोगिजलत्ववह्निमज्जलादित्यादौ स्वरूपासिद्धेः संग्रहाय असाधारण्यत्वपर्याप्तविषयितावच्छेदकतानि
त्म श्चयकालीनत्वाहार्यत्वोभयाभाववत्त्वमेवानाहार्यत्वं असाधारण्यव्याप्यत्वादिविषयकज्ञानकालीनाहार्यपक्षधर्मताज्ञानसंग्रहवारणायाव्यापकवि
षयिताशून्यत्वं यद्रूपावच्छिन्नविषयकनिश्चयविशेषणं पूर्ववत् असाधारण्यतद्व्याप्यवह्नित्वादिप्रकारकज्ञानस्यापि असाधारण्यत्ववह्नित्वोभयाव

१८० 180 च्छिन्नविषयितायाः असाधारण्यविषयिताव्यापिकायाः सत्त्वेन वारणादित्यपि केचित्. परे तु प्रसक्तवृत्तित्वाघटितमेवासाधारण्यं परं तु हेतुमदवगाहित्वसाध्यावगा
हित्वे नाहार्यज्ञानानुमत्याता दृशानुमितिसामान्ये उभयाभावसत्त्वात् तादृशाधिकरणतायां विरोधिविषयिताप्रयुक्तत्वसत्त्वाच्च. विशेष्यविशेषणदलनिर्वाहात्. एते
न विशेष्यदलसत्त्वनिर्वाहाय यद्विषयकनिश्चये हेतुमत्प्रसक्तनिश्चयाकालीनत्वासाधारण्यविषयकत्वोभयाभाववत्त्वात्मकं विशेषणमनुपादेयमेवं च
च निर्वह्निः पर्वतो वह्निमानित्यादौ पाषाणमयत्ववत्त्वर्वर्तते इति व्याप्तिवारणाय विशेष्यदलं तत्सत्त्वेऽपि विशेषणदलं नास्तीति वाच्यं. विशिष्टांतरविषयितावत्त्वप्र
५ योज्यत्वस्य ज्ञाने वैशिष्ट्याप्रयोज्यत्वे सति विशिष्टांतरविषयिताप्रयोज्यत्वं तदभाव इति असाधारण्यसंग्रहात्. एवं च विशिष्टबुद्ध्याघटितत्वम् आवश्यकं व
क्तनो विशिष्टांतरविषयितात्वव्यापकरूपानवच्छिन्नस्वविषयतानिष्ठप्रयोजकताकत्वनिवेशान्नानुपपत्तिलेशोऽपि. विशिष्टबुद्ध्याघटितत्वं चमावश्य
कं एतेन मेयत्वविशिष्टासाधारण्येऽतिव्याप्तिः प्रसक्तेति समादधिरे. प्रतिबंधकतावच्छेदकविषयितायाः प्रतिबध्यतावच्छेदकविषयिताभावप्रयोज
कत्वेन निवेशे क्वचित् प्रतिबध्यतावच्छेदकविषयितायाः दुर्मिलतया विषयिताप्रयुक्तत्वासंभवेनाव्याप्तिमाशंकतेऽथेति. अप्रतिबंधकतये ति. प्रति
बध्याप्रसिद्धेरिति भावः तद्विषयविषयकानाहार्यज्ञानप्रसिद्धिस्थलेऽव्याप्तिमुक्त्वा तदप्रसिद्धिस्थले तामाहैवमिति. न च वह्निमानभाववानित्यनाहार्यज्ञा
नमत्रापि प्रसिद्ध्यतीति वाच्यं तत्र दोषज्ञानप्रतिबध्यत्वसंभावनायोग्यायोगात्. दीधितिकृता पर्वतत्वावच्छेदेन निर्वह्नित्वस्य पक्षतावच्छेदकघटकत्वस्य प शिव.
रिष्कारेणाव्याप्तिरुद्धृता न त्वस्य त्रेऽसाशयेनान्यत्राव्याप्तिमाहैवमिति. तज्ज्ञानस्येति. पर्वतत्वावच्छेदेन वह्निमत्त्वावगाहित्वानं प्रतिबंधकत्वेऽपि तादृशावै

वगाहितायाः निर्वह्निपर्वतत्वावच्छेदेनवह्निमत्त्वावगाहित्वाव्यापकतयाप्रकृतानुपयोगादित्यर्थः नापीत्यादि· पर्वतत्व व्यापकत्वविशिष्टस्वरूप
संबंधेनवह्न्यभाववत्त्वमित्यर्थः स्वरूपसंबंधरूपप्रयोज्यप्रयोजकभावनिवेशेउक्ताव्याप्तिरिति· तदनिवेशयतांप्रकारांतरेणवस्तुमात्रेतिव्याप्ति
मप्यकृद्वरतामनुस्थापयतियत्तुइति· प्रयुक्तत्वांतोपादानवैयर्थ्यंवारयितुंप्रथमतःप्रयुक्तत्वंव्याचष्टेप्रयुक्तत्वमिति· विरोधिविषयितायाःस्व
रूपसंबंधेनोभयाभावव्याप्यत्वेबाधादेराहार्यनिश्चयमादायासंभववारणाययद्विषयकानाहार्यनिश्चयवृत्तित्वविशिष्टविरोधिविषयितानिवे
श्यावमपिवक्तमात्रेतिव्याप्तेर्नवारणसंभवं नचयद्विषयकनिश्चयत्वव्यापकीभूतविरोधिविषयिताशालिनिश्चयत्वव्यापकोभयाभावनिवेशेन
तद्वारणमितिवाच्यं तथापि यथाश्रुतेपिचपूर्वतोवह्न्यभाववत्पर्वतकालीनघटवान्वह्न्यभावव्याप्यादित्यादौवह्निमत्पर्वतेतिव्याप्तेर्वह्निमान्हृदेवह्नि
व्याप्यद्रौधूमवानित्यादौवह्न्यभाववद्व्याप्तेश्चेत्यतःवक्ष्यमाणरीत्यानिवेशलाभार्थंसंबंधंदर्शयतियद्विषयकेति· नन्वेवंतदुत्तरानुमितिविषय
स्यवैयर्थ्यमित्यतआहतादृशेतिउक्तपरंपरायाःसंबंधत्वेमानाभावःद्वधानिश्चयोपादानेनशिरोवेष्टनेनेतिन्यायापातश्चेत्यतआहेवंचेतिविरो
धीति· यद्रूपावच्छिन्नविषयिताव्यापिकाविरोधिविषयितातद्रूपावच्छिन्नविषयिताशालिनिश्चयेत्यर्थः विरोधिविषयित्वादौनिश्चयवृत्तित्वंनप्र
वेश्यंनिष्प्रयोजकत्वात्· यथाश्रुतेवह्निमत्पर्वतविषयितावच्छिन्नघटविषयितायाविरोधिविषयिताव्याप्यत्वेनोक्तिप्रसक्तेर्दुर्वारत्वात्· नन्वेवंए
कदेशावारणेऽनुमितित्वव्यापकत्वंव्यर्थमितिवाच्यंव्यापकत्वघटितस्यैवशेषस्यवक्ष्यमाणातिव्याप्तिवारकत्वात् तद्घटितशेषस्यतद्वारकत्वात्

१

१८१ त्व: अनुमितित्वेति अनुमितित्वस्य प्रतिबध्यतावच्छेदकत्वं वक्ष्यमाणप्रकारेण यत्तु कारणतामनुरुध्य शेषवैयर्थ्यमिति · उक्तस्थले पर्वतत्वसामानाधिक
181 रण्येन वह्न्यभावादिमत्त्वेति व्याप्यसत्त्वान्निश्चययोस्तत्रानुमितिसामान्ये उभयाभाव इत्यं तस्य वैयर्थ्यमित्यर्थः अव्याप्तेश्चेति · इदं तु बोध्यं अवच्छेदकावच्छे
देन साध्यसाधनेसामानाधिकरण्ये वा धेऽव्याप्तिस्तन्निश्चययोस्तत्र सामानाधिकरण्येनानुमितिसंभवात् · उभयाभावप्रतियोगितावच्छेदककोटौ अव
च्छेदकावच्छेदेन साध्यावगाहित्वोक्तौ तु सामानाधिकरण्येन साध्यसाधनेसामानाधिकरण्येन वा धेऽतिव्याप्तिरतः अवच्छेदकावच्छेदेनें · साध्यसिद्धिस्थ
॥लीयं लक्षणं एतन्मते पि भिन्नमेव सौकार्यं एतत्त्वोभयाभावप्रतियोगितावच्छेदककोटौ साध्यतावच्छेदकसंबंधादिति निरुपक्षतावच्छेदकादि व्यापक
॥त्वावच्छिन्नसांसर्गिकविषयि · तां निवेश्य शेषरहितमेव · विरोधिविषयितापदार्थे च व्यापकत्वाविशेषितविशेषणतानिष्ठसांसर्गिकविषयितानि
फादि वेश्या तेन कालिकसंबंधेन वह्न्यभाववह्न्यभावविशिष्टपर्वते अवच्छेदकावच्छेदेन पर्वते वह्निसाधनेनातिव्याप्तिः यद्वा एतदतिव्याप्तिवारणाय शेषएवोपाद
यः ननु तादृशविशेषणतानिष्ठसांसर्गिकविषयिताता दृशी च वह्नित्वावच्छिन्नप्रकारतानिरूपितसंयोगसंबंधावच्छिन्नप्रतियोगितानिष्ठसांसर्गिक
निरूपिता विषयितांभावप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपकत्वादिरूपासामानानाधिकरण्येन साध्यसिद्धिस्थलीयलक्षणे यद्यप शि व·
भयाभावप्रतियोगितावच्छेदकशरीरे शुद्धसाध्यतावच्छेदकसंबंधं निवेश्य तादृशधर्म्यंशे धर्मितावच्छेदकव्यापकताविशिष्टविशेषणतासंबंधेन प्रका
राभावविषयिताविरोधिविषयितापदार्थः तथा च तादृशविरोधिविषयितानतिरिक्तवृत्तियद्विषयितात्वं एतावन्मात्रे कृते पि सामानाधिकरण्येन साध्य

सिद्धिस्थलेसामानाधिकरण्येनबाधेनातिव्याप्तिःतद्विषयितायाःनिरुक्तविरोधित्वाभावादिति॰नशेषसार्थक्यंतथापिएतल्लक्षणेपिप्रकाराभावसं
बंधेविशेषणतारूपेधर्मितावच्छेदकव्यापकत्वंनप्रवेश्यंनद्रव्याशयेनावच्छेदकावच्छेदेनसामानाधिकरण्येनभिन्नेपिचलक्षणेशेषसार्थक्यंनिर्वह्निः
पर्वतोवह्निमानित्यादौऽवच्छेदकावच्छेदेनवह्न्यभावस्यपक्षघटत्वेअवच्छेदकावच्छेदेनसाध्यसिद्धिस्थलीयंलक्षणंसामानाधिकरण्येनतस्यतद्घटक
वह्नि त्वेसामानाधिकरण्येनसाध्यसिद्धिस्थलीयंलक्षणंनिर्वह्निमानित्यादौतुवह्न्यभाववद्वृत्त्यादिःवह्न्यभाववन्मात्रंवादोषः॰धर्मितावच्छेदकाविशेषितायाध
र्मिविषयितायाएवविरोधिविषयितापदार्थघटकत्वात्॥वह्न्यभावावच्छेदेनवह्नेःसाधनेपिसाध्यतावच्छेदकसंबंधेऽभावत्वत्यागेनलक्षणसंगतिःप
क्षतावच्छेदकाप्रवेशेपिसद्धेतौसाध्याभाववत्पक्षाप्रसिद्ध्यैवनातिव्याप्तिरिति॰येतुविरोधित्वमन्यथानिरुच्यतल्लक्षणमुपवर्णयंतितन्मतमुत्थापयति
यत्विति॰निरुक्तत्वंसाध्येसाध्यतावच्छेदकावच्छिन्नत्वंहेतौचप्रकृतसाध्यव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नत्वमितिसमूहालंबननिश्चयलाभः॰ता
दृशेतिनिरुक्तसमूहालंबननिश्चयवृत्तीत्यर्थः॰विशेषणेतिस्वनिरूपकविरोधिभूतैककोटिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतानापन्नवि
रोधिकोट्यंतरनिष्ठप्रकारतानिरूपकेत्यर्थः॰नशेषवैयर्थ्यमितितत्पद्विषयकनिश्चयोत्तरानुमितित्वव्यापकउभयाभावदलंतस्यवैयर्थ्यमित्यर्थः॰उपगमे
नेतित्वयेतिशेषः॰स्वमतेसमूहालंबनात्मकाहार्याभावात्तथाविधाहार्यचाहार्यानाहार्यविषयिणयोःसमावेशेननिरुक्तनिश्चयत्वोपपत्तेःस्वमतेऽप
ताया गमेप्याहवह्न्यादीति॰तथाचयत्किंचिद्विषयितादृशनिश्चयावृत्तित्वनिवेशेआहार्यविषयित्वानाहार्यविषयित्वयोर्भेदादनाहार्यनिश्चयीयविषयितायाएवता

२ = विरोधित्वंनास्तनं ६ दश संशयत्वस्यसमुच्चयसाधारण्यपक्षे ...

१८२ 182

दृशनिश्चयावृत्तितयातामादायैवलक्षणस्य संगतिः परंतु तत्परीत्या घटादावुदासीनेऽतिव्याप्तिरित्याह घटादीति दोषेति वह्न्यभाववान्ह्रदो घटवानित्याना

हार्यज्ञानीयवह्न्यभाववद्ह्रदविशेष्यतानिरूपितघटविषयितायाऽन्यत्वाद्घटादावतिव्याप्तिरित्यर्थः घटो वह्न्यभाववद्ह्रदवानिति ज्ञानमादाय चोक्तदोषोव

गंतव्यः अथैतन्मते घटादावुदासीने कथमतिव्याप्तिः तद्विषयितात्वव्यापकरूपावच्छिन्नप्रयोज्यत्वाप्रसिद्धेः विशिष्टांतरीभूतदोषविषयिताप्रयोज्यत्वसत्ता

च्चेति चेन्न एतन्मते स्वरूपसंबंधरूपः प्रयोज्यप्रयोजकभावो नास्त्येव एतेन विशिष्टांतरविषयित्वाप्रयोज्यस्वविषयिताप्रयोज्योभयाभावप्रयोजकाभा

वाधिकरणताकं यद्घटत्वं तदन्यत्वमपि प्रत्युक्तं निर्वह्निर्वह्निमानित्यादौ प्रमेयत्वविशिष्टनिर्वह्निनिष्ठवह्नित्वप्रतियोग्यप्रसिद्ध्याऽव्याप्तेः न च विशिष्टांतर

निरूपितता दृशविषयिताशालिनिश्चयोत्तरानुमितित्वव्यापको यउभयाभावप्रयोजकीभूताभावस्तदन्यो यद्रूपावच्छिन्नीयतादृशविषयिताशा

लिनिश्चयोत्तरानुमितित्वव्यापकउभयाभावप्रयोजकाभावस्तत्त्वं विशेष्यविशेषणपदद्वयार्थः व्यभिचारघटितबाधे च साध्यव्याप्यहेत्ववगाहि

त्वाभाववत्त्वतादृशानुमितित्वव्यापको न पक्षसाध्यहेतुवैशिष्ट्यावगाहित्वाभावस्तदन्यश्च पक्षसाध्यवैशिष्ट्यावगाहित्वाभाव इति नाव्याप्तिरिति सांप्र

तं सत्प्रतिपक्षादिरूपविशिष्टांतरमादाय बाधादावसंभवात् नापि विशिष्टांतरनिरूपितता दृशविषयिताभिन्नत्वं निश्चयविशेषणं व्यभिचारघटित

बाधाद्यव्याप्तेः नापि विरोधिविषयितायां विशिष्टांतरानिरूपितत्वं प्रमेयत्वादिविशिष्टदोषवारकत्वेपि दोषविशिष्टप्रमेयत्वाद्यवारकत्वात् न च विशिष्टांतर

विषयित्वाघटितत्वं वाच्यं व्यभिचारघटितेऽप्रमित्यादिना वारितातिव्याप्तेरुन्मज्जनस्य चक्रं तेन धूमव्यभिचारिवह्निमन्निरूपितबाधविषयिताव्यक्ति

न्यमित्यादि विवक्षयैतद्दोषावारणात् यद्रूपावच्छिन्नीयतादृशविषयिताशालिनिश्चयोत्तरानुमितित्वव्यापकोभयाभावप्रयोजकाभावः विशिष्टांतरीयतादृश

वच्छिन्नाघटितत्वं यद्रूपावच्छिन्नविशेषणमित्यदोषः एवं चैतादृशरीत्याविशिष्टाघटितत्वसार्थक्यात घटादिमात्रानुधावनं संगच्छते दोषविषयिताव

तरी

शिव

मादायतथाविधवह्निमतिनिरुक्तविशिष्टांतराघटितेऽति व्याप्यनभिधानेपिनासंगतिरितिकुतवुद्धयो विदांकुर्वंतु· अप्रतीकारादिति आहार्यविष
यितायाँ पिसामान्यांतर्गततया निरुक्तनिश्चयावृत्तित्वैमसंभवइक्तिकमेवेति असंभवप्रतीकारासंभवादित्यर्थः· भ्रमान्येति भ्रमावृत्ति यदीयवि
षयितासामान्यमित्युक्तो निर्वह्निः पर्वतोवह्निमानित्यादावुदासीनेघटादावतिव्याप्तिः केवलघटविषयितायास्तादृशभ्रमवृत्तित्वेपि भ्रमावृ
त्ते: आश्रयासिद्धिरूपदोषविषयितावच्छिन्नायावह्निमान्पर्वतोघटवानित्यनाहार्यज्ञानीयघटविषयितायाएवतादृशनिश्चयावृत्तित्वसंभवात्
भ्रमान्यवृत्तित्वोक्तौतु घटविषयितायाः भ्रमवृत्तित्ववद्भ्रमान्यवृत्तित्वस्यापि संभवात्सामान्यांतर्गतायांतस्यातादृशनिश्चयावृत्तित्वासंभवान्नाति
व्याप्तिः ग्रंथकाररीतीति· एवंरीत्यापरिष्कारलेखनस्य ग्रंथकारलेखनविरुद्धत्वंस्यादित्यर्थः स्वयंस्वरूपसंबंधरूपः प्रयोज्यप्रयोजकभावइत्युक्तंपेत्व
न्यथैवप्रयोज्यप्रयोजकभावनिर्वचनमाहुस्तदूषयितुमुपन्यस्यतिएतेनेति अनुमितित्वेनानाहार्यलौकिकसंन्निकर्षाघजन्यज्ञानत्वेनवाधसामान्य तिमतंभेदःतत्र
प्रतिवध्येतावच्छेदकंतुन प्रत्यक्षसाधारणंआहार्यप्रत्यक्षोदयात्‌ किंत्वनुमितित्वघटितं योग्यताज्ञानेनान्यथासिद्धतया शाब्दबोधेबाधाभावस्याहेतुत्वा
त्उपनीतभानवारणाँचालौकिकप्रत्यक्षत्वघटितंप्रतिवध्यतावच्छेदकांतरँमुभयथापिप्रतिवध्यतायांतादृशावगाहित्वावच्छिन्नत्वमात्रंस्वरूपसंबंध
रूपंत्वंप्रविष्ठमितिदर्शयितुंसमासेनाभिधानंमितिमतेनानुमितित्वस्यसिद्धांतमतेलौकिकसंन्निकर्षाघजन्यज्ञानत्वस्योपादानेरतित्वरूपस्यविव
क्षितत्वान्नपाषाणमयत्ववत्सर्वतादावतिप्रसंगः अतएवसिद्धिविषयस्यापिवारणेविषयित्वादौविरोधित्वकथनंस्वरूपकीर्तनमात्रमित्यभिहितंयथोप

२ स्वरूपेतिनतुलक्षणेनिविष्टंप्रयोजनाभावात्‌ २
२ मितिमतेनानुमितित्वस्यसिद्धांतमतेलौकिकसंन्निकर्षाघजन्यज्ञानत्वस्योपादान प्रतिवंधकतावच्छेदकत्वस्यानतिरिक्त २

१८३ 183

दर्शितस्थले च प्रमाणाभावइत्याशयः वस्तुतस्तु दीधितिकृतो नाहशाभिप्रायमजानतः कस्यचित्तथाभिधानमिति तद्दर्पितत्र दूषणमेवेति बो
ध्यं· केषांचिदेतादृशपूर्वपक्षमुपन्यस्यति अत्र केचिदिति· केचिदित्यस्वरसस्सूचनाय स्वचकेचिदित्यादिकस्यैव सार्वत्रिकत्वमित्यसंगतं तथा
सति ह्रदे वह्नेः साधने धूमो दुष्टइत्यादिव्यवहारानुपपत्तेरित्यादि· निर्वह्निर्वह्निमानित्यादौ वह्न्यभाववन्निर्वह्नित्वावच्छिन्नस्य बाधत्वं न संभवतित
ज्ज्ञानप्रतिबध्यज्ञानाप्रसिद्ध्या तद्विषयिताप्रयोज्यो भयाभावाप्रसिद्धिरिति पूर्वपक्षे स्वयं समाधानमुपन्यस्यति परे त्विति· समवायसंबंधावच्छिन्नह्रद
त्वनिष्ठधर्मितावच्छेदकताकवह्न्यभाववत्ताग्रहसत्वे ह्रदत्वनिष्ठकालिकसंबंधावच्छिन्नधर्मितावच्छेदकताकानार्यवह्निविशिष्टबुद्ध्युदयादेकसंबं
धावच्छिन्नायाः समानधर्मितावच्छेदकतायाः संबंधत्वमिति प्रकृते दैशिकविशेषणतासंबंधावच्छिन्नधर्मितावच्छेदकतासंबंधेनानाहार्यवह्निमत्ता
बुद्धिमात्रेण तत्संबंधेन वह्न्यभाववत्ता निश्चयमात्रं प्रतिबंधकत्वमित्याशयेन घटाभाववतीति· एवं च निर्वह्निर्वह्निमानित्यत्र वह्न्यभाववान्निर्वह्निरित्या
कारकज्ञानस्य घटाभाववान्वह्निमानित्याकारकानाहार्यवह्निमत्ताज्ञानमात्रे एव प्रतिबंधकतया विरोधिविषयिताप्रयुक्तत्वसंभवत्येवेत्यादे
वं चेति· अत्र ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभाववद्ध्रदात्मकदोषविषयकज्ञानोत्तरज्ञानसामान्यनिष्ठायः प्रतिबध्यतावच्छेदकीभूतवह्नित्वाव
च्छिन्नप्रकारतानिरूपितह्रदत्वनिष्ठधर्मितावच्छेदकताकत्वरूपविषयितासंबंधावच्छिन्नह्रदत्वनिरूपितसंबंधित्वाभाववत्त्वप्रतिबंधकज्ञानी शिव·
यवह्न्यभाववत्त्वावच्छिन्नप्रकारतानिरूपितह्रदत्वनिष्ठधर्मितावच्छेदकतात्मकविषयितायाः प्रयोजकत्वात् ह्रुक्षणसमन्वयः न च तत्संबंधावच्छिन्नतत्सं

वंधरूपमिति निरुक्तप्रतिवध्यतावछेदकसंवंधाभावस्य वह्न्यभावत्वावछिन्नप्रकारतानिरूपितधर्मितावछेदकताप्रयोज्यत्वेन तद्घटकवह्न्यभाव
प्रकारताप्रयोज्यत्वेन विरोधिविषयिताप्रयोज्यत्वेपि निरुक्तोभयाभावस्य तत्प्रयुक्तत्वं दुर्लभमिति वाच्यं· प्रतिवध्यतावछेदकसंवंधाभावस्य
विरोधिविषयिताप्रयुक्तत्वेतादृशसंवंधघटितवह्नित्वावछिन्नप्रकारकत्वाभावेपि व्यापकाभावस्येति न्यायेन तदनपायात्· व्यभिचारादा
वप्येतादृशरीत्यालक्षणसंगतिः कार्या· तद्देशनिष्ठस्येति· देशपदं धर्मितावछेदकपरं· अथस्वपूर्ववृत्तिप्रतिवंधकज्ञानीयप्रतिवंधकतावछेदक
संवंधस्य प्रतिवध्यज्ञानस्य प्रतिवध्यतावछेदकसंवंधेन तद्देशासंवंधित्वएव प्रयोजकं न तु प्रतिवंधकनिश्चयोत्तरानुमितिसामान्यस्य तत्संवंधेन त
द्देशासंवंधित्वे ह्रदादिधर्मितावछेदकघटादिमत्ताज्ञानस्य तदुत्तरमुत्पत्तेः एवं च वाधादिघटकवन्ह्यभावप्रकारितायाः स्वानंतरोत्पन्नानुमितिसा
मान्यनिष्ठोभयाभावप्रयोजकत्वेन संभवति· तादृशावगाहिताव्यापकतद्धर्मितावछेदकसंवंधित्वाभावस्यैव प्रयोजकत्वात्· क्वचित्साध्यप्रकार
कानाहार्यज्ञानस्यासंभवेन तदुत्तरज्ञाने साध्यादिप्रकारकत्वनिवेशासंभवादिति चेन्न· ह्रदो वह्न्यभाववानित्यादिनिर्णयसत्त्वेपि ह्रदो धूमवान् पर्व
तो वह्निमानित्यादिनिर्णयोत्पत्त्या केवलधर्मितावछेदकतायाः प्रत्यासत्तित्वासंभवेन वन्हिप्रकारतानिरूपिताया एव तस्याः प्रत्यासत्तित्वमिति ता
दृशसंवंधेनोत्तरोत्पन्नज्ञानसामान्यस्यैवासंवंधित्वमक्षतमित्युक्तमिति न कोपि दोष इति दिक्· तदवछेदकता· वछेदकत्वेति· तदवछेदकताधर्मि
तावछेदकत्वावछिन्नत्वेन तदवछेदकत्वं च धर्मितावछेदकइति वोध्यं आहार्यज्ञानस्यापि कालांतरीणेछाभावविशिष्टावछेदकतासंवंधेनोत्पत्त्या अनाहार्य

=तत्संबंधावछिन्नवह्नित्वावछिन्नप्रकारतानिरूपितधर्मितानिरूपितप्रकारतासंबंधावछिन्नाभावत्वावछिन्नप्रकारतानिरूपितधर्मितानिरूपिततत्संबंधावछिन्नावछेदकतासंबंधेनानाहार्यज्ञानसामान्यं प्रति तत्संबंधावछिन्नप्रतियोगित्वघटितसंबंधावछिन्नवह्नित्वावछिन्नप्रकारतानिरूपितधर्मितावछेदकतायाः तादृशसंबंधावछिन्नायाः निष्ठ्यत्वेन प्रतिबंधकतावछेदकसंबंधत्वं दिगर्थः॥=२

१८४ 184 त्वापत्तिरतोऽव्यवहितशकुक्षणावच्छिन्नेति· ननु निरुक्तसंबंधावच्छिन्नप्रतियोगिताकेच्छाभावाधिकरणतावैशिष्ट्यस्य वह्नित्वावच्छिन्नप्रकारतानिरूपित
धर्मितावच्छेदकतायां निवेशे वह्न्यभाववनिष्ठतादृशधर्मितावच्छेदकताया एवाप्रसिद्धिः इच्छासत्त्वे एव निर्वह्निर्वह्निमानित्याहार्यज्ञानस्योदयात्· नदीयाव
छेदकताया इच्छाविशिष्टत्वादिच्छाविरहदशायांच तादृशज्ञानस्यैवानुपपत्तेः रितिकथं लक्षणसमन्वय इत्यालोच्य कल्प्यांतरमाह तादृशीतिनिरुक्त संबं
धावच्छिन्नप्रतियोगिताकेच्छाभाववसैं चेच्छाकालेपि प्रतिबंधकज्ञाने सत्वात्केन संबंधेन विशेषणत्वमित्याकांक्षायामाह विशेषणेति· एकपुरुषस्य
घटाभाववान्वह्न्यभाववानितिज्ञानोत्तरमन्यपुरुषस्य घटाभाववान्वह्निमानितिज्ञानोत्पादादाहान्यत्राधिकमिति· ननु रूपीयत्वमित्यस्यार्थः पर्वतोव
ह्न्यभाववान्वह्नेरित्यादौ वह्न्यभावव्याप्यवह्निमत्ताज्ञानस्य वह्निमान्वह्न्यभाववानित्यादौ वह्निव्याप्यवह्न्यभाववत्ताज्ञानस्य चाहार्यत्वेपि पर्वतत्वनिष्ठध
र्मितावच्छेदकताया एव नत्वसंबंधेन पर्वतत्वासंबंधित्वप्रयोजकत्वात्लक्षणसमन्वयः एवमेवसिद्धिप्रतिबंधकताया धर्मितावच्छेदकतासंबंधावच्छि
न्नत्वमंगीकृत्य विरोधित्वनिवेशनप्रयोजनमुपपाद्यमिति· ननु विशेष्यतावच्छेदकतायाः प्रत्यासत्तित्वमते प्रतिबंधकज्ञाने विशिष्यैतावच्छेदकमनि विशेष्य
वेश्यनिश्चयत्वं दुर्वचं तथाहि· वह्न्यभाववत्ताज्ञाने न तावद्वह्न्यभावाभावाप्रकारकत्वे सति वह्न्यभावप्रकारकत्वं निर्णयत्वं महानसो वह्न्यभावाभा
=स्वप्रतिबंधक ज्ञात= ववान्वह्नौ वह्न्यभाववानितिज्ञानासंग्रहात्· नापि स्वीयवह्न्यभावप्रकारतानिरूपितविशेष्यतावच्छेदकधर्मावच्छिन्नविशेष्यतानिरूपितवह्न्यभावाभा शिव·
वप्रकारकत्वं तादात्म्याभयसंबंधेन वह्न्यभावाभावज्ञानविशिष्टान्यत्वं सत्त्वं तैन विवक्षितं वह्न्यभावाभावप्रकारताया ज्ञानं तरीयवह्न्यभावप्रकारतानिरू

साधारण्यात्

पितविशेष्यतावच्छेदकीभूतमहानसत्वावच्छिन्नविशेष्यताकत्वेनासंग्रहवारणाय स्वीयत्वतादात्म्ययोरुपादानमिति नियुक्तं महानसो वह्न्य
भाववान्नवा ह्रदो वह्न्यभाववानिति ज्ञानयोः संग्रहात् नापि स्वावच्छिन्नविशेष्यतानिरूपितवह्न्यभावाभावप्रकारताशून्यत्वस्वावच्छिन्नविशेष्य
तानिरूपितस्वेवह्न्यभावप्रकारकत्वोभयसंबंधेन किंचिद्धर्मविशिष्टत्वं तत् उक्तस्थल एव तथाविधनिर्णयस्य विशिष्टस्य विशेष्यताव
च्छेदकता संबंधेन महानसत्वेपि सत्वात् महानसो वह्निमान्न वेति विशिष्टबुद्धिर्न स्यात् अथ वह्न्यभावप्रकारतानिरूपितविशेष्यतायां वह्न्यभा
भावप्रकारत्वानिरूपितत्वमात्रं निवेश्यं तद्घटितसंबंधेन शुद्धज्ञानत्वेनैव प्रतिबंधकताकल्पने विरोधोपस्थितिं विनापि धर्मिज्ञानविशेषादर्श
नकोटिस्मरणादितः संशयोत्पत्तेरानुभविकतया संशयनिश्चययोर्वैलक्षण्याय संशये समुच्चयव्यावृत्तकोटिद्वयप्रकारतानिरूपितएकविशे
ष्यताया एवोपगमात् क्वचिद्विरोधभानस्यापि तत्प्रयोजकाधीनत्वादिति दीधितिकारेण विरोधस्य संसर्गतया अपि क्वाचित्कत्वव्यंजनात् य
तु संशये तादृशविशेष्यताकत्वपितुमशक्यं ह्रदो वह्न्यभाववान् नीलह्रदो वह्न्यभावाभाववान्न वेति संशयस्य तथात्वायोगात् तत्र वह्न्यभावप्रकार
तानिरूपितविशेष्यतायां नीलत्वावच्छिन्नत्वोपगमे नीलह्रदो वह्न्यभाववान्न वेति संशयावैलक्षण्यापत्तेः यदि च तत्र नीलत्वघटिताघटितधर्मावच्छिन्न

=ह्रदत्वावच्छेदेनेत्यर्थः=२

१८५ 185 विशेष्यतेभिन्नएव·परंतुशुद्धह्रदत्वावच्छिन्नविशेष्यत्वांतरंकोटिद्वयप्रकारताकमप्रत्येपतद्व्यक्त्यनेनदाप्रह्रदत्वावच्छिन्नविशेष्यकवह्न्य
भावाप्रकभयकोटिसंशयाद्वैलक्षण्यापत्तिः·विरोधिसामग्रीदशायांनीलह्रदत्वावच्छिन्नविशेष्यकवह्न्यभावाभाववज्ज्ञानंजायतामितीच्छा
सत्वेनादृशसंशयायोगाच्च·यतोशुद्धह्रदत्वावच्छिन्नविशेष्यकवह्न्यभावाभावप्रत्यक्षविरोधिसामग्र्याःप्रतिबंधकतायांह्रदत्वाव
च्छिन्नविशेष्यकवह्न्यभावाभावप्रत्यक्षंजायतामितीच्छायाउत्तेजकत्वंनोक्तेच्छासाधारणरूपेणतथासतिउक्तेच्छासत्वेविरोधिसाम
ग्रीसत्वेनीलभासकसामग्र्यसत्वेशुद्धह्रदत्वावच्छिन्नविशेष्यकवह्न्यभावाभावप्रत्यक्षापत्तेः·किंतुनव्यावृत्तरूपेणेति·नचनीलह्रदेवह्न्य ह्रदेव
भावाभाववान्नपीतह्रदोवह्न्यभाववान्इतिज्ञानवदुक्तज्ञानस्यनिर्णयत्वमेवसुवचमितिवाच्यंतस्यनिर्णयत्वेकार्ये
कालेशुद्धह्रदत्वंधर्मितावच्छेदकीकृत्यवह्न्यभाववत्तानिर्णयस्यविरोधिनःसत्वान्नीलह्रदेतदभाववज्ज्ञानानुदयापत्तेरितिचेन्न·उक्त
संशयेविशेष्यताएकैवपरंतुशुद्धह्रदत्वावच्छिन्नत्वेनएकाकोटिप्रकारतानिरूपितानीलावच्छिन्नत्वविशिष्टह्रदत्वावच्छि शिव·
न्नत्वेनापरकोटिप्रकारतानिरूपितानीलह्रदोवह्न्यभाववान्नवेत्यादिसंशयेतुएकरूपेणैवकोटिद्वयप्रकारतानिरूपितेति

वैलक्षण्यमितिचेन्न संशयसमुच्चययोर्वैलक्षण्यस्य प्रकारांतरेणोपपत्तेः विलक्षणविशेष्यतास्वीकारे मानाभावात्॰ वि
लक्षणविशेष्यकतास्वीकारेपिप्रत्येककोटिप्रकारतानिरूपितविशेष्यताद्वयसत्वेबाधकाभावाच्च॰ संशयसामग्र्याः तत्र
प्रतिबंधकत्वेगौरवात्॰ समुच्चयस्य संशयनिष्ठविलक्षणविषयिताशून्यत्वमेववैलक्षण्यं नतुसंशयव्यावृत्तविषयिताशा
लित्वमपीतिसंशयसमुच्चययोर्वैलक्षण्योपपत्तेश्च॰ प्रत्युतविरलसंशयेविरोधस्यसंसर्गतयाभानोपगमाद्विरोधानवच्छिन्नवि
शेषणतासंबंधावच्छिन्नवह्न्यभावप्रकारतानिरूपितविशेष्यतावच्छेदकत्वसंबंधएवेति॰ तन्न विरोधावच्छिन्नविशेषणा
संबंधसंसर्गकनिर्णयस्याविरोधित्वापत्तेः अथस्वनिरूपकज्ञाननिरूपितत्वस्वावच्छेदकावच्छिन्नत्वोभयसंबंधेनव
ह्न्यभावाभावप्रकारतानिरूपितविशेष्यताविशिष्टान्यायावह्न्यभावप्रकारतानिरूपितविशेष्यतातदवच्छेदकत्वंप्रतिबंध
कताघटकप्रत्यासत्तिः निर्णयात्मकज्ञानस्यवह्न्यभावप्रकारतानिरूपितविशेष्यतायाअपिस्वावच्छेदकावच्छिन्नत्वसं
बंधेनसंशयीयवह्न्यभावाभावीयप्रकारतानिरूपितविशेष्यताविशिष्टत्वात्॰ भूतलंवह्न्यभाववन्नवाह्रदोवह्न्यभाववानिति

१८६ 185

समूहालंबनीयतादृशविशेष्यतायाः स्वनिरूपकज्ञाननिरूपितत्वसंबंधेन तादृशविशेष्यताविशिष्टत्वाच्च क्रमेण संबंधयोर्निवेशः अत्र चा
वच्छेदकावच्छेदेन बाधनिश्चयस्य सामानाधिकरण्येन बाधनिश्चयस्य च प्रतिबंधकत्वं भिन्नमित्यविवादं एवं चावच्छेदकावच्छेदेन बाध
ज्ञानप्रतिबंधकतायां निरुक्तसंबंधाभ्यां वह्न्यभावप्रकारतानिरूपितविशेष्यताविशिष्टान्यत्वमेव निवेश्यं तेन नीलहृदत्वावच्छेदेन वह्न्य
भावाभावप्रकारकशुद्धहृदत्वावच्छेदेन वह्न्यभाववत्तासंशयेन निर्णयत्वप्रसंगः सामानाधिकरण्येन बाधनिश्चयस्य प्र
तिबंधकतायां वह्न्यभावत्वानवच्छिन्नप्रकारतानिरूपितकिंचिद्धर्मावच्छिन्नविशेष्यताभिन्नवह्न्यभावाभावप्रकारता
निरूपितविशेष्यताविशिष्टान्यत्वं निवेश्यं तेन न नीलहृदत्वावच्छेदेन वह्न्यभावाभाववच्छुद्धहृदत्वसामानाधिकरण्येन व
ह्न्यभावमवगाहमानस्य निर्णयस्यासंग्रहः तादृशप्रकारतानिरूपितनीलत्वावच्छिन्नप्रकारतानिरूपितविशेष्यता
न्यत्वस्य तादृशविशेष्यतायामसत्वात् न चैवमपि नीलहृदत्वावच्छेदेन वह्न्यभावाभावप्रकारकतत्सामानाधिक शिव.
रण्येन वह्न्यभावप्रकारकसंशयसंग्रहापत्तिरिति वाच्यं वह्न्यभावप्रकारतानिरूपितविशेष्यतायामपि वह्न्य:

भावान्मप्रकारतानिरूपितकिंचिद्धर्मावच्छिन्नविशेष्यत्वभिन्नत्वस्यनिवेशफलात् नीलह्रदोवह्न्यभाववानि
तिज्ञानस्ययथाप्रतिबंधकत्वात् अन्यथानीलोह्रदश्चनवह्निमानिति निर्णयोत्तरं नीलह्रदोवह्निमानिति
विशिष्टबुद्ध्यनुत्पादापत्तेः नीलावच्छिन्नवह्निप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेनवह्निवि
शिष्टबुद्धिप्रतिवह्न्यभावप्रकारतानिरूपितनीलावच्छिन्नविशेष्यताघटितसंबंधेनवह्न्यभावप्रकारकबु
द्धित्वेनप्रतिबंधकतोपेया। तत्र च वह्न्यभावप्रकारताभिन्नायांनीलत्वानवच्छिन्नप्रकारतातन्निरू
पितकिंचिद्धर्मावच्छिन्नविशेष्यतान्यत्वनिवेशान्न सुंदरनीलह्रदोवह्न्यभाववान्नवेति संशयस्य कदास
इतिदिक् स्वावच्छेदकावच्छिन्नेत्यत्रस्वावच्छेदकत्वंनिरवच्छिन्नंग्राह्यंतेनजातिमान्वह्न्यभावाभाव
वान्ह्रदोनवह्निमानिति निर्णयसंग्रहः जातिमान्वह्न्यभाववानितिनिर्णयस्यतुधर्मितावच्छेदकता
वच्छेदकतासंबंधेनप्रतिबंधकत्वांतरमेवेतिचेन्न स्थानभेदेनविषयताभेदे मानाभावात् निर्णया
त्मकज्ञानीयविशेष्यतापाउक्तोभयसंबंधेनसंशयीयविशेष्यताविशिष्टान्यत्वानुपपत्तेः॥ अत्रोच्य
तेस्वनिष्ठभेदप्रतियोगितानिरूपितस्वावच्छिन्नविशेष्यतानिरूपितवह्न्यभावाभावप्रकारताकत्व

१८७ 187 संबंधावच्छिन्नावच्छेदकत्ववह्न्यभावप्रकारतानिरूपितविशेष्यतावच्छेदकत्वोभयं प्रतिबंधकताघटक
संबंधः द्वितीयसंबंधधर्मितावच्छेदकं वह्न्यभाववान्न वा महानसो ह्रदो न वह्निमानित्यादौ ह्रदत्वं तदव
च्छिन्नविशेष्यतानिरूपिततादृशप्रकारकत्वसंबंधेन ह्रदत्वस्य तादृशज्ञाने विरहान्न दोषः नापि महा
नसो वह्निमानिति ज्ञानानुपपत्तिः प्रतियोगितावच्छेदकत्वं च निरवच्छिन्नं निवेश्यं तेन ह्रदो वह्न्यभाववा
न्न वेत्यादेः सकलस्यापि ह्रदत्वमहानसत्वोभयावच्छिन्नभिन्नत्वेपि न क्षतिः तादृशभेदप्रतियोगिता
वच्छेदकतायाः उभयत्वावच्छिन्नत्वात् न चैवमपि यादृशधर्मे धर्मितावच्छेदकीभूतस्य वह्न्यभावाभाव
वत्ताज्ञानं कस्यापि कदापि न जातं तादृशधर्मनिष्ठनिरुक्तसंबंधावच्छिन्नावच्छेदकताकभेदाप्रसिद्ध्या
तद्धर्मे धर्मितावच्छेदकीभूतस्य वह्निमत्ताज्ञानस्याप्रतिबध्यत्वप्रसंग इति वाच्यं तत्तद्धर्मान्यतमव
त्त्वविशिष्टधर्मितावच्छेदकतासंबंधं प्रतिबध्यताघटकीभूतस्यावच्छेदकावच्छिन्नत्वसंबंधेन व
ह्न्यभावाभावप्रकारतानिरूपितविशेष्यताविशिष्टान्यविशेष्यताघटितसंबंधस्यैव प्रतिबंधक
ताघटकत्वोपगमात् धर्मान्तरधर्मितावच्छेदककवह्न्यभावाभावकोटिकै तद्धर्मे धर्मितावच्छेदक

कवह्न्यभाववत्तानिर्णयस्यधर्मितावच्छेदकतामात्रेणधर्मान्तरेव्यभिचारवारणायविशिष्टान्यत्वनिवे
शः एवंचव्यभिचारान्तरवारणायवृत्तित्वविशिष्टं तत् एवंपघपिवह्न्यभावाभाववतिह्रदेवह्न्यभावप्र
कारकंवह्न्यभावाभाववतिघटेवह्न्यभावप्रकारकमित्यनेकविधाप्रामाण्यग्रहस्यैवोत्तेजकत्वानुरोधात्ध
र्मितावच्छेदकनिवेशः अस्मन्मते अन्यथाह्रदंज्ञानंवह्न्यभावाभाववतिघटेनवह्न्यभावप्रकारकमित्य
प्रामाण्यग्रहसत्वेह्रदेनवह्निमानितिनिर्णयादेववह्निविशिष्टबुद्धिप्रतिबंधानुपपत्तेः नचह्रदोवह्न्य
भाववानितिनिर्णयस्थलेवह्न्यभावाभाववतिह्रदेवह्न्यभावप्रकारकमित्यप्रामाण्यज्ञानमेवनोत्त
तुमर्हतिवह्न्यभावाभाववतिवह्न्यभावप्रकारकमित्यप्रामाण्यज्ञानंतुसर्वमेवोत्तेजकमितिवाच्यं
ह्रदत्वसामानाधिकरण्येनवह्न्यभावग्रहेतत्सामानाधिकरण्येनतदभावज्ञानेबाधकाभावात्
नचैवमपिघटादिघटितभ्रमत्वस्थलेह्रदोवह्न्यभाववानित्यस्यह्रदेवह्निविशिष्टबुध्याविरोधित्वं
नापादयितुंशक्यंअवच्छेदकावच्छेदेनवह्न्यभावाभाववद्घटादिविशेष्यतानिरूपितत्वप्रकार
कग्रहस्यैवाभावनिवेशात्तज्ज्ञानीयवह्न्यभावप्रकारतात्वसामानाधिकरण्येतथाविधघटादि

१८८
188

विशेष्यतानिरूपितप्रकारकत्वग्रहस्याकिंचित्करत्वात् वह्न्यभावप्रकारतात्वावच्छेदेन तद्धेतुघटत्वाद्य
मिश्रिततादृशप्रकारतानिरूपितत्वग्रहस्यैव तादृशमिश्रितत्वग्रहस्याप्रयोजकत्वात् प्रतिबंधकतावच्छे
दकीभूतप्रकारतायास्तत्प्रकाराभाववद्विशेष्यतानिरूपितत्वग्रहमात्रेणाविरोधित्वानुभवात् त
स्य च घटत्वादेरधिकस्य च भानेप्यक्षतत्वाद्धिति वाच्यं वह्न्यभावाभाववद्वृत्ति वह्न्यभावप्रकारता
निरूपितहृदत्वावच्छिन्नविशेष्यताकत्वतथाविधघटत्वाद्यवच्छिन्नविशेष्यताकत्वरूपनानाविधा
प्रामाण्यग्रहाभावानां निवेशनीयतयोक्तदोषस्यापादानात् एकधर्मावच्छिन्नविशेष्यतायां प्र
काराभाववद्वृत्तित्वग्रहे अन्यधर्मावच्छिन्नविशेष्यकवह्निविशिष्टबुद्धेरविरोधित्वमनुभूयत इति
तथापि स्वीयप्रकाराभाववद्वृत्तित्वप्रकारतानिरूपितायावह्न्यभावप्रकारतानिरूपितविशेष्य
त्वनिष्ठविशेष्यतातन्निरूपितायावच्छिन्नत्वनिष्ठावच्छेदकतातन्निरूपितनिरूपितत्वसंबंधा
वच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावविशिष्टत्वं प्रतिबंधकताघटसंबंधविशेषणं एवं च
घटत्वादिघटिताप्रामाण्यग्रहस्यापि हृदत्वेऽभावः सुलभ एव अथवा ज्ञानेनेति स्वपक्षे निवेश्य किंतु

न१

विशिष्यप्रकारमनिवेश्यैवज्ञानभेदेनविषयताभेदपक्षेस्वावच्छेदकावच्छिन्नत्वस्वनिरूपितज्ञाननिरू
पितत्वस्वनिरूपिताभावविषयतानिरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकीभूतधर्मावच्छिन्न
प्रकारतानिरूपितत्वैतत्त्रितयसंबंधेनविशेष्यताविशिष्टान्यविशेष्यताघटितत्वएवसंबंधत्वमेषासं
बंधेयोपपादनात्तु घटोवह्न्यभाववाभाववान्हृदश्चवह्निमानितिसमूहालंबनीयायाःसंशयमादाय
हृदोनवह्निमानितिज्ञानीयायाःहृदोधूमाभाववान्वह्न्यभाववांश्चेतिसमूहालंबनीयायाश्चवह्न्यभा
वप्रकारतानिरूपितविशेष्यतायानासंग्रहः विषयत्वाभेदेतुस्वविशेष्यत्वाभावविशिष्टायास्वीय
वह्न्यभावप्रकारतानिरूपितविशेष्यतानद्वृत्तिःसंबंधःविशेष्यत्वाभावश्चस्वावच्छेदकावच्छिन्न
त्वस्वनिरूपिताभावविषयतानिरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकावच्छिन्नप्र
कारतानिरूपितत्वोभयसंबंधावच्छिन्नप्रतियोगिताकःसंबंधरूपप्रयोजनंतत्त्वमेवाहृदोवह्न्यभाव
वानित्यादिज्ञानीयतादृशविशेष्यतायांस्वविशेष्यत्वाभावोव्यधिकरणःसंसर्गोपारपासंबंधावच्छिन्नप्रति
योगिताकएवनचवक्तव्यविशेष्यतासामान्याभावनिवेशेसंशयविशेष्यतावैशिष्ट्यंदुरपवादंतत्तत्र

विशेष्यत्वाभावश्चस्य निरूपितावच्छिन्नत्व वृत्त्यवच्छेदकतावच्छेदक धर्मावच्छिन्नत्वस्य ५

ज्ञानविशेष्यत्वाभावनिवेशेचतत्तज्ज्ञानत्वेन प्रतिबंधकतापत्त्यानानुगमः विशेष्यताप्रतियोगिकाभाव
निवेशेचोभयाभावमादाय संसर्गविशेष्यतायाउपग्रहापत्तिरिति वाच्यं निरूपितत्वसंबंधावच्छिन्नस्व
निष्ठावच्छेदकता निरूपकविशेष्यतावृत्तिप्रतियोगिताकत्वेनाभावनिवेशात् अप्रामाण्यज्ञानविशि
ष्टज्ञानवारणायचवह्न्यभावप्रकारतानिरूपितविशेष्यतायांज्ञानीयविशेष्यतावृत्तिविशेष्यत्वा
भाववत्त्वं निवेश्यं निरूपितनिरूपितत्ववृत्त्यवच्छेदकतानिरूपितप्रकारतात्वावच्छिन्नावच्छेदकता
निरूपितनिरूपितत्वसंसर्गावच्छिन्नावच्छेदकतावच्छेदकधर्मावच्छिन्नप्रकारतानिरूपितत्वस्वनि
रूपिताधेयत्वप्रकारतानिरूपिताभावप्रकारतानिरूपितप्रतियोगितासंसर्गावच्छिन्नप्रकार
तावच्छेदकधर्मावच्छिन्नप्रकारतानिरूपितत्वेतत्त्रितयसंबंधावच्छिन्नप्रतियोगिताकोग्राह्यः
एवंचवह्न्यभावप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यतात्वावच्छेदेनवह्न्यभावाभाववद्वृत्ति
त्वग्रहदशायांभाववत्त्वं तदीयमुपदर्शिततत्त्रितयसंबंधेनाप्रामाण्यज्ञानीयविशेष्यतावृत्ति
रत्तातादृशविशेष्यत्वार विशेष्यतनतादृशविशेष्यत्वौ तायास्तादृशह्रदविशेष्यतायांसत्वात्ः वह्न्यभावप्रकारतानिरू

निरूपिताधिकरण्यप्रकारता ५

पितघटत्वावच्छिन्नविशेष्यताकत्वावच्छेदेन प्रकाराभाववद्वृत्तित्वग्रहदशायां ह्रदे वह्न्यभाववत्ताज्ञा
नस्याविरोधित्वानिर्वाहाय प्रथमसंबंधे निवेशः यद्यपि स्वाश्रयत्वमात्रोपादानेपि निर्वाहः घटत्वा
वच्छिन्नविशेष्यतावत्तिविशेष्यताकत्वस्याश्रयतासंबंधेन ह्रदत्वावच्छिन्नविशेष्यतायामसत्वान्न
दोषः तथापि ह्रदत्वावच्छिन्नविशेष्यतात्वेन घटत्वावच्छिन्नविशेष्यतायाऽप्रामाण्यघटितात्राप्रामा
ण्यग्रहसंपादनेस्यात् घटाभावप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यतात्वावच्छेदेन प्रकाराभावव
द्वृत्तित्वग्रहस्य वह्न्यभावप्रकारतानिरूपितह्रदत्वावच्छिन्नविशेष्यतात्वावच्छेदेन घटाभावाभाव
वद्वृत्तित्वग्रहस्य च सत्वेउक्ताभावनिर्वाहायोत्तरसंबंधद्वये निवेशः यदि च वह्न्यभावाभाववत्तिवह्न्य
भावप्रकारकमित्यप्रामाण्यग्रहोपि संभवति तदा प्रथमसंबंधं परित्यज्योत्तरसंबंधद्वयावच्छिन्न
प्रतियोगिताकोज्ञानीयविशेष्यतावत्त्वस्ववच्छिन्नत्वनिष्ठावच्छेदकत्वानिरूपितविशेष्यत्वाभा
वोपि एकनिवेश्यः एवं पर्वतो वह्निमान्न वेति संशयवारणं वह्निमति वह्न्यभावप्रकारकमिति ज्ञाना
भावनिवेशप्रकारश्च वसुकुशलमतिभिरूह्यः॥ छ॥ श्रीगणेशाय नमः॥ पश्चात्तेनि॥ छ॥ छ॥

१९० पक्षतासाध्यताहेतुतावच्छेदकनिवेशनं आश्रयासिद्धिसाध्याप्रसिद्धिहेत्वसिद्ध्यादेः संग्रहार्थं ज्ञेयं अत्र
190 चेतिः न च स्वस्वरूपसंबंधरूपावच्छेदकत्वनिवेशे पाषाणमयपर्वतादावतिव्याप्तिः ज्ञानभेदेन विषयि
तायाएतन्मते भेदात् न चैवमेतल्लक्षणएवाग्ने आहार्यानाहार्यविषयितायोर्भेदकथनविरोध इति
वाच्यं तन्मतेपि येनरूपेणप्रतिबध्यतावच्छेदकता तद्रूपवत्त्याहार्यज्ञानीयविषयितायास्तथात्वसं
भावनावारणायाग्रेवह्निप्रकारकत्वाद्यनिरूपितेत्याद्यभिधानात् एवमपि तादृशग्रहत्वव्यापिके स
स्मिन्ग्रंथविरोधः अनाहार्यज्ञानीयविषयितानामेव भेदघटितव्यापकत्वासत्वात्सत्वादाहार्यानु
धावनवैयर्थ्यादिति चेत्तर्हि तत्र यस्यैकविषयितापक्षीयद्वितीयकल्पाभिप्रायकतया न दोषः अथ
वायद्रूपेन्तत्समानाधिकरणभेदप्रतिबध्यतावच्छेदकतानवच्छेदकं तदवच्छिन्नावच्छेदकताकप्र
१ तिबध्यतानिवेशपरएवसग्रंथः तद्रूपवदवच्छिन्नप्रतिबध्यतानिवेशपक्षे विषयितात्वादिनेत्यादि
नोक्तदोषे बोध्यं वस्तुतस्तु एकविषयितापक्षीयद्वितीयकल्पाभिप्रायक एव संग्रंथ इति न कोपि
विरोधः एतेन स्वावच्छिन्नविषयकत्वव्यापकतादृशप्रतिबंधकतावच्छेदकविषयितानिवेशे क

स्यएवलघीयान्। उत्तरीत्याऽनाहार्यत्वनिवेशेसंशयान्यत्वाप्रामाण्यज्ञानानाभावयोरनिवेशेनला
घवात्। तथाचलघुकल्पत्वसंगतमितिपूर्वपक्षोप्युपास्तः ज्ञानभेदेनविषयिताभेदमतेआहार्यज्ञानीया
इवसंशयाप्रामाण्यज्ञानास्कंदितज्ञानीयायाविषयितायाअपिप्रतिबंधकतानवच्छेदकत्वेनसंशे २८
यान्यत्वाप्रामाण्यज्ञानाभावयोरपिनिवेशस्यावश्यकत्वात्। केचित्तुज्ञानभेदेनविषयिताभेदस्याप्रा
माणिकत्वेपिपाषाणमयत्ववत्सर्वतवारणायविषयितापदेनप्रतिबंधकतावच्छेदकतापर्याप्त्यधिक
रणधर्मएवनिवेश्यः एवंचनिश्चयत्वस्यापिनिवेशः असाधारण्यसंग्राहकनिश्चयविशेषणंचावश्य
कंइत्यभिप्रेत्यलघुत्वयत्नविधानमितिवदंति। इदंतुचिंत्यते अवच्छेदकविषयितापददर्शनान्नाव
च्छेदकतापर्याप्तिनिवेशोभिमतः पाषाणमयत्ववत्सर्वतादिवारणंतुअसाधारण्यविषयितान्यत्व
ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबंधकतावच्छेदकत्वोभयाभावस्यविषयिताविशेषणत्वात्। एवंचनिश्च
यत्वस्यासाधारण्यसंग्राहकनिश्चयविशेषणस्यचवैयर्थ्यात्। पूर्वकृत्यएवसम्यक् इति। ज्ञानभे
देनविषयितेक्येपिद्वितीयलक्षणेप्रतिबंधकतावच्छेदकमुख्यविशेष्यतानिरूपकतावच्छेदकत्वविवक्षि

२२१ ।तं अवच्छेदकत्वं स्वरूपसंबंधविशेषः एकदेशवृत्यभाववारणाय मुख्यत्वनिवेशः न च एवं निरुक्तयथाश्रु
191 तार्थपर्यवसानादिति ग्रंथासंगतिः अवच्छेदकत्वाद्यंशविनापि यथाश्रुतार्थस्याभिप्रेतत्वात् एवं च निरुक्त
त्वनिवेशप्रयोजनाभावाल्लाघवतयेत्येतत्संगच्छत एव परंतु प्रथममते मुख्यविशेष्यतानिवेशकत्वं कु
तो नादृतः ज्ञानपदवैयर्थ्यापातादिति चेत् कामिनीजिज्ञासावृत्तिप्रतिबंधकतावारणाय प्रतिबंध
कतायां ज्ञानवृत्तित्वस्यावश्यकत्वात् न च विषयविशेषे दोषमुख्यविशेष्यकज्ञानं यद्यपि प्रसिद्धं त
दात्तत्संग्रहाय तत्र न तथात्वं इह तु अस्वरसमध्ये एतद्दूषणं प्रवेश्यामइति वाच्यं तर्हि तल्लक्षणे तद्दो
षविशिष्टधर्मिव्यक्तिव्याप्तेः तद्दोषविशिष्टधर्म्यंतरज्ञानाज्ञानयोर्विशिष्टांतरघटितत्वसंभवात् न च
विशिष्टांतरप्रकारितावृत्तियद्विशिष्टांतरविषयितात्वं तद्व्यापकरूपावच्छिन्नप्रयोज्यत्वमस्त्येवेति वा
च्यं स्वावच्छिन्नविषयिताश्रयप्रतीतिविषयतावच्छेदकत्वस्य दोषतावच्छेदकमात्रेऽसत्वादिति
दोषमुख्यविशेष्यकप्रतीतिः सर्वत्राप्यपेयत्वात् वस्तुतस्तु हेत्वाभासग्रंथे दीधितिकृद्भट्टाचार्याणां मु
ख्यविशेष्यतायानिवेशादर्शनात्तद्रीतिविरोधः स्वावच्छिन्नविषयितावच्छिन्नप्रतिबंधकतासामान्या

वच्छेदकविषयित्वानिरूपकत्वानवच्छेदकइत्यादिकइत्यादिटीकास्वपि विषयितापदमेव दृश्यते निरुक्त
विशेषव्यापकावच्छिन्नानुमितिप्रतिबंधकतावच्छेदकस्वावच्छिन्नविषयितेत्यादि बहुस्थलेषु बहुव्री
ह्यर्थस्य व्यवहृतत्वाच्च दीधितिकृतामपि यद्विषयकपदे यादृशविशिष्टविषयकेत्येव व्याख्यानं न
तु यादृशविशिष्टविशेष्यकेति तथा च गंधप्रकारकत्वयसुरभिविषयितात्वेनानिवेशनपरिष्कर्तुं शक्य
मिति तस्मात् ज्ञानभेदेन विषयिताभेदानंगीकारे प्रतिबंधकतायां स्वावच्छिन्नविषयिताव्यापकत्वघ
टितं द्वितीयमिति बोध्यं न चेति। निर्वह्निः पर्वतो वह्निमानित्यादौ आहार्यानाहार्यज्ञानसाधारणं यत्प
र्वतत्वावच्छिन्ने वह्नित्वावच्छिन्नप्रकारतानिरूपकत्वं तस्य तादृशसमूहालंबनात्मकग्रहत्वव्यापक
त्वात्तत्स्थलीयाश्रयासिद्ध्यादौ नाव्याप्तिरित्यभिमानः व्यापकत्वं तत्समानाधिकरणाभेदप्रतियोगि
तानवच्छेदकत्वमित्याहार्यानाहार्यसाधारणविषयितां दूषयित्वा आश्रयासिद्धाव्याप्तिमाहयतइ
ति तदुभयसाधारणविषयिताया भेदेपि तत्समानाधिकरणाभावप्रतियोगितानवच्छेदकधर्मवत्वरू
पव्यापकत्वानिवेशे तद्वृत्त्यनुगतधर्ममादाय अव्याप्तिं परिहर्तुमाशंकते निर्वह्नित्वादीति। यद्रूपेति। य

६ विषयिताव्यापकत्वं तद्रूपावच्छिन्न

१२२ 192 द्रूपावच्छिन्नविशेष्यकात्वावच्छिन्नविशेष्यकत्वावच्छिन्नयद्रूपावच्छिन्नप्रकारकत्वत्वं ताहृश ग्रहत्वव्यापकता
वच्छेदकमित्यर्थः तेन विषयितात्वादिनेत्यादिरीत्या न दोषः दिगर्थत्वं छेदकत्वेमनतिरिक्तवृत्तित्वं वोध्यं ए व
वं विशिष्टांतराघटितत्वं निवेश्यं एवं च यद्रूपावच्छिन्नेयद्रूपावच्छिन्नप्रकारकत्वं ताहृशग्रहत्वव्यापकं
तद्रूपावच्छिन्नविशेष्यकतद्रूपावच्छिन्नप्रकारकग्रहत्वावच्छिन्नप्रतिवध्यतानिरूपिप्रतिवधकता
यद्रूपावच्छिन्नविषयिताव्यापिका तद्रूपावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदको न्हूतयद्रूपाव
च्छिन्नविशेष्यक तद्रूपावच्छिन्नप्रकारकग्रहत्वावच्छिन्नप्रतिवध्यतानिरूपितप्रतिवंधकतात्वसामा
नाधिकरण्येन तद्रूपावच्छिन्नाविषयकनिश्चयवृत्ति विषयितानिरूपकतावच्छेदको न्हूत तद्रूपा
वच्छिन्नत्वमर्थः व्याप्यादिरूपाघंयद्रूपपदं द्वितीयं तद्रूपपदं च लक्ष्यतावच्छेदकपरं धूमव्यभिचारिवह्निमान्
धूमवान्वह्नेरित्यादौ पक्षतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्नप्रकारताकत्वं ताहृशग्रहत्वव्यापक
मिति व्यभिचारघटितवाधत्वं पद्रूपमिति तद्रूपावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकपद्रूपं वाधत्वां
तरं तद्रूपावच्छिन्नविषयकनिश्चयवृत्तिविषयितानिरूपकतावच्छेदकतद्रूपं प्रकृतवाधत्वमिति लक्षणस

मन्वयः प्रमेयत्वविशिष्टव्यभिचारत्वादिकं यद्रूपमिति तद्रूपावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकीय
रूपं बाधत्वांतरं तद्रूपावच्छिन्नविषयकनिश्चयवत्तिविषयिता तत्केवलव्यभिचारत्वावच्छिन्नाविष
यकत्वस्य तद्रूपावच्छिन्नविषयकनिश्चये ऽसत्वान्नातिव्याप्तिः वह्न्यभाववज्जलादिमद्वृत्तिजलादि
मद्ध्रदादावतिव्याप्तिवारणाय विशिष्टद्वयाघटितत्वमुपादेयमित्ति दिक्. न चेति यद्रूपावच्छिन्नय पा
नं थं त्संसर्गावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकताकत्वं तादृशग्रहत्वव्यापकं तद्रूपावच्छिन्नत्वसं व
बंधावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकतासंबंधावच्छिन्नप्रतिबध्यतेत्यादिरीत्या लक्षणानि
ष्कर्षो बोध्यः ह्रदो वह्निमानित्यादौ वह्न्यभावविशिष्टघटादावतिव्याप्तिसंभवेपि एतन्मतस्यातिजघ
न्यतासूचनाय पर्वतो वह्निमानिति सद्धेत्वनुधावनं दीधितौ संभवतीत्यंतपरिचायकं पर्वतादिप
क्षकदोषत्वेन वह्निविशिष्टपर्वतादीनां निर्वह्निः पर्वतो वह्निमानित्यादिस्थलीयदोषाणां पर्वतो वह्नि
मान्धूमादित्यादौ परिचयवारणाय तादृशस्थले तद्धाचेष्टेसर्वत्रेति. निर्वह्निरिति पर्वतत्वाव
च्छेदेन वह्न्यभावस्य घटकतास्थले तद्धाप्येति. यो यत्र हेत्वाभासस्तद्धाप्योपि तत्रेति वक्ष्यमाणत्वा

१९३ त्वविशेषणेति वह्निमत्पर्वतस्येव पर्वतनिष्ठवह्न्यभावत्वस्याप्याश्रयासिद्धत्वात् यत्स्थलीयेति उक्तस्थली
193 यवह्न्यभावविशिष्टनिर्वह्निरूपबाधादेरित्यर्थः तथा च विशिष्टपक्षे विशिष्टसाधनवैशिष्ट्यग्रहवि
रोधितावच्छेदकीभूतविशिष्टविषयितात तद्विशिष्टविषयितान्यतमविषयितेति क्रमेणानिष्कर्षो बो
ध्यः निर्वह्निरितिउपलक्षणमेतत् पर्वतत्वसामानाधिकरण्येन वह्न्यभावपक्षतावच्छेदककनिर्व
ह्निः पर्वतो वह्निमानित्यादिस्थलीयबाधप्रतिरोधयोः ग्रहेति तथा च दोषघटकीभूतमुख्यविशे
भिन्न ष्यरूपैकदेशेऽतिव्याप्तिरित्यर्थः तत्तद्रूपविशिष्टभिन्नत्वघटकरूपावच्छिन्नत्वोक्तावप्याह सर्वमि
ति आकाशाभाववदित्यर्थः तत्तदिति उक्तस्थले वह्न्यभावविशिष्टनिर्वह्नित्वादेरिव तद्घटकके
हे वलनिर्वह्नित्वादेरपि अवच्छेदकत्वादिति व्याप्तेः पर्याप्तिनिवेशः समूहालंबने यावानंशो गृहीतस्त्वे
त्यादि वध्यज्ञानप्रसिद्ध्यतितावन्मात्रविषयित्वेपवानुमितिलक्षणे निवेश्यपाइत्याशयेनैकमा
त्रदोषेत्युक्तं तत एव यत्र समूहालंबनानुमितिप्रसिद्धिस्तत्र मणिकारोक्तलक्षणमेवाभिप्रेतमि
ति स्वाशयमाहायं चेति एकविधेः एकजातीयः असिद्धत्वादिनातद्व्याप्यादीनामेकजातीयत्वं बोध्यं

प्रतिबध्येति तेन पर्वतान्यपर्वतो वह्निमान् धूमादित्यादौ व्याप्याभावत्व्याप्यादिभेदेन भिन्नानामाश्र
यासिद्ध्यादीनां तावदन्यान्यत्वरूपलघुधर्मस्यावश्यकत्वं सूचितं नानाविधदोषस्थले प्रतिबध्यज्ञानप्र
सिद्धौ गौरवेण तावदन्यान्यत्वं न लक्षणं किं त्वन्यादृशमित्याह इदमिति नन्वेवं न हि घटभिन्नभेदो घट
त्वादतिरिच्यते इति स्वोक्तिविरोध इत्याशंक्य एकधर्मिनिष्ठप्रतियोगितावच्छेदकताकभेदावच्छिन्न
भेदस्यातिरिक्तत्वे धर्मिकल्पनागौरवमिति विशेषनिरुक्तौ प्रतियोगितावच्छेदकानतिरिक्तत्वं सिद्धं तत्
त तत्तद्धर्मावच्छिन्नभेदकूटावच्छिन्नभेदस्य तु तत्तद्धर्मस्वरूपत्वकल्पनमपेक्ष्यातिरिक्तत्वकल्पनमे
व लघीयः तत्तद्धर्मस्वरूपत्वपक्षेऽतिरिक्तधर्मिकल्पनाभावेपि अनेकधर्मिषु भेदत्वकल्पन एव गौ
रवादित्याशयेन परिहरति तत्तद्धर्मावच्छिन्नभेदेति अधिकरणविकासकतयेति अधिकरणानां
विषयित्वानां विकासकत्वपापस्थिवायकतयेत्यर्थः तथा च विषयितासु तत्तद्धर्मावच्छिन्ननिरूपित
त्वोत्कीर्तनं परिचायकमात्रं न तु लक्षणघटकं तथा सति तत्तद्धर्मवत्त्वमात्रस्यैव लक्षणत्वसंभवे
न शेषवैयर्थ्यादिति भावः अत्रास्वरसं व्यञ्जयति इदं पुनरिति भ्रमावृत्तित्वनिवेशे दोषविषयिता

१९४ याः भ्रमवृत्तित्वादसंभवदुक्तितो भ्रमान्येति। अथैवमपि पर्वते वह्निः साधने धूमोऽनुपद्ध इति व्यवहारप्रसंगः प
194 र्वतत्वावच्छिन्ने वह्नित्वावच्छिन्नप्रकारकत्वे तन्निरूपकत्ववह्निव्याप्यधूमत्वावच्छिन्नप्रकारतानिरूपक
त्वयोरभावप्रयोजकत्वमात्रवृत्तिविषयितानिरूपकीभूतपाषाणमयपर्वतादेः स्वज्ञानविषयहे
तुतावच्छेदकत्वसंबंधेन धूमे सत्वादिति चेत् ज्ञानवैशिष्ट्यविशिष्टविषयिताया एव प्रयोजकत्वे
न तद्व्यावृत्तविषयितामात्रस्याप्रयोजकत्वात् स्वविषयकेति निर्वह्निः पर्वतो वह्निमानित्यादौ घटवद
वृत्तिव्याप्तिः वह्निमान् पर्वतो घटश्चेत्येतादृशसमूहालंबनात्मकज्ञानाव्यवहितोत्तरत्वस्यानुमितिनि
ष्ठाधिकरणतायां विरोधिविषयिताप्रयुक्तत्वसत्वात् अतो व्यापकत्वनिवेशः तथा सति केवलघ
टविषयकनिश्चयाव्यवहितोत्तरानुमितिनिष्ठाधिकरणतायां विरोधिविषयिताप्रयुक्ताभावान्नत
त्रातिव्याप्तिः अथैवं पर्वते वह्निना धूमसाधने प्रमेयत्वविशिष्टव्यभिचारो दोषइति व्यवहारापत्तिः
तद्विषयितायास्तादृशीभ्रयानाबाधिकरणताप्रयोजकत्वात् नन्वत्र विषयितायां स्वरूपसंबंधे
न तादृशप्रयोजकत्वान्वयो नोपगम्यते किंतु पूर्ववत् अन्वयितावच्छेदकावच्छिन्नविषयितायाया।

त्किंचिद्विशिष्टांतरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यस्वप्रयोजकत्वसंबंधेनेतादृशोभयाभावा
धिकरणतायाः। एवं उक्तस्थले च प्रमेयत्वविशिष्टव्यभिचारत्वस्यैवान्वयितावच्छेदकत्तयातदवच्छिन्न
निरूपितविषयितायां केवलप्रयोजकतासंबंधेनतादृशाभावाधिकरणतावत्त्वसत्वेपि अभावाधि
करणतायां विशिष्टांतरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यताविरहान्नतेनसंबंधेनतादृशा
भावाधिकरणतावत्त्वमिति नोक्तातिप्रसंगः दोषादिपदानां च विशिष्टांतरविषयिताप्रयोज्यनिरूक्तो
भयाभावप्रयोजकाभावाधिकरणतांप्रयोजकस्यावच्छिन्नविरोधिविषयिताकत्वेनान्वयिताव
च्छेदकावच्छिन्नबोधकत्वमेवनतूपदर्शितार्थबोधकत्वमपीतिम्वतुपर्वते वह्नेः साधने धूमे हेतौ पाषा
णमयत्ववत्पर्वते दोषइति व्यवहारः स्यात्। अन्वयितावच्छेदकीभूतपाषाणमयत्ववत्पर्वतत्वावच्छि
न्नविषयितायां विशिष्टांतरविषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्याभावाधिकरणताप्रयोजक
त्वसत्वात् पाषाणमयो न वह्निमानिति ज्ञानस्य च मतयातद्विषयस्य विशिष्टांतरत्वाभावात्। न च तद्वि
षयितायां विरोधित्वासंभवः साध्यवत्त्वविषयितान्यत्वरूपविरोधित्वस्य सत्वात् इति तत्रोक्तरीत्या।

१९५ स्वविषयकनिश्चयाव्यवहितोत्तरानुमितित्वव्यापकविशिष्टांतरविषयित्वाप्रयोज्यनिरुक्तोभयाभावप्रयो
195 जकाभावाधिकरणताप्रयोजकस्वावच्छिन्नविरोधिविषयिताकधर्मत्वैवांशतःन दोषपदार्थः पूर्वोक्तोवह्निमा
न्धूमादित्यादौ केवलवह्न्यभावेतिप्रसंगवारणाय व्यापकत्वांशस्यावश्यकत्तया नानाविधबाधादिनि धा
श्चयोत्तरानुमितौ व्यापकताभंगेनासंभवापत्तेरिति मैवं विशिष्टांतरविषयितात्वव्यापकरूपावच्छि २
न्नप्रयोज्यतादृशाभावाधिकरणतात्वव्यापकविरोधिविषयिताप्रयोज्यताकेति विवक्षितत्वात् प्र
मेयत्वविशिष्टव्यभिचाराद्यवतिप्रसंगवारणात् ननु तादृशाभावाधिकरणतात्वव्यापकविशिष्टांतर
विषयितात्वव्यापकरूपावच्छिन्नप्रयोज्यत्वविशिष्टविरोधिविषयिताप्रयोज्यताकत्वं विवक्षितं तेना
नाविधबाधसत्प्रतिपक्षसमूहालंबनोत्तरज्ञानव्यधिकरणताया अपि सामान्यांतर्गतत्वेनासं
भवापातात् न चैवं व्यभिचारघटितबाधनिश्चयोत्तरानुमितिनिष्ठाधिकरणतायां व्याप्त्यादिविरह
प्रयोज्यत्वेन व्यभिचारविषयिताप्रयोज्यत्वमेवेति अव्याप्तिरिति वाच्यं विशिष्टांतरविषयिताप्रयो
ज्यतादृशाभावाधिकरणताप्रयोजकीभावाधिकरणताया विवक्षणीयत्वात् अत्र च प्रयोज्यता

यानानात्वेविशिष्टांतरविषयिताप्रयोज्यतायां असाधारण्यविषयित्वानिरूपितत्वज्ञानवैशिष्ट्य
प्रयोज्याधिकरणतावृत्तित्वोभयाभाववत्वं विशेषणं देयं तदेकत्वे च ज्ञानवैशिष्ट्यप्रयोज्यतानिरू
पितत्वासाधारण्यविषयितात्वानवच्छिन्नत्वोभयाभाववत्वेन विशिष्टांतरविषयितानिष्ठप्रयोज
कतां विशिष्यतत्प्रयोज्यताभावो वाच्यः तेनात्रासाधारण्यो दोष इति व्यवहारस्याधिकरणतायां
हेतुमत्पक्षरूपविशिष्टांतरविषयिताप्रयोज्यत्वेऽपि नानुपपत्तिः यद्वा तदेकत्वपक्षे वह्न्यभाववज्ज
लादिमद्वृत्तिजलत्वादिमद्रूपादावतिव्याप्तिः वह्न्यभाववज्जलत्ववद्रूपादिरूपविशिष्टांतरविषयितानिष्ठ
प्रयोजकतायास्तदुभयवत्वादिति उक्तप्रयोजकतायाः असाधारण्यविषयिताप्रयोज्यत्वानिरू
पितत्वासाधारण्यविषयितात्वानवच्छिन्नत्वोभयाभाववत्वेन विशेषणीयत्वादित्याद्यन्यत्र वि
स्तरः धर्म इति। यौगिकदुष्टत्वपक्षे अस्याप्यसद्धेतुनिष्ठत्वेन तद्धत्वमादायापि दुष्टताव्यवहार इति
वोध्य इति सूचनाय। किं तु पर्वते वह्निसाधने धूमो दुष्ट इत्यादावगत्या तादृशोभयाभावप्र
योजकविषयितात्वावच्छेदेन स्वविशिष्टभ्रमान्यवृत्तित्वात्यंताभावो नत्वाभावो व्यतेन तथा च तादृश

संज्ञावृक्षो धूमइतिबोधंधूमसाधनेवह्नित्वेनायंदुष्टइत्यादिव्यवहारासमतात्पर्ये।कोव्यवहारःधूमाभा
ववद्वृत्तिरासमादिविषयितायाःप्रतिबंधकतावच्छेदकत्वेनाप्रयोजकत्वात्स्वरूपानविषयीभूतदुष्ट
पदार्थान्वयितावच्छेदकप्रकृतहेतुतावच्छेदकविशिष्टमतायाएवसंसर्गत्वात्प्रमेयाधूमोव्याप्यका म
हितावरिहप्रयोजकीभूतधूमाभाववद्वृत्तिप्रमेयवत्वस्यधूमत्वावच्छिन्नेसत्वेपिपर्वतेवह्निसाधने
धूमोदुष्टइतिनव्यवहारः।एवंपर्वत्वावच्छेदेनकांचनमयत्वादेःपक्षतावच्छेदकादिघटकत्वेतद
वच्छेदेनकांचनमयत्वात्यंताभावादेःस्वविषयिताप्रयोज्याधिकरणतायाःनियमतःविशिष्टांतर
विषयिताप्रयोज्यत्वेनतल्लक्षणासत्वेपियथाश्रुतविशिष्टांतराघटितत्वघटितलक्षणासत्वेपिचन
क्षतिःतदुद्भावनेनिग्रहापत्यातस्यदोषपदार्थत्वानुपगमात्।इत्यारडोपाह्वहलभट्टकृतासा
मान्यनिरुक्तिटिप्पणीसमाप्ता॥श्रीः॥छ॥ ॥छ॥आरडोपाह्वहलेनरचिताटिप्पणीयंरंगस मी
मा धरीयमहिलानंदयतुनित्यशः १ गदाधरमतार्थेषुदोषसामान्यलक्षणेनव्यचंचुरितार्थानां
हलस्नानामेवकाशिका॥२ वैकुंठमध्यावसतोःकमलारंगनाथयोःदेहजःकृतवानेनांहलोना

तीरत्वेइति लक्ष्यतावच्छेदकेन लक्षणा। शक्तिघटकीभूतप्रतीतिनिरूपि
तविषयत्वं तु घटत्वादावपीति तत्र शक्तिः। मीमांसकास्तु अग्निर्माण
वक इत्यादौ अग्निवृत्तिगुणसजातीयगुणवत्ता गौणीनयोपस्थितो
धर्मिमात्रवाचकेऽभेदेनान्वेतीत्याहुः॥ तन्मतं निरसितुमाह गौणीवृत्ति
रपीति। इदं शाबरपरास्तपाऽपि शक्यसंबंधतया लक्षणयैव निर्वा
हइति क्लिन्नवृत्तिकल्पनं व्यर्थमिति भावः। एवमेवद्विरेफादिसमा
सेपि लक्षितलक्षणा नातिरिक्ता। तद्घटकपदशक्यरेफद्वयस्य
स्वघटितपदबोध्यत्वरूपपरंपरासंबंधस्य भ्रमरे सत्त्वाल्लक्षणयैव
तद्बोधात्। न च गंगायां घोष इत्यादौ शैत्यपावनत्वादिप्रतीत्यर्थं
व्यंजनाख्यवृत्त्यंतरमंगीकरणीयमिति वाच्यं। तस्या अप्यानुमानि
कादिबोधेनैवोपपत्तेरित्यन्यत्र विस्तरः॥ अग्न्यादिसादृश्यमि
ति। अग्निवृत्तिगुणसजातीयगुणवत्त्वमित्यर्थः। प्रकारतयेत्या
दिः। तथा चाग्निसदृशेऽग्निपदस्य लक्षणेत्यर्थः। अन्यथाना
मार्थयोर्भेदान्वयस्याव्युत्पन्नतयाऽसंगतेः। वस्तुतस्तेजस्वित्वविशि

षेऽलक्षणा । अत एवाग्निर्दिवमाणवकदूष्यतो नाविशेषोऽलक्षणायां ।
अत एव पचतेर्विक्लित्यबोधाविषयत्वमदृष्टचरमित्यपि प्रत्युक्तं ।
योगार्थेन । अवयववृत्त्या । पचधातोः पाके वृत्तेः कर्तरि शानचेदि
तिभावः । शानचि मितिः । नचावयववृत्त्यैवैतादृशबोधाद्धि शिष्टे
शक्तिकल्पनमनर्थकं । अन्यथा समासेपि शक्तिकल्पनापत्तेरि
तिवाच्यं । योगप्रवृत्तिनिमित्तीकृत्य पाककर्तृत्वप्रयोज्यरूढिभा
गिपुरुषविशेषे पाकानुकूलकृतिमत्त्वेन शक्तेः स्वीकारात् ।
अत एव पचत्यपि अतादृशे न तादृशप्रयोगः ॥ एकविंशतितमे
मेपत्रे अनंतकृष्णकृते तृतीयपंक्तौ दूंशोधपत्रं ॥

१९७ 197 रापुपानुजः २ इदं गौड ध्रुनं घ्रतैः प्रतौली बुध्रतो ल्पते॥ अन्तरकोह्रतं सर्वं विनामृत्यं पग॒त्यतां॥ ७॥ अस्मा
कं स्वर्णशून्यनाभिदमेह्हिरण्यकौ एतस्य वंचको लोके हे महारीनसंश॥ दुष्टप्रवंध जानिं दानदेवानां प्रि
यो हेतिः कः श्री मेश्वरादन्यो न ज्ञातो ज्ञानिनां मतः॥ नास्माकं परमं वित्तं राहायानापि देशिकाः पदे शि
कश्रीहरिपादिपं तदुपगं त्यता॥ छ॥ ॥छ॥ ॥छ॥ ॥

खंडित ॥